
# संस्कृतकाव्यशास्त्रम्

## COURSE CODE: B21SN04DC

Discipline Core Course
Undergraduate Programme
Sanskrit Language and Literature



SELF LEARNING MATERIAL

SREENARAYANAGURU OPEN UNIVERSITY

# SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

SGOU

# संस्कृतकाव्यशास्त्रम्

Course Code: B21SN04DC

Semester - IV

SGOU

## Discipline Core Course
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SREENARAYANAGURU
OPEN UNIVERSITY

## SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

संस्कृतकाव्यशास्त्रम्

**Course Code: B21SN04DC**

**Semester - IV**

**Discipline Core Course**

**BA Sanskrit Language and Literature**

SREENARAYANAGURU
OPEN UNIVERSITY

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

ISBN 978-81-970238-1-1

9 788197 023811

# DOCUMENTATION

## Academic Committee

Dr. C.T. Francis
Dr. Smitha Sabu
Dr. Jeena George
Dr. Thara K.V.
Dr. M. Harinarayanan Mankulathillath
Dr. Sreeja Priyadharshini
Dr. K. Ratheesh
Dr. R. Maniyappan
Dr. K. Retheesh
Dr. Susanth S.

## Development of the Content

Dr. G. Sahadevan, Unnikrishnan Nair S., Dr. Sreeja J.

## Review

Content : Unnikrishnan Nair S., Dr. P. Rajan, Dr. G. Sahadevan
Format : Dr. I. G. Shibi
Linguistics : Dr. G. Sahadevan

## Edit

Unnikrishnan Nair S., Dr. P. Rajan, Dr. G. Sahadevan

## Scrutiny

Dr. Sreeja J.

## Co-ordination

Dr. I. G. Shibi and Team SLM

## Design Control

Azeem Babu T. A.

## Cover Design

Jobin J.

## Production

July 2024

## Copyright

© Sreenarayanaguru Open University 2024

YouTube

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The university aims to offer you an engaging and thought-provoking educational journey. The undergraduate programme in Sanskrit Language and Literature is distinguished by its strong focus on grammar and comprehension components while still allocating sufficient attention to literary discussions within the curriculum. Sanskrit education, recognised for its high employability potential, necessitates a practical integration of both grammatical and literary aspects. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.

Warm regards.
Dr. Jagathy Raj V. P.

17-07-2024

# Contents


| | |
|---|---|
| **Block - 1 संस्कृतालङ्कारिकाणां सामान्यपरिचयः** | 3 |
| Unit - 1भरतमुनेः भामहस्य च साहित्यसिद्धान्तानां परिचयः। | 4 |
| Unit - 2 दण्डिनः वामनस्य च साहित्यसिद्धान्तानां परिचयः। | 14 |
| Unit - 3 आनन्दवर्धनस्य कुन्तकस्य क्षेमेन्द्रस्य च साहित्यसिद्धान्तपरिचयः। | 23 |
| Unit - 4 विश्वनाथस्य, राजशेखरस्य च साहित्यसिद्धान्तपरिचयः। | 35 |
| **Block - 2 काव्यादर्शः-दण्डी प्रथमपरिच्छेदात् 1 - 39 कारिकाः** | 44 |
| Unit - 1 प्रथमपरिच्छेदात् 1 - 10 कारिकाः | 45 |
| Unit - 2 प्रथमपरिच्छेदात् 11 - 20 कारिकाः | 53 |
| Unit - 3 प्रथमपरिच्छेदात् 21 - 30 कारिकाः | 61 |
| Unit - 4 प्रथमपरिच्छेदात् 31 - 39 कारिकाः | 69 |
| **Block - 3 काव्यप्रकाशः।(मम्मटः) प्रथमोल्लासः** | 76 |
| Unit - 1 मङ्गलश्लोकः, काव्यप्रयोजनं, काव्यहेतुश्च । | 77 |
| Unit - 2 काव्यस्वरूपं काव्यभेदश्च । | 83 |
| Unit - 3 उत्तमकाव्यं मध्यमकाव्यं च। | 87 |
| Unit - 4 अवरकाव्यम् (चित्रकाव्यम्) | 92 |
| **Block - 4 काव्यप्रकाशः।(मम्मटः) द्वितीयोल्लासः।** | 96 |
| Unit -1 कारिका: 6 - 8 | 97 |
| Unit - 2 कारिका: 9 - 12 | 105 |
| Unit - 3 कारिका: 13 - 16 | 112 |
| Unit - 4 कारिका: 17 - 20 | 118 |
| **Block - 5 काव्यालङ्कारसूत्रवृत्तिः-वामनः। तत्र प्रथमं शाराराधिकरणम्। प्रथमद्वितीयाध्यायौ।** | 125 |
| Unit - 1 प्रथमः अध्यायः(पञ्चसूत्राणि) | 126 |
| Unit - 2 द्वितीयेऽध्याये (1 - 5 सूत्राणि) | 132 |
| **Block - 6 काव्यालङ्कारसूत्रवृत्तिः-वामनः। तत्र प्रथमं शाराराधिकरणम्। द्वितीयाध्यायस्य शिष्टभागः।** | 136 |
| Unit - 1 द्वितीयेऽध्याये रीतिविनिश्चयः(6 - 13 सूत्राणि) | 137 |

Unit - 2 द्वितीयेऽध्याये वैदर्भ्याः ग्राह्यत्वम् (14 - 22 सूत्राणि) 145
Model Question Paper Set – 01 150
Model Question Paper Set – 02 153

SGOU

BLOCK -1

# संस्कृतालङ्कारिकाणां सामान्यपरिचयः

SGOU

# Unit-1
# भरतमुनेः भामहस्य च साहित्यसिद्धान्तानां परिचयः।

## उद्देश्यानि (Learning Outcomes)

- काव्यशास्त्रेऽवगाहः।
- संस्कृतसाहित्यसिद्धान्तानां परिचयः।
- काव्यलक्षणविषये आलङ्कारिकमतानां भेदावगमनम्।
- काव्यरूपेषु रीतिसिद्धान्तानां प्रयोगपरिज्ञानम्।
- काव्यविभागपरिज्ञानम्।
- महाकाव्य-गद्य-पद्य-चम्पूकाव्यानां लक्षणपरिज्ञानम् ।
- भरतमुनेः नाट्यशास्त्रस्य महत्वज्ञानम्।

## प्राग्व्यपेक्षाः (Pre requisites)

भरतमुनिः भारतस्य पौराणिकः नाट्यकलाचार्यः, सङ्गीतशास्त्रज्ञः च आसीत्। तस्य नाट्यशास्त्रं विश्वविख्यातमेव। यूरोपियदेशेष्वपि अस्य कलाचातुरी व्यापृता दृश्यते। जर्मन्-आङ्गलेयीसाहित्ये नाटककर्तृषु अस्य योगदानं दृश्यते। भारतीयनाट्यकलायाः अलङ्कारशास्त्र-साहित्य-सङ्गीतकलायाः च पिता भरतमुनिरेव। सोऽयं क्रिस्तोः पूर्वं द्विशतकस्य, क्रिस्त्वनन्तरं द्विशतकस्य च मध्ये जीवितमदाधारयत् इति गवेषकाः वदन्ति।

काश्मीरदेशस्थः कश्चन प्रशस्तः वैयाकरणः, काव्यशास्त्रनिपुणः चासीत् भामहः। यद्यपि दण्डिनः समकालिकत्वं केचन गवेषकाः वदन्त्यपि सोऽयं महात्मा दण्डिनः पुरोवर्ती क्रिस्तोः सप्तमे शतके जीवितमधारयत्। दण्डि-वामन-उद्भट-रुद्रटादयः अलङ्कारस्य प्राधान्यमङ्गीकृत्य तदुपजीव्य साहित्यमण्डलं जाज्ललयामासुः। भामहस्य आलङ्कारिकं ग्रन्थतल्लजं भवति काव्यालङ्कारम्। सोऽयं वररुचेः 'प्राकृतप्रका' इति प्राकृतव्याकरणस्य व्याख्यां रचितवान्।

## मुख्यपदानि (Key terms)

भरतमुनेः नाट्यशास्त्रम्, काव्यालङ्कारम्, विश्वविज्ञानकोशः, सात्त्विकभावः।

**Discussion**

## 1.1.1 भरतमुनेः नाट्यशास्त्रम्

भरतमुनिः भारतस्य पौराणिकः नाट्यकलाचार्यः, सङ्गीतशास्त्रज्ञः च आसीत्। तस्य नाट्यशास्त्रं विश्वविख्यातमेव। यूरोपियदेशेष्वपि अस्य कलाचातुरी व्यापृता दृश्यते। जर्मन्-आङ्गलेयीसाहित्ये नाटककर्तृषु अस्य योगदानं दृश्यते। भारतीयनाट्यकलायाः अलङ्कारशास्त्र-साहित्य-सङ्गीतकलायाः च पिता भरतमुनिरेव। सोऽयं क्रिस्तोः पूर्व द्विशतकस्य, क्रिस्त्वनन्तरं द्विशतकस्य च मध्ये जीवितमदाधारयत् इति गवेषकाः वदन्ति।

नाट्यशास्त्रम् अतिविपुलैः गाम्भीर्ययुक्तैः अनेकैः विषयैः सुघटितं कश्चन विश्वविज्ञानकोशः भवति। अयं ग्रन्थः नृत्य-वाद्य-सङ्गीत-साहित्यपरम्पराणाम् अक्षयनिधिरेव। अपि च रससिद्धान्तस्य आधिकारिकः उपज्ञाता भरत एव। तस्य रससिद्धान्तः न केवलं इतरालङ्कारिकाणां कौतुकावहं किन्तु सर्वान् सहृदयान् रसे निमज्जनाय पर्याप्तः भवति। भरतस्य नाट्यकलाप्रावीण्यं साधारणजनान् विस्मयस्य, परमानन्दस्य, धार्मिकतायाः, आत्मीयतायाः, मानविकतायाः च उत्तुङ्गश्रृङ्गे नेष्यतीत्यत्र नास्ति संशयः। अधुना विश्वविख्यातं भारतीयसांस्कृतिकपैतृककलारूपं भरतनाट्यं भरताचार्यस्य नाट्यशास्त्रानुसृतं नन्दिकेश्वरस्य अभिनयदर्पणानुसारं च भवति।

नाट्यशास्त्रे षट्त्रिंशत् अध्यायाः षट्सहस्रं कारिकाः च सन्ति। साहित्यमण्डले अत्यगाधं स्थानं वोढुं पर्याप्तं भवति नाट्यशास्त्रम्। अधिकतया अनुष्टुप्छन्दसा रचितोऽयं ग्रन्थः। मध्ये मध्ये आर्यावृत्तं चोपयुक्तम्। केषुचित् भागेषु गद्यमपि द्रष्टुं शक्यते।

प्रथमाध्याये नाट्योत्पत्तिवर्णनम्, वृत्तित्रयं, वृत्तिचतुष्टयं वा आश्रित्य नाट्यप्रयोगप्रारम्भस्य जिज्ञासा। कैशिकीवृत्तिनिरूपणम्, विधात्रा नाट्यवेदस्य रचना, तस्य प्रयोगः च वर्णयति। द्वितीये अध्याये त्रिविधानां प्रेक्षागृहाणां निर्माणविधिः चित्रकर्मनिरूपणम् च। तृतीये अध्याये नाट्याचार्याणां प्राथमिककर्तव्यं देवतार्चनपूजनविधिं च विचार्यते।

चतुर्थे अध्याये' अमृतमन्थन' नाम्नः समवकारस्य 'त्रिपुरदाह' नाम्नश्च डिमस्य प्रयोगः। ताण्डवनृत्तस्य 108 करणानि, 32 अङ्गहाराः, 4 रेचकाः, गीतादिप्रयोगाश्च।

पञ्चमे अध्याये पूर्वरङ्गस्य विविधान्यङ्गानि ।

षष्ठे अध्याये रसनिष्पत्तिं, रसनिरूपणम् च विचार्यते।

सप्तमोऽध्यायेभावो, विभावानुभावव्यभिचारिभावाः, स्थायिभावाः सात्त्विकभावाश्च प्रतिपादयति। असूया, मदः, श्रमः, आलस्यं, दैन्यं, चिन्ता, मोहः, स्मृतिः, घृतिप्रभृतयः त्रयस्त्रिंशत् व्यभिचारिभावाः। स्तम्भः, स्वेदः, रोमाञ्चः, स्वरभङ्गः, वेपथुः, वैवर्ण्य, अश्रुः, प्रलयः, इति सात्विकभावाः।

अभिनयरीतिं वर्णयति अष्टमेऽध्याये। आङ्गिकः, वाचिको, आहार्यः, सात्विकः (मनोव्यापारः) इति चतुरः अभिनयाः।

शरीराङ्गानाम् अभिनयक्रमं वर्णयति नवमेऽध्याये। शिरसः, नयनयोः, भ्रुवोः, नासिकायाः, ओष्ठयोः, कपालयोः च चलनादिकं कथमिति सविस्तरं प्रतिपादयति। उरसः, पार्श्वयोः, उदरस्य, कटिप्रदेशस्य, ऊर्वोः, जङ्घायाः, पादयोः च चलनवैचित्र्यं कियन्मात्रम् आकर्षकं नृत्त-नृत्येषु इति विशदयति दशमेऽध्याये।

एकादशेऽध्याये चारीचलनं विशदयति। एकपादेन क्रियमाणं चलनमेव चारी इत्युच्यते। द्वात्रिंशत् चारिणः।

द्वादशेऽध्याये द्वयोः धर्मिणोः लक्षणं विस्तारयति। लोकधर्मी नाट्यधर्मी इति धर्मो द्विविधः। यदि नाटके पुरुषः स्त्रीकथापात्रं स्वीकरोति, स्त्री पुरुषकथापात्रं स्वीकरोति तर्हि तदेव नाट्यधर्मी। पुरुषः पुरुषस्य, स्त्री स्त्रियाः वेषं स्वीकरोति तर्हि तद् लोकधर्मी।

त्रयोदशेऽध्याये विभिन्नरीत्या वर्तमानानि पादविन्यासानि वर्णयति। नायिकानायकयोः चलनं वेषभूषादयः रङ्गसज्जीकरणमित्यादीनि अस्मिन्नध्याये विशदयति।

चतुर्दशेऽध्याये भाषाप्रयोगरीतिं, प्रवृत्तिं च विशदति। पञ्च प्रवृत्तयः। आवन्ती, दाक्षिणात्या औण्ड्रमागधी, पाञ्चाली, मध्यमा चेति पञ्च प्रवृत्तयः (वृत्तयः)। सर्वाः देशाश्रिताः भवन्ति।

पञ्चदशेऽध्याये नाटकेषु सम्भाषणस्य प्राधान्यं संसूच्य नामाख्यातनिपातोपसर्गान् शब्दप्रकारान् तद्धितसमाससन्धिविभक्तीनाम् आवश्यकतां च प्रदर्श्य पारायणद्वैविध्यं विशदयति । अक्षराणां स्वरूपं वर्णयन् धातून् विशदय्य वृत्तशास्त्रस्थानि सम-अर्धसम-विषमवृत्तानि विशदयति।

छन्दशास्त्रस्य विशदीकरणं षोडशेऽध्याये अप्यस्ति। शरीरशोभायै वस्त्रमालाभरणादीनां उपयोग इव काव्यशोभायै वृत्ततालादीनामावश्यकतास्ति। मालिनी-मालती-उद्धता-विद्युल्लेखादीनि वृत्तानि परामृष्टानि।

नाटकीयशोभावर्धकान् भूषण – अक्षरसंघात – शोभा – उदाहरण – हेतु – संशय - दृष्टान्त-प्राप्ति-अभिप्रायादीन् षट्त्रिंशत् लक्षणानि सप्तदशे अध्याये विशदयति ।

अष्टादशे अध्याये प्राकृतिकभाषायाः विशेषताः वर्णयति। कमल-अमल-रेणुतरङ्ग-लोल-सलिलप्रभृतीनि पदानि संस्कृते प्राकृते च समानानि। ऐ-औ-अनुस्वाराः प्राकृते न सन्ति।

क ग त द य व प्रभृतयः विनष्टाः।

अपान इति पदं अवाणरूपेण उच्चरति। पुरुष (फरुष) मृग (मौ) मृतः (मौ) इत्येवंरूपेण ।

नाटकेषु उन्नतान् समानान् सेवकादीन् च कथं सम्बोधनां करिष्यति इति कार्यम् ऊनविंशतितमे अध्याये विशदयति। उन्नतान् भगवन् इति, ब्राह्मणः स्वभार्या आर्य इति, राजानं महाराज इति, समानान् नामधेयेन इति विविधरीत्या सम्बोधनां कुर्वन्ति ।

दशरूपकाणि विंशतितमे अध्याये विशदयति। नाटकं-प्रकरणं-अङ्कः-व्यायोगः-भाणः-समवकारः-वीथी-प्रहसनं- डिमः-ईहामृगः इति दश रूपकाणि।

पञ्चसन्धीनां मुख-प्रतिमुख-गर्भ-सावमर्श-निर्वहणादीनां सविशदं विवरणं एकविंशतितमे अध्याये वर्तते। सात्वती-कौशिकी-भारती-आरभटीवृत्तीनां विशदीकरणमेव द्वाविंशतितमे अध्याये। नेपथ्यं वेषभूषादीन् च विशदयति त्रयोविंशतितमे अध्याये। चतुर्विधाः वेषभूषाः। पुष्ट-अलङ्कार-अङ्गारार्चनं-सञ्जीवाः वेषभूषाः। अङ्गारार्चनं नाम अवयवेषु वर्णलेपनम्। सञ्जीवः जीवयुक्तेन प्राणिना सह प्रवेशः।

चतुर्विंशेऽध्याये सामान्याभिनयमधिकृत्य विशदयति। वाचकैः अङ्गैः च क्रियमाणमभिनयमेव सामान्याभिनयः। हावभावादयः अत्र प्रधानाः घटकाः। स्त्रीणां भावाविकाराः अलङ्काराः भवन्ति लीला- विलास-विच्छित्ति-विभ्रम-किलकिञ्चित-मोट्टायित-कुट्टमिता-बिब्बोक-ललित-विहता दश। एतेषां सविस्तरा वर्णना अस्मिन्नध्याये सन्ति।

सन्देशवाहकानां स्वभावमहिमां लक्षणादिकं च विशदयति पञ्चविंशतितमेऽध्याये। चित्राभिनयं षट्विंशतितमे अध्याये वर्णयति। सर्वमपि कार्यं, दिनं-रात्रिः-कालाः सूर्यादयः अनेन चित्राभिनयद्वारा चित्रीकर्तुं शक्यते। दैविकी-मानुषी इति सिद्धिद्वयं विशदयति सप्तविंशतितमे अध्याये। वाङ्मयी शारीरी इत्यादयः सत्वाभिनये अन्तर्भवन्ति।

रसनिरूपणवत्प्राधान्यमर्हति नाट्यशास्त्रे सङ्गीतशास्त्रस्य विशदीकरणम्। सङ्गीतोपकरणानां, सङ्गीतस्य सप्तस्वरान् अधिकृत्य विस्तृतं विवरणम् अष्टविंशतितमे अध्याये सूचयति। सङ्गीतोपकरणानि त्रिधा तत-अवनद्ध-घनभेदात्। स्वरसम्बन्धानि अनेकानि स्वरस्थानानि अस्मिन्नध्याये विवृणोति । स्वर-ग्राम- मूर्च्छन-ताना-स्थान-वृत्ति-साधारण इत्यादीनि सन्ति। तालक्रमाः अपि अनेकप्रकाराः। आवाप-निष्क्रम-विक्षेप-प्रवेशक-शाम्या-ताल-सन्निपात-परिवर्त-वस्तु-मात्रा-विदारी-अङ्ग-लय-यति-प्रकरण-गीति-अवयव-मार्ग -पादभाग- पाणि इति विंशतिः तालक्रमाः।

सप्तस्वराः भवन्ति षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादाः। अत्र द्वाविंशतिः श्रुतयः तथा द्विशतसहस्राः स्वरभेदाः। तेषाम् आधुनिकग्रीक्सङ्गीतेन साकं निकटतमः बन्धः वर्तते।

अनेके प्रबन्धाः नाट्यशास्त्रस्य विषये सञ्जाताः। इदानीमपि जायन्ते। पौरस्त्यपाश्चात्यभेदं विना गवेषकानाम् अक्षयनिधिः भवति नाट्यशास्त्रम्। सङ्गीतविषये मौरिस् विन्टर्निट्स् अभिप्रैति यत् पाश्चात्यदेशे सङ्गीतशास्त्रस्य वर्धनायाः हेतुः भरतस्य नाट्यशास्त्रमेवेति। तत्र प्रबन्धात् उद्धृतः सप्तस्वरसम्बन्धः भागः नितराम् आकर्षकः।

Musical scale in *Natya Shastra*[98][99]

| Svara (Long) | Sadja (षड्ज) | Rsabha (ऋषभ) | Gandhara (गान्धार) | Madhyama (मध्यम) | Pañcama (पञ्चम) | Dhaivata (धैवत) | Nisada (निषाद) | Sadja (षड्ज) |
|---|---|---|---|---|---|---|---|---|
| Svara (Short) | Sa (सा) | Ri (री) | Ga (ग) | Ma (म) | Pa (प) | Dha (ध) | Ni (नि) | Sa (सा) |
| (shadja-graama) | | | | | | | | |
| Varieties | C | D♭, D | E♭, E | F, F♯ | G | A♭, A | B♭, B | CC |

सप्तस्वराणां षड्ज-ऋषभादीनां रसादिषु सन्निवेशः कथमिति ऊनत्रिंशत्तमे अध्याये विशदयति। षड्ज-ऋषभ-स्वरौ वीररसपोषणौ, निषाद-गान्धारौ शान्तरसं, धैवतस्वरः अद्भुतरसं, मध्यमपञ्चमस्वरौ हास्यरसपोषणौ च भवन्ति।

सङ्गीतोपकरणेषु सुषिरवाद्यस्य (वेणोः) विशदीकरणं वर्तते। वेणुवादनसमये अङ्गुलीनां चलनेन संजाताः विशेषताः अस्मिन् त्रिंशत्तमे अध्याये विशदयति। वेणोः बहिर्गताः सप्तस्वराः नितान्तं मधुराः रसोद्दीपकाश्च। एवमेव वीणायाम् उद्भवाः स्वराः। प्रायेण अयमध्यायः ह्रस्वः।

ताललयादीनधिकृत्य एकत्रिंशत्तमे अध्याये विशदयति। तालादीनां समयक्रमः (निमेष-मात्राक्रमः) वर्तते। लयः तु त्रिधा विभक्तः। द्रुत-मध्यम-विलम्बितभेदात्। कला अपि त्रिविधा।

वृत्तानां विशदीकरणमेव द्वात्रिंशत्तमे अध्याये। अस्य अध्यायस्यारम्भे ध्रुवगीतानि विशदयति। ध्रुतगीतेषु प्रयुक्तमानानि भवन्ति ह्रीप्रभृतानि वृत्तानि ।

त्रयत्रिंशत्तमे अध्याये मृदङ्ग-पणव-दर्दुतादीनां विशदीकरणमेव। अपि च झल्लरि-पटहाद्युपकरणान्यपि वाद्योपकरणेषु अन्तर्भवन्ति। विपञ्ची-चित्रा-कच्छपी-घोषकप्रभृतीनां वाद्योपकरणानां प्रयोगः कथमिति विशदयति।

नाटकविषये पुनरपि विशदीकरणं वर्तते- नाट्यशास्त्रस्य चतुर्त्रिंशत्तमे अध्याये। कथापात्राणि प्रथमं त्रिधा, उत्तम-मध्यम-अधमभेदात्। जितेन्द्रियः, बुद्धिमान्, कलाकुशलः, करुणावान्, विविधेषु शास्त्रेषु निपुणः, सन्तुष्टचित्तः, क्षमावान् च भवति उत्तमः। जनैः साकं सम्पर्काय निपुणः, कलासु तत्परः,

मधुरवाक्, बुद्धिमान् च भवति मध्यमः। परुषवाक्, दुर्विनीतः, आत्माभिमानरहितः, कलहप्रियः, आक्रमशीलः, परद्रोहे कुतुकी, विवेकशून्यः, स्त्रीलम्पटः, चौर्ये व्यापृतः च अधमः। नायकाः चतुर्विधाः धीरोद्धत-धीरललित-धीरोदात्त- धीरप्रशान्ताः चेति । पुनः कर्मानुसारमपि विभजनमस्ति।

पञ्चत्रिंशत्तमे अध्याये नाटकम् अभिनेतुं योग्यानां जनानां चयनं कथं कर्तव्यमिति विशदयति। कथापात्रस्यानुकूलः भवेत् अभिनेता। अभिनेतुः योग्यता तत्र प्रधानतया परिगणनीया। अभिनेता वयोन्वितः सर्वेणापि प्रकारेण कथापात्रस्य अनुयोग्यः भवेत्।

अन्तिमे अध्याये, षट्त्रिंशत्तमे अध्याये, अत्रेयवसिष्ठप्रभृतयः महर्षयः भरतमुनिना सह वर्तमानेन संवादेन आरभते। देवलोके प्रचरितं नाट्यवेदं भूमौ आगतस्य कारणं भरतः विशदयति। नाट्यशास्त्रस्य भूमौ अवतरणं प्रतिपादयति ।

प्रायेण सर्वासु भाषासु नाट्यशास्त्रस्य स्वाधीनता दृश्यते। चलच्चित्रादिषु श्रृङ्गारादीनां नवरसानां भावाभिनयं द्रष्टुं शक्यते। आधुनिकनाटकरचनासु रङ्गमण्डपस्य निर्माणे च भरतोक्तनियमान् इदानीमपि प्रचारे सन्ति। नाटकादिषु प्रयुक्ताः भाषाः, रसाः, वृत्तयः, अभिनयरीतयः भरतमुनिना सूचितेन मार्गेणैव अधुनापि प्रचलन्ति। नायक-नायिकाभेदाः सात्विक-वाचिक-आङ्ग्य-आहार्याभिनयभेदाः, रसपोषणीः वृत्तयः रीतयः च सर्वान् मानवान् आनन्दसागरे निमज्जन्ति। छन्दशास्त्र-अलङ्कारसम्बन्धाः रचनाः कालान्तरे वर्तमानेभ्यः आचार्येभ्यः मार्गदर्शकान्यभूवन्। रस-अलङ्कार-ध्वनि-गुण-रीति-वक्रोक्ति-अनुमान-औचित्यवादिनः सर्वे आलङ्कारिकाः तत्तन्मतस्थापनाय नाट्यशास्त्रमेव परिगणयन्ति । अतः नाट्यशास्त्रं पञ्चमो वेदः इत्युक्तिः सत्यमेव खलु।

### 1.1.2. भामहः

काव्यस्यात्मा कः? इति विषये इदानीमपि चर्चा प्रचलति विद्वत्सभायाम्। विभावानुभावसञ्चारीव्यभिचारिभावात् रसोत्पत्तिः इति नाट्याचार्यः भरतमुनिः। भरतकालादारभ्य आनन्दवर्धन-अभिनवगुप्तप्रभृतयः आलङ्कारिकाः रसवादमङ्गीकुर्वन्ति।

किन्तु काव्यात्मा अलङ्कारः इति भामहप्रभृतयः। ऋग्वेदकालादारभ्य भाषामलङ्कर्तुम् अलङ्कारान् प्रयुज्यन्ते पण्डितवरेण्याः। काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते इति, हारादिवदलङ्काराः इत्यादयः वादाः प्रचलन्ति। वेदकालादारभ्य भङ्गीभणितिः काव्येषु सन्त्यपि साहित्यशाखासु काचन शाखारूपेण अलङ्कारस्य प्रसक्तिः भामहकालादेव गणयन्ति गवेषकाः।

काश्मीरदेशस्थः कश्चन प्रशस्तः वैयाकरणः, काव्यशास्त्रनिपुणः चासीत् भामहः। यद्यपि दण्डिनः समकालिकत्वं केचन गवेषकाः वदन्त्यपि सोऽयं महात्मा दण्डिनः पुरोवर्ती क्रिस्तोः सप्तमे शतके जीवितमधारयन्। दण्डि-वामन-उद्भट-रुद्रटादयः अलङ्कारस्य प्राधान्यमङ्गीकृत्य तदुपजीव्य साहित्यमण्डलं जाज्ललयामासुः।

भामहस्य आलङ्कारिकं ग्रन्थतल्लजं भवति काव्यालङ्कारम्। सोऽयं वररुचेः 'प्राकृतप्रका' इति प्राकृतव्याकरणस्य व्याख्यां रचितवान्।
काव्यालङ्कारे नवनवत्यधिकत्रिशतश्लोकाः (३९९) सन्ति। षड् परिच्छेदाः (अध्यायाः) सन्ति।

प्रथमे परिच्छेदे ऊनसप्ततिः श्लोकाः। अस्मिन् काव्यलक्षणं, कवेः गुणान्, वैदर्भी-गौडीवृत्तीः च विशदयति। भाषाशुद्ध्यै नितरां प्राधान्यं देयमिति भामहः।

द्वितीये परिच्छेदे काव्यगुणान् विशदयति। अस्य मते त्रयः गुणाः। प्रसादः, माधुर्यम्, ओजः चेति। तृतीये परिच्छेदे अलङ्कारान् विशदयति। तेन महात्मना अष्टत्रिंशत् (३८) अलङ्काराणां नामान्युक्त्वा लक्षणानि संसूच्य विशदीकरणं दत्तम्। ध्वनिं रसं औचित्यं वक्रोक्तिं गुणान् रीतिं वा भामहः न त्यजति। ते सर्वे अलङ्कारेषु अन्तर्भवन्ति इति तस्याशयः। रसवत्, विशेषोक्तिः, व्याजस्तुतिः, इत्यादिषु रससान्निध्यं स अङ्गीचकार। श्लेष-समासोक्ति इत्यादिषु ध्वनेरन्तर्भावम् अवर्तत। अतिशयोक्त्यलङ्कारे वक्रोक्तिरन्तर्भवति। वक्रोक्तेरभावादेव हेतु-सूक्ष्म-लेशेष्वलङ्कारेषु अलङ्कारत्वं नेति अयमाचार्यः।

चतुर्थे परिच्छेदे काव्यदोषानधिकृत्य विशदयति। नेयार्थं, क्लिष्टम्, अन्यार्थं, श्रुतिकष्टं, अर्थदुष्टं असंभवम् इत्यादि एकादश दोषाणाम् उदाहरणैः सह विस्तृतं विशदीकरणं दत्तमस्ति। एतेषु दश दोषाणां विशदीकरणेन ज्ञातुं शक्यते यत् सोऽयं महात्मा सर्वत्र औचित्यदीक्षायां नितरां श्रद्धालुरासीदिति ।

पञ्चमे परिच्छेदे एकादशदोषाणां विशदीकरणमेव। उपमादोषाणां विशदीकरणसमये आचार्यः औचित्यदीक्षां स्वीकरोति। अन्त लिङ्गभेदः वचोभेदः विपर्ययः असदृश्यत इत्यादयः परिगणितव्याः। देश-काल- कला-लोक-न्याय-आगमानां विरुद्धं चित्रीकरोति चेत् सः दोषः भवति। मलयपर्वते वर्तितं चन्दनं विन्ध्यापर्वते अस्तीति वसन्तकाले पुष्पितम् आम्रं वर्षकाले विकसति इति देश-कालविरुद्धप्रस्तावाः अवश्यं दूरीकर्तव्याः। इतिवृत्तस्वीकार्ये कार्यकारणचिन्ता कार्या।

षष्ठे परिच्छेदे व्याकरणशुद्धतां विशदय्य कवितन्त्राणि सूचयति।

काव्यालङ्कारस्य काचन टीका वर्तते। उद्भटविरचितः भामहविवरणः (भामहवृत्तिः) इति तस्य नाम। केचन भागाः एव इदानीं तस्याः टीकायाः अवशिष्यन्ते।

अलङ्कारमेव काव्यस्य सर्वस्वमिति समर्थयन् भामहः आलङ्कारिकाणां मध्ये देदीप्यते।

## पुनरावृत्तिः (Recap)

- भरतमुनेः नाट्यशास्त्रं नाट्यकाव्यसम्बन्धी कश्चन विश्वविज्ञानकोशः भवति । अस्मिन् त्रिंशदध्यायाः सन्ति।
- नाट्योत्पत्ति - रसनिरूपणः – रङ्गविधानं – वृत्तयः – विविधाभाषारीतयः – पञ्चसन्धिविषयः - सङ्गीतशास्त्रं - रसनिरूपणमित्यादयः अस्मिन् ग्रन्थे सविस्तरं प्रतिपादयति।
- यूरोपिय-जर्मन्-आङ्गलदेशेष्वपि अस्य ग्रन्थस्य प्रचुरप्रचारः वर्तते।
- विदेशीयाः नाट्यशास्त्रानुसारमेव रङ्गमण्डपम् उत्पाद्य नाटकानि अभिनयन्ति इति श्रूयते।
- रस-ध्वनि-अलङ्कार-गुण-रीतिवादिनः सर्वे आलङ्कारिकाचार्याः आधिकारिकग्रन्थत्वेन अमुं नाट्यशास्त्रमेव आश्रयन्ते।
- भामहस्य आलङ्कारिकं ग्रन्थतल्लजं भवति काव्यालङ्कारम्।
- काव्यालङ्कारे नवनवत्यधिकत्रिशत् श्लोकाः (३९९) सन्ति। षड् परिच्छेदाः (अध्यायाः) सन्ति।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. रससिद्धान्तस्य अवश्यघटकेषु अन्यतमः भवति ................।
2. नाट्यशास्त्रे कति अध्यायाः सन्ति?

3. अलङ्कारप्रस्थानस्य प्रचारकः कः?
4. काव्यादर्शे कति अध्यायाः सन्ति ?
5. काव्यादर्शस्य कर्ता कः?
6. चतुर्विधाभिनयाः के ?
7. अयं पञ्चमो वेदः – कः? तस्य कर्ता कः?

## एकैकया खण्डिकया उत्तराणि लिखत।
**(Answer the following questions in a paragraph)**

1. भरतमुनिः।
2. वीररसपोषणौ सङ्गीतरसौ कौ ?

## निर्दिष्टाभ्यासः (Assignment)

1. अलङ्कारशास्त्रे भामहस्य स्थानं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. भावः
2. षट्त्रिंशत्
3. भामहः
4. अष्टादश
5. दण्डी
6. आङ्गिकः, वाचिकः, आहार्यः, सात्विकः(मनोव्यापारः)
7. नाट्यशास्त्रम्। भरतमुनिः।

## सूचनाग्रन्थाः(References)


1. भरतमुनिः, नाट्यशास्त्रम्, आङ्गलेयविवर्तनं, व्याख्या च मुन्षि रां मनोहर् लालू प्रसिद्धीकरणम्, २०१६
2. भामहः, काव्यालङ्कारः, मोटिलाल् बनारसिदास्, १९७०
3. डो. के. सुकुमारपिल्ला, काव्यमीमांसा, केरल भाषा इन्स्टिट्यूट्ट्, तिरुवनन्तपुरम् ।

# Unit -2
# दण्डिनः वामनस्य च साहित्यसिद्धान्तानां परिचयः।

## उद्देश्यानि (Learning Outcomes)

- काव्यशास्त्रेऽवगाहः।
- संस्कृतसाहित्यसिद्धान्तानां परिचयः।
- काव्यलक्षणविषये आलङ्कारिकमतानां भेदावगमनम्।
- काव्यरूपेषु रीतिसिद्धान्तानां प्रयोगपरिज्ञानम्।
- काव्यविभागपरिज्ञानम्।
- दण्डीकृतीनां माहात्म्यम् ।
- रीतिसम्प्रदायस्य महत्वज्ञानम्।

## प्राग्व्यपेक्षाः (Pre requisites)

महाकविना दण्डिना विरचितः 'काव्यादर्शः' अलङ्कारशास्त्रे प्रवेष्टुम् इच्छूनां छात्राणाम् अध्यापकानां च अतीवोपकारकः भवति। सरसमधुरया शैल्या रचितमिदमलङ्कारशास्त्रं शास्त्रमण्डले प्रचुरप्रचारं भवति। द्वादशाधिकाः टीकाः अस्य ग्रन्थस्य संजाताः। आधुनिकसमये अस्य ग्रन्थस्य हिन्द्यां आङ्गलेय्यां तिबत्तीभाषायामपि चानुवादाः संजाताः।

आलङ्कारिकेषु प्रसिद्धः कश्चनाचार्यः आसीत् वामनः। काश्मीरदेशस्थः सः नवमे शतके स्वकाव्यजीवितम् अनयत्। काव्यस्यात्मा रीतिः इति सः समर्थयति । यद्यपि तस्यानेके अनुयायिनः न सन्ति, तथापि रीतिम् इतरे आलङ्कारिकाः अङ्गीकुर्वन्ति। केचन ध्वनौ रीतिः अन्तर्भविष्यन्तीति वदन्ति। इतरे केचन रसे इति। गुणे रीतिरन्तर्भवतीति दण्डी।

## मुख्यपदानि (Key terms)

दण्डी, दण्डिनः कृतयः-दशकुमारचरितम्, अवन्तिसुन्दरीकथा। वामनः काव्यालङ्कारसूत्रवृत्तिः ।

## Discussion
### 1.2.1 दण्डी

कौशिकगोत्रे संजातः कश्चन ब्राह्मणः आसीत् दण्डी। दण्डी इति नाम यथार्थं वा नवेति संशयः इदानीमप्यवशिष्यते। दशकुमारचरितस्य मङ्गलाचरणे ब्रह्माण्डच्छत्रदण्डः शतधृतिभावनाम्नोरुहो नालदण्डः इति श्लोके पुनः पुनरपि दण्डशब्दस्य प्रयोगेन दण्डी इति नाम प्राचलत् इति कांश्चन कथां श्रूयते। अवन्तिसुन्दरीकथायां काचन सूचना वर्तते यत् विदुषः नारायणस्वामिनः पुत्रः आसीत् भारविः (किरातार्जुनीयस्य कर्ता) इति। तस्य पुत्रत्रये मध्यमः पुत्रः आसीत् मनोरथः। मनोरथस्य चतुर्षु पुत्रेषु कनिष्ठः आसीत् वीरदत्तः। अयं वीरदत्तः भवति दण्डिनः पिता। दण्डिनः माता गौरी। सोऽयं कविसार्वभौमः दण्डी सप्तमे शतके जीवितं निनाय इति।

दण्डिनः पाण्डित्यविषये विख्यातं श्लोकद्वयं वर्तते।

जाते जगति वाल्मीकिः कविरित्यभिधाभवत्।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ।। इति ।

अपि च-

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ।।

**<u>दण्डिनः कृतयः</u>**

काव्यादर्शः अवन्तिसुन्दरीकथा दशकुमारचरितम् इति त्रयं ग्रन्थतल्लजं दण्डिना रचितम्। छन्दोविचित्यां सकलस्तत्प्रपञ्चः प्रदर्शितः इत्युक्त्वात् केचन विद्वांसः छन्दोविचितिः नामकः वृत्तशास्त्रग्रन्थः दण्डिनः इति मन्यन्ते। एवं तस्याः कलापरिच्छेदे रूपमाविर्भविष्यति इत्युल्लेखात् कलापरिच्छेदः इत्ययमपि ग्रन्थः दण्डिनः इति मन्यन्ते। किन्तु पर्याप्तस्य प्रमाणस्याभावात् एतदुभयग्रन्थमपि दण्डिनः इति वक्तुं न शक्यते। राजशेखरेण सूचितं भवति यत्

त्रयोऽग्नयस्त्रयो वेदास्त्रयो गुणाः।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः इति।

अतः पूर्वोक्ताः त्रयः ग्रन्थाः दण्डिनः भवन्ति इति निश्चप्रचम्।

आचार्यः दण्डी काव्ये गुणानामौत्कृष्ट्यं कल्पयति । को नाम गुणः? भावगतः अथवा रसगतः विशेषता भवति गुणः इति भरताचार्यः। दण्डिनः मते वैदर्भमार्गस्य प्राणस्वरूपाः गुणाः। काव्यशोभाकराः धर्माः गुणाः इति वामनः। काव्यधर्माः गुणाः इति आनन्दवर्धनः। अङ्गिनः रसस्य अङ्गाः गुणाः।

काव्यादर्शे त्रयः परिच्छेदाः (अध्यायाः) सन्ति। प्रथमे परिच्छेदे काव्यलक्षणं काव्यगुणान् च विशदयति। काव्यशरीरं नाम तावदिष्टार्थव्यवच्छिन्ना पदावली इति, सर्गबन्धो महाकाव्यमुच्यते इति महाकाव्यलक्षणमारभते। महाकाव्ये वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि इत्यनेन नायकप्रतिनायकयोः स्वभाववर्णना कार्या। कथाख्यायिकयोरेकजातित्वमेव। वाङ्मयं चतुर्विधम्। महाकाव्यखण्डकाव्यादिकं संस्कृतभाषायां, सेतुबन्धादिः प्राकृतभाषायां, कर्णपराक्रमादिकाव्यम् अपभ्रंशभाषायां, नाटकादि तु नानाभाषायामेव (संस्कृतप्राकृतापभ्रंशमिश्रभेदात्) वर्तितव्यम् इत्यादिकं विशदय्य वैदर्भमार्गस्य दशगुणान् विस्तारयति। श्लेषः-प्रसाद-समता-माधुर्य-सुकुमारता-अर्थव्यक्तिः-उदारता-ओजः-कान्ति-समाधयः दशगुणाः। काव्यादर्शस्य द्वितीते परिच्छेदे प्राचीनाचार्यैः सूचितान् स्वभावोक्ति-उपमा-रूपक-दीपकादीन् पञ्चत्रिंशत् (३५) अर्थालङ्कारान् विशदयति। तेषु उपमालङ्कारस्य सामान्यलक्षणमेवं भवति ।

'यथाकथञ्चित् सादृश्यं यत्रोद्भूतं प्रतीयते।
उपमा नाम सा तस्याः प्रपञ्चोऽयं प्रदर्श्यते' इति।

'येन केनचित् गुणक्रियादिरूपेण स्फुटं द्वयोः साम्यं प्रतीयते सा उपमा' इति ।

तृतीये परिच्छेदे शब्दालङ्काराश्च निरूपिताः। यमकः यमकभेदाः च बहवः। पुनः स्वर-स्थान-वर्णनियमाः निरूपिताः। अन्ते काव्यदोषान् सविस्तरं प्रतिपादयति। अपार्थ-व्यर्थ-एकार्थ-संशय-वृत्तभङ्गादिदोषाः। दोषाः त्याज्याः। उक्तञ्च-

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्। इति।

**1. दशकुमारचरितम्**

दशकुमारचरितं हि दण्डिनः प्रथितं गद्यकाव्यम्। अस्य पूर्वपीठिका, दशकुमारचरितं, उत्तरपीठिका चेति त्रयो भागाः। दशानां कुमाराणाम् अतिपौरुषपराक्रमवर्णनमेवास्य प्रतिपाद्यविषयः। मगधदेशकुमारस्य राजवाहनस्य तन्मित्राणां नवानां देशविदेशसञ्चारानुभवानां वर्णनमत्र दृश्यते। यथार्थतः दण्डी न केवलं काव्यशास्त्रज्ञः किन्तु कविः विद्वान् च। तस्य कल्पना उदात्ता। तस्य पदानि प्रसादमधुराणि ललितललितानि भावगर्भितानि च। श्रूयते च 'दण्डिनः पदलालित्यम्' इति। दशकुमारचरिते नानाविधाः रोमाञ्चजनकाः घटनाः सन्ति। अस्य मुख्यः रसः वीर एव । दशकुमारस्यापि अनेके टीकाः सन्ति।

पूर्वपीठिकायाः टीका भवति पददीपिका। सा अतिप्राचीना। टीकासु नवीना भवति (पूर्वपीठिकायाः) शेषराजशर्मणः चन्द्रकला। मध्यभागस्य 'पदचन्द्रिका' नाम टीका कवीन्द्राचार्यसरस्वती कृता। उत्तरपीठिकायाः अपि काचन टीका अस्ति।

**2. अवन्तिसुन्दरीकथा**

अवन्तिसुन्दरीकथा दण्डिनः अपरा कृतिः। तस्मिन् ग्रन्थे दण्डिना ओजः समासभूयस्त्वं गद्यस्य जीवितमस्ति इति यदुक्तं तद् चरितार्थं जनयितुं पर्याप्तं रचनाकौशलं वरीवर्ति। काव्यमण्डले आलङ्कारिकमण्डले च युगपत् प्रशोभमानः भवति कविर्दण्डी।

**1.2.2 वामनः - काव्यालङ्कारसूत्रवृत्तिः**

आलङ्कारिकेषु प्रसिद्धः कश्चनाचार्यः आसीत् वामनः। काश्मीरदेशस्थः सः नवमे शतके स्वकाव्यजीवितम् अनयत्। काव्यस्यात्मा रीतिः इति सः समर्थयति । यद्यपि तस्यानेके अनुयायिनः न सन्ति, तथापि रीतिम् इतरे आलङ्कारिकाः अङ्गीकुर्वन्ति। केचन ध्वनौ रीतिः अन्तर्भविष्यतीति वदन्ति। इतरे केचन रसे इति। गुणे रीतिरन्तर्भवतीति दण्डी।

गुणरीत्योः कः बन्धः ? कः भेदः ?

भगवतः विशेषताः गुणाः इति भरतमुनिः। वैदर्भमार्गस्य प्राणाः गुणाः इति दण्डी। गुणविषयं शास्त्रियं लक्षणमेव आचार्येण वामनेन कृतम्। काव्यशोभायाः कर्तारो धर्माः गुणाः। (तृतीयेऽधिकरणे

प्रथमाध्याये प्रथमं सूत्रम् ३-१-१)। गुणविशिष्टा पदरचना रीतिः(१-२-७)। दण्डी तु काव्यशोभाकरान् धर्मान् अलङ्कारः इति वदति। अलङ्काराभावेऽपि काव्यशोभा जायते। तत्कारणादेव वामनः गुणेभ्यः तत्स्थानमर्पयति। एवं काव्यात्मा रीतिरेवेति वामनः समर्थयति। वामनः गुणान् रीतेः धर्माः काव्यशोभाकरान् च कल्पयति।

सूत्ररूपेण काव्यतत्त्वानि विशदयतः तस्य ग्रन्थे पञ्च अधिकरणाः, तेषु अधिकरणेषु द्वादश अध्यायाः च अन्तर्भवन्ति। प्रथमेऽधिकरणे त्रयः अध्यायाः। प्रथमेऽधिकरणस्थे प्रथमे अध्याये पञ्च सूत्राणि सन्ति। अलङ्कारात् काव्यं ग्राह्यम्। सौन्दर्यम् अलङ्कारः भवति । अलङ्काराः उपमादयः गुणादानात् दोषपरिहारात् स्वीकरणीयाः। शास्त्रतः गुणदोषान् विविच्य ज्ञात्वा गुणाः स्वीकर्तव्याः। काव्यस्य प्रीतिहेतुत्वात् दृष्टप्रयोजनं कीर्तिहेतुत्वात् अदृष्टप्रयोजनं च वर्तते। कीर्तिः स्वर्गफलम्।

प्रथमाधिकरणस्य द्वितीये अध्याये अधिकारिणं निरूप्य काव्यस्य प्राणभूतं रीतिमवतरति 'रीतिरात्मा काव्यस्य' इति। रीतिः त्रिधा। वैदर्भी, गौडीया, पाञ्चाली चेति। वैदर्भगौडपाञ्चालदेशेषु दृष्टत्वात् तत्तन्नामधेयम्। समग्रगुणत्वात् वैदर्भी श्रेष्ठा। स्तोकगुणयुक्ते भवतः गौडीयपाञ्चाल्यौ। वैदर्थ्याम् अर्थगुणसम्पत्तिः वर्तते। अस्मिन् अध्याये द्वाविंशतिः सूत्राणि सन्ति।

प्रथमाधिकरणस्य तृतीयेऽध्याये काव्याङ्गानि विद्याः च विशदयति। पदस्यार्थं सम्यक् विचिन्त्य ज्ञात्वा च शुद्धानि पदानि काव्ये प्रयोक्तव्यानि। काव्यशरीरं वैचित्र्यपूर्वकं भवेत्। पदानां विनिवेशने स्थैर्यमावश्यकम्। काव्यरचनायै योग्यः कालः ब्राह्ममुहूर्तमेव। तदानीं चित्तं प्रसन्नत्वं प्राप्नोति। काव्यं गद्यं पद्यम् इति द्विधा। गद्यं त्रिधा। वृत्तगन्धि, चूर्णम्, उत्कलिकाप्रायं चेति। पद्यभागवत् वृत्तगन्धि। अदीर्घसमासानि ललितानि पदानि यस्मिन् तद् चूर्णम्। दीर्घसमासयुक्तानि कठिनानि पदानि यस्मिन् तद् उत्कलिकाप्रायं गद्यम्। प्रबन्धेषु नाटकादिः श्रेयः इत्यादिकमुक्त्वा प्रथममधिकरणं समाप्यते।

द्वितीयेऽधिकरणे प्रथमाध्याये पद-पदार्थदोषान् विशदयति। असाधु-कष्टं-ग्राम्यम्-अप्रतीतम्-अनर्थकं च पददोषाः । व्याकरणविरुद्धम् असाधु। श्रुतिविरसं कष्टम्। लोकमात्रप्रयुक्तं ग्राम्यम्। शास्त्रमात्रप्रयुक्तम् अप्रतीतम्। पूरणार्थकमनर्थकम्।

अन्यार्थ-नेयार्थ-गूदार्थ-अश्लील-क्लिष्टानि पदार्थदोषाः। एषु अनेकार्थस्य कस्यचन पदस्य एकोऽर्थः असभ्यः चेत् तद् अश्लीलम्। गुप्तं, लक्षितं, संवृतं च अश्लीलानि। व्यवहितार्थप्रत्ययं क्लिष्टम्।

द्वितीयाधिकरणे द्वितीयेऽध्याये वाक्य-वाक्यार्थदोषान् निरूपयति। भिन्नवृत्तं-यतिभ्रष्टं-विसन्धि इति त्रयः वाक्यदोषाः। वृत्तदोषात् पृथक् यतिदोषो न वक्तव्यः। व्यर्थम्-एकार्थं-सन्दिग्धम्-अप्रयुक्तम्-अपक्रमं-लोकविरुद्धं- विद्याविरुद्धं च वाक्यार्थदोषाः। पूर्वोत्तरौ परस्परविरुद्धौ चेत् व्यर्थम्।

यथा - 'अद्यापि स्मरति रसालसं मनो मे मुग्धायाः स्मरचतुराणि चेष्टितानि' । अत्र मुग्धा चेत् कथं स्मरचतुराणि चेष्टितानि भवेयुः इत्यतः व्यर्थम्। उक्तार्थं पुनःपुनरप्युच्यते चेत् एकार्थम्। किन्तु 'करिकलभः' इत्यत्र एकार्थदोषो न। प्रौढगजस्य सदृशः इत्यर्थस्वीकारेण न वाक्यार्थदोषः। व्याजादिना कल्पितार्थम् अप्रयुक्तम्।

गुणविवेचननामके तृतीयेऽधिकरणे अध्यायद्वयं वर्तते। प्रथमेऽध्याये प्रथमसूत्रं भवति 'काव्यशोभायाः कर्तारो धर्माः गुणाः' इति। काव्यशोभायाः अतिशयहेतवः अलङ्काराः। गुणाः नित्याः। शब्दगुणाः दश। ओजप्रसादादयः। गाढबन्धत्वम् ओजः। बन्धस्य शिथिलत्वं प्रसादः। ओजसा सह मेलनात् प्रसादः गुणः। बहून्यपि पदानि एकवद्भासन्ते चेत् श्लेषः। ओजःप्रसादयोः क्वचिद्भागे तीव्रावस्थायाम् आरोहावरोहं समाधिगुणः वर्तते। बन्धस्य पृथक्पदत्वं माधुर्यम्।

तृतीयाधिकरणस्य द्वितीयाध्याये ओजःप्रभृतीन् अर्थगुणान् विशदयति। अर्थस्य प्रौढिरोजः। अर्थदृष्टिः समाधिः। उक्तिवैचित्र्यं माधुर्यम्।

चतुर्थाधिकरणस्य नाम आलङ्कारिकम्। अस्मिन् अध्यायत्रयं वर्तते। प्रथमेऽध्याये शब्दालङ्कारौ यमकानुप्रासौ वर्ण्यते। भिन्नार्थकम् एकमनेकं वा पदम्, एकमनेकं वा अक्षरं आवृत्तं चेत् यमकम्। वर्णविच्छेदे उत्कर्षः जायते। वर्णविच्छेदे यमकं त्रिधा। शृङ्खला, परिवर्तं, चूर्णम् इति भेदात्। स्वरव्यञ्जनसमूहस्य आवर्तनम् अनुप्रासः। ये पादयमकस्य भेदाः ते पादानुप्रासस्यापि स्युः।

चतुर्थाधिकरणस्य द्वितीयेऽध्याये अर्थालङ्कारेषु प्रमुखाम् उपमां विस्तारयति। उपमानोपमेयस्य गुणलेशतः साम्यम् उपमा इति। स्तुतौ निन्दायां तत्त्वाख्याने चास्याः प्रयोगः। हीनत्व-अधिकत्व-लिङ्ग-वचनभेद-असादृश्याः उपमादोषाः भवन्ति।

चतुर्थाधिकरणस्य तृतीयेऽध्याये उपमाप्रपञ्चं विस्तारयति। 'प्रतिवस्तुप्रभृतिरुपमाप्रपञ्चः' इति। अलङ्काराणां मिथः भेदं सूचयति। उपमानोपमेयस्य गुणसाम्यात् तत्त्वारोपो रूपकम्। उपमानोपमेयस्य

गुणक्रियाशब्दरूपेषु धर्मेषु तत्त्वारोपः श्लेषः। उपमानोपमेयसंशयः सन्देहः। उपमेयोपमानानां क्रमसम्बन्धः क्रमः। उक्तसिद्ध्यै वस्तुनो अर्थान्तरस्यैव न्यसनम् अर्थान्तरन्यासः। उपमानस्य प्रतिषेधः आक्षेपः। विशिष्टानाम् अलङ्काराणां मिश्रत्वं संसृष्टिः। संसृष्टेः उपमारूपकम्, उत्प्रेक्षावयवः इति द्वौ भेदौ।

शब्दशुद्धिसूचकं प्रायोगिकं नाम पञ्चमाधिकरणे अध्यायद्वयं वर्तते। प्रायेण नैकं पदं द्विः प्रयोज्यम् इति। बहुव्रीहीप्रतिपत्तिकरः कर्मधारयः न प्रयोक्तव्यः। सम्बन्धसमये अपि क्वचित् षष्ठी इत्यादयः सूचिताः।

पञ्चमाधिकरणे द्वितीयेऽध्याये शब्दशुद्धिं विवृणोति। रुद्रौ इत्यत्र रुद्रश्च रुद्राणी च रुद्रौ इत्येकशेषः कथमिति संशयः। मार्गान्तां देहभारः इत्यत्र मार्गन्ताम् इत्यात्मनेपदं कथम्? मुख्यार्थे एव। तिरस्कृतशब्दस्य प्रयोगः कार्यः। धान्यषष्ठः इत्यादिषु षष्ठीसमासप्रतिषेधः न, पूरणार्थे तद्धितप्रत्ययस्य (अनः) योगात्। तृणकाष्ठम् इत्येवं वक्तव्यम्, न तु काष्ठतृणम्। आस इति रूपम् आसतेः एव । अनुचरी इति रूपं टित् वर्तमानत्वात् साधु भवति। चरेष्टः इति सूत्रेण टः। धरः महीधरः गङ्गाधरः इत्यादयः साधवः। निपातनात् शोभा इति पदं साधु। इतो मनुष्यजातेः इति ङीषि मदिराक्षी इति रूपम्। शाश्वते प्रतिषेधः इति ठञ्प्रतिषेधात् शाश्वतमिति रूपम्। व्रीह्यादिषु धन्वशब्दस्य ग्रहणात् धन्वी इति इन्प्रत्ययः।

शरीष मदिराक्षी इति रूपम्। शाश्वतं प्रतिषेधः इति ठप्रतिषेधात् कौशिलः वासिलः इत्यादयः साधूनि पदानि भवन्ति। शोभनाः दन्ताः यस्याः सा सुदती इत्यत्र दतृ इत्यादेशे स्त्रीत्वात् ङीषि सुदती। एतत्पदं साधु भवति। किन्तु श्लिष्टप्रियः, विश्लिष्टकान्तः इत्यादयः पुंवद्भावप्रतिषेधात् नेष्टाः। पीङ् पाने इति धातोः ल्यपि निष्पन्नं रूपं प्रपाय इति भवति, न तु प्रपीय इति । एवं वेत्स्यसीति पदं न सिद्ध्यति। वेत्सि, असि इत्येवं साधु। 'असि' निपातः। क्वचित् वाक्यालङ्कारे प्रयुज्यते। निद्रानाशी इत्यर्थे निद्राद्रुक् इति प्रयोगः असाधुः। निद्राध्रुक् इति भवितव्यम्। केचन अपभ्रंशमिति मत्वा निद्राष्द्रुक् इति प्रयुज्यते। एवम् इन्द्रवाहनम् इत्यत्र णत्वं न सिद्ध्यति।

काव्यशास्त्रमण्डले वामनः ध्रुवनक्षत्रमिव प्रशोभते।

## पुनरावृत्तिः (Recap)

- दशकुमारचरितं दण्डिनः प्रथितं गद्यकाव्यम्। अस्य पूर्वपीठिका, दशकुमारचरितम्, उत्तरपीठिका इति त्रयो भागाः सन्ति। राजवाहनादीनां दशानां कुमाराणाम् अतिपौरुषपराक्रमवर्णनमेवास्य प्रतिपाद्यविषयः। मगधदेशकुमारस्य राजवाहनस्य तन्मित्राणां नवानां देशविदेशसञ्चारानुभवानां वर्णनमत्र दृश्यते।
- काव्यस्यात्मा रीतिः इति वामनाचार्यः।
- काव्यालङ्कारसूत्रवृत्तिः इत्ययं ग्रन्थः तेन सूत्ररूपेण रचितम्।
- रीतिः त्रिधा। वैदर्भी, गौडीया, पाञ्चाली चेति।
- समग्रगुणत्वात् वैदर्भी श्रेष्ठा। स्तोकगुणयुक्ते भवतः गौडीयापाञ्चाल्यौ। वैदर्थ्याम् अर्थगुणसम्पत्तिः वर्तते।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. उपमानोपमेयस्य गुणलेशतः साम्यम् उपमा - कस्येदं लक्षणम् ?
2. काव्यस्यात्मा रीतिः - कस्येदं मतम् ?
3. त्रयो दण्डिप्रबन्धाः – के ?
4. वामनस्य जीवितकालः कः?
5. काव्यालङ्कारसूत्रवृत्तौ कति अध्यायाः सन्ति?

## एकैकया खण्डिकया उत्तराणि लिखत।
(Answer the following questions in a paragraph)

1. रुद्रौ, मार्गन्ताम् इत्येतयोः साधुत्वं परिशोधयत ।
2. वामनमते गद्यभेदान् अधिकृत्य एकां लघुखण्डिकां लिखत ।
3. दशकुमारचरितम् ।
4. रीतिरात्मा काव्यस्य।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. वामनस्य।
2. वामनस्य।

3. काव्यादर्शः, अवन्तिसुन्दरीकथा, दशकुमारचरितम्।
4. नवमे शतके।
5. द्वादश अध्यायाः(पञ्च अधिकरणेषु द्वादश आध्याया)

## सूचनाग्रन्थाः (References)


1. दण्डी, काव्यादर्शः, व्याख्याकारः आचार्य श्रीरामचन्द्रमिश्रः, चौखम्बा विद्याभवन्, वाराणसी, १९९८
2. दण्डी, काव्यादर्शः, व्याख्या श्रीरामचन्द्रमिश्रः, चौखम्बा विद्याभवन्, वाराणसी १९९८
3. वामनः, काव्यालङ्कारसूत्रवृत्तिः, व्याख्या- केदारनाथशर्मा, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१८
4. डो. के. सुकुमारपिल्ला, काव्यमीमांसा, केरल भाषा इन्स्टिट्यूट्ट्, तिरुवनन्तपुरम् ।

# Unit - 3
# आनन्दवर्धनस्य कुन्तकस्य क्षेमेन्द्रस्य च साहित्यसिद्धान्तपरिचयः।

## उद्देश्यानि (Learning Outcomes)

- काव्यशास्त्रेऽवगाहः।
- संस्कृतसाहित्यसिद्धान्तानां परिचयः।
- काव्यलक्षणविषये आलङ्कारिकमतानां भेदावगमनम्।
- काव्यरूपेषु ध्वनिसिद्धान्तानां प्रयोगपरिज्ञानम्।
- काव्यविभागपरिज्ञानम्।
- वक्रोक्तिं परिचाययति।
- औचित्यसम्प्रदायस्य महत्वज्ञानम्।

## प्राग्व्यपेक्षाः (Pre requisites)

'काव्यस्यात्मा ध्वनिः' इति आनन्दवर्धनः। रससिद्धान्तवत् न केवलं भारते किन्तु समस्तेऽस्मिन् प्रपञ्चे विख्यातं बभूव आनन्दवर्धनस्य ध्वनिसिद्धान्तः। आनन्दवर्धनः क्रिस्तुवर्षे नवमे शतके (८२० - ८९०) जीवितमदाधरयत्। अभिनवगुप्तः (९५० - १०१६) ध्वन्यालोकस्य व्याख्यानं रचितवान्। 'लोचनम्' इति नाम। पि.वि. काने महाशयः एवं सूचयति यत् अलङ्कारशास्त्रे आनन्दवर्धनस्य ध्वन्यालोकः उन्नतं स्थानं वहति। व्याकरणशास्त्रे पाणिनेः अष्टाध्यायी इव वेदान्ते शङ्कराचार्यस्य वेदान्तभाष्यमिव प्राधान्यमर्हति ध्वन्यालोकः।

काव्यस्य आत्मा कः इत्यस्मिन् विषये आलङ्कारिकेषु विविधाः संवादाः प्रचलन्ति। रसमिति भरतमुनि- जगन्नाथ-अभिनवगुप्तादयः। रीतिरिति वामनः। अलङ्कारमेवेति भामह-मम्मट-रुद्रट-उद्भटप्रभृतयः। ध्वनिरिति आनन्दवर्धनप्रभृतयः। गुणः इति दण्डी। अनुमितिरिति भट्टनायकः। वक्रोक्तिरिति कुन्तकः। सर्वेऽपि रस- अलङ्कार-रीति-गुणादयः औचित्ये अन्तर्भवन्तीति क्षेमेन्द्रः।

कुन्तकः क्रिस्त्वब्धे दशमे शतके लब्धजन्माभूत्। वक्रोक्तिः काव्यजीवितमिति कुन्तकमतम्। कुन्तकस्तु काव्यलक्षणमेवं सूचयति –

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ।।

वक्रता काव्ये अवश्यं वर्तितव्यमिति। वक्रतायुक्तं रचनावैचित्र्यचमत्कारकारि काव्यम्। सः चतुभिरुन्मेषैः (अध्यायः) स्वमतं स्थापयति।

## मुख्यपदानि (Key terms)

ध्वन्यालोकः, वक्रोक्तिरिति कुन्तकः, कविकण्ठाभरणम्, सुवृत्तितिलकम्, औचित्यविचारचर्चा।

## Discussion


### 1.3.1 आनन्दवर्धनः

'काव्यस्यात्मा ध्वनिः' इति आनन्दवर्धनः। रससिद्धान्तवत् न केवलं भारते किन्तु समस्तेऽस्मिन् प्रपञ्चे विख्यातं बभूव आनन्दवर्धनस्य ध्वनिसिद्धान्तः। आनन्दवर्धनः क्रिस्तुवर्षे नवमे शतके (८२० - ८९०) जीवितमदाधरयत्। अभिनवगुप्तः (९५० - १०१६) ध्वन्यालोकस्य व्याख्यानं रचितवान्। 'लोचनम्' इति नाम। पि.वि. काने महाशयः एवं सूचयति यत् अलङ्कारशास्त्रे आनन्दवर्धनस्य ध्वन्यालोकः उन्नतं स्थानं वहति। व्याकरणशास्त्रे पाणिनेः अष्टाध्यायी इव वेदान्ते शङ्कराचार्यस्य वेदान्तभाष्यमिव प्राधान्यमर्हति ध्वन्यालोकः। अपि च डानियल् एच्.एच्. इग्नल्स् आनन्दवर्धनं संस्कृतनिरूपकेषु नितरां प्रशोभमानः सम्राट् इव गणयति।

आनन्दवर्धनः काव्यविभागे त्रीन् ग्रन्थान् विरचितवान्। ते विषमबाणलीला, अर्जुनचरितं, देवीशतकं च इति। शास्त्रग्रन्थेषु ध्वन्यालोकं, विनिश्चयटीकाविवृतिः, तत्त्वालोकः इति त्रीन् ग्रन्थान् च व्यरचयत्। तेषु विषमबाणलीला प्राकृतभाषायामेव। विवृतेः सूचना ध्वन्यालोके प्रथमे चतुर्थे च उद्योते वर्तते।

ध्वन्यालोके चत्वारः उद्योताः (अध्यायाः) सन्ति। प्रथमे उद्योते विष्णुस्तुतिरूपस्य मङ्गलाचरणस्य अनन्तरं ध्वनिसिद्धान्तमवतर्तुं काव्यस्यात्मा ध्वनिः इति सिद्धान्तमवतार्य ध्वनेरभाववादिनां भाक्तवादिनां अनिर्वचनीयवादिनां च मतान् निरस्य ध्वनिभेदान् विस्तारयति। विवक्षितान्यपरवाच्यध्वनिः, अविवक्षितवाच्यध्वनिः इति ध्वनेः द्वैविध्यं समर्थयति। विवक्षितान्यपरवाच्यध्वनिः अभिधामूलकः। अविवक्षितवाच्यध्वनिः लक्षणामूलकः। द्वयोरपि पुनः द्वैविध्यम्। अभिधामूलकस्य संलक्ष्यक्रमव्यङ्ग्यध्वनिः, असंलक्ष्यक्रमव्यङ्ग्यध्वनिः इति भेदद्वयम्। लक्षणामूलकस्य अर्थान्तरसंक्रमितवाच्यध्वनिः अत्यन्ततिरस्कृतवाच्यध्वनिः इति भेदद्वयम्।

तद्यथा -




द्वितीयोद्योते अविवक्षितवाच्यध्वनिं विशदयति। प्रथमं लक्षणामूलकस्य भेदद्वयं विशदयति। अनन्तरं विवक्षितान्यपरवाच्यध्वनेः द्वितीयभेदं विशदयति। शब्दशक्तिमूलकानुरणनध्वनेः श्लेषस्य च मिथः भेदः अस्ति। अर्थशक्त्युद्भवानुरणनध्वनिं सोदाहरणं विशदयति। असंलक्ष्यक्रमव्यङ्ग्यध्वनौ रसध्वनिरन्तर्भवति। यत्र रसः प्रबलतया व्यङ्ग्यार्थप्रतीतिं जनयति तत्र रसध्वनिः।

अर्थशक्त्युद्भवे अलङ्कारध्वनिः। उपमा-आक्षेप-उत्प्रेक्षादिषु ध्वनिं निरूप्य अलङ्कारध्वनिं स्थापयति। शब्दादेव ज्ञानार्जनम्। शब्द-अर्थ-ज्ञानानि भिन्नानि सत्यपि मिथः तादात्म्यं वर्तते। काव्यशरीरं शब्दमेव। उद्दिष्टार्थबोधने शब्दस्य या शक्तिः सा शब्दशक्तिः। तिस्रः शब्दशक्तयः। अभिधा-लक्षणा-व्यञ्जना चेति। सङ्केतितार्थबोधनम् अभिधा। सङ्केतार्थगोचरो शब्दव्यापारो अभिधा। वाच्यार्थानुपपत्या तत्सम्बन्धिन्यारोपितः शब्दव्यापारो लक्षणा। अन्वितेषु पदार्थेषु वाक्यार्थोपस्कारार्थम् अर्थान्तरविषयः शब्दव्यापारो व्यञ्जनावृत्तिः। वाच्य-लक्ष्य-व्यङ्ग्यत्वेन अर्थजातमपि त्रिविधम्। व्यङ्ग्यप्रधानो ध्वनिः।

तृतीये उद्योते अविवक्षितवाच्यस्य सोदोहरणं पदप्रकाशत्वादीन् निरूपयति। यथा भगवद्गीतायाम् –

या निशा सर्वभूतानां तस्यां जागर्ति संयमी
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।

(हे अर्जुन! सर्वभूतानां या रात्रिः व्यामोहजनकत्वात् सर्वपदार्थानाम् अविवेककरी तस्यां जितेन्द्रियः योगी प्रबुद्धः जागर्ति। सा परमार्थतत्त्वजानतः मुनेः निशा)।

अत्र निशार्थो न जागरणार्थः विवक्षितः किन्तु तत्त्वज्ञानसम्पादने अवधानवत्त्वम्।

अर्थशक्तिमूले ध्वनौ पदप्रकाशताम् एवं सूचयति –

वाणिजक हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च

यावल्लुलितालकमुखो गृहे परिष्वङ्कते स्नुषा।

हे वाणिजक, यावत् अस्माकं गृहे लुलितालकमुखा पुत्रवधूः सविलासं भ्रमति तावत् पुत्रेण नीयमानः हस्तिदन्ताः व्याघ्रकृत्तयश्च कुतः स्युः?

ध्वनेः विविधान् भेदान् विशदय्य चित्रकाव्यानां प्रसक्तिं संसूच्य ध्वनिकृदुक्तस्यैव ध्वनिलक्षणस्य साधुतां समर्थयति ।

ध्वन्यालोकस्य चतुर्थे उद्योते सगुणीभूतव्यङ्ग्यस्य ध्वनेः प्रयोजनं विशदीकरोति। सूचयति च 'अनेनानन्त्यमायाति कवीनां प्रतिभागुणाः' इति। पुनः रामायणे करुणरसस्य, महाभारते शान्तिरसस्य च मुख्यत्वं प्रतिपादयति। सुकविवाण्याः माहात्म्यवर्णनावसरे 'सुकविरुपनिबन्धान्निन्द्यतां नोपयाति' इति। अपि च सत्काव्यस्य यत् प्रतीयमानार्थस्वरूपं परिपक्वबुद्धीनां हृदयेषु चिरं प्रसुप्तमस्तु इत्युक्त्वा ध्वन्यालोकं समाप्यते।

### 1.3.2 कुन्तकः

काव्यस्य आत्मा कः इत्यस्मिन् विषये आलङ्कारिकेषु विविधाः संवादाः प्रचलन्ति। रसमिति भरतमुनि- जगन्नाथ-अभिनवगुप्तादयः। रीतिरिति वामनः। अलङ्कारमेवेति भामह-मम्मट-रुद्रट-उद्भटप्रभृतयः। ध्वनिरिति आनन्दवर्धनप्रभृतयः। गुणः इति दण्डी। अनुमितिरिति भट्टनायकः। वक्रोक्तिरिति कुन्तकः। सर्वेऽपि रस- अलङ्कार-रीति-गुणादयः औचित्ये अन्तर्भवन्तीति क्षेमेन्द्रः।

कुन्तकः क्रिस्त्वब्धे दशमे शतके लब्धजन्माभूत्। वक्रोक्तिः काव्यजीवितमिति कुन्तकमतम्। कुन्तकस्तु काव्यलक्षणमेवं सूचयति –

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि

बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ।

वक्रता काव्ये अवश्यं वर्तितव्यमिति। वक्रतायुक्तं रचनावैचित्र्यचमत्कारकारि काव्यम्। सः चतुर्भिरुन्मेषैः (अध्यायः) स्वमतं स्थापयति।

प्रथमे उन्मेषे काव्यसामान्यलक्षणं, काव्यविशेषलक्षणं, वक्रोक्तेः अलङ्कारत्वसाधनम्, वर्णविन्यासवक्रताम्, पदपूर्वार्थवक्रताम्, वाक्यवक्रताम्, पदपरार्धवक्रताम्, प्रकरणवक्रताम्, प्रबन्धवक्रताञ्च नाम्ना सूचयन् सामान्यस्वभावं विशदयति।

प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-
स्तदनु विरहोत्ताम्यतन्वीकपोलद्युतिः।
प्रसरति ततो ध्वान्तक्षोदक्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाच्छनः।। इति ।

वर्णविन्यासवक्रतायाः उदाहरणं प्रदर्शयति। केचन इदमनुप्रासस्य उदाहरणत्वेन परिगण्यन्ते। वाक्यवक्रतां प्रदर्शयति।

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति।

वाक्यस्य वक्रभावः अन्यः। श्लोकादेर्वक्रभावो भङ्गीभणितवैचित्र्यं अन्यः।

प्रबन्धे नाटकादौ वा सहजाहार्यसौकुमार्यमनोहरा वक्रता एव प्रबन्धवक्रता।

यथा - रामायणे मारीचमायामृगमनुसारिणः रामस्य करुणाक्रन्दनमिति विचार्य सीतायाः श्रीरामरक्षणाय लक्ष्मणं प्रति प्रेक्षणम्।

प्रथमे उन्मेषे वर्णविन्यासवक्रतायाः सामान्यं स्वरूपं विशदीकुर्वन् कुन्तकः द्वितीये उन्मेषे वर्णविन्यासवक्रतायाः त्रैविध्यम् आरचितवान्। अपि च पदपूर्वार्धवक्रतां पदपरार्धवक्रतां उपसर्गनिपातजनितवक्रतां च विशदयति। वर्णविन्यवक्रता त्रिधा।

एको द्वौ बहवो वर्णा बन्धमानाः पुनः पुनः।
स्वल्पान्तरास्त्रिधा सोक्ता वर्णविन्यासवक्रता ।।

वर्णशब्दः व्यञ्जनपर्यायः। एकः द्वौ बहवः वा वर्णाः पुनः पुनः बन्ध्यमानः इति भेदात्।

एकाक्षरवर्णविन्यासस्य उदाहरणं यथा –

'कदलीस्तम्बताम्बूलजम्बूजम्भीराः' इति।

द्वितीयप्रकारस्योदाहरणं यथा- प्रथममरुणच्छायः इत्यस्य द्वितीयं चतुर्थं च पादः।

चतुर्थ पादं यथा - **सरसबिसिनीकन्दच्छेदच्छविर्मृगलाच्छनः।**

तृतीयस्योदाहरणं यथा – **सौन्दर्यधुर्यं स्मितम्** इत्यत्र।

तृतीयोन्मेषे वस्तुवक्रताम् उपवर्ण्य स्वभावोक्ति-रसवद्-समासोक्ति-यथासंख्य-हेतु-उपमा-रूपकादीनां विवरणं दत्तमस्ति ।

चतुर्थोन्मेषे प्रकरणवक्रतां प्रबन्धवक्रतां च विशदयति।

राजानकः कुन्तकः क्रिस्तुवर्षे (९५०-१०५०) वर्षयोः मध्ये कालमनैषीत्। सोऽयम् आनन्दवर्धनस्य अभिनवगुप्तस्य च जीवितकालमध्ये एवेति गणयन्ति चरित्रकाराः। सोऽयं धनञ्जयस्य राजशेखरस्य च समकालिकः।

भाषायाः षड्विधभेदेषु वर्तामानां वक्रतां कुन्तकः शास्त्रीयरीत्या विशकलनं करोति।

| | |
|---|---|
| स्वरसम्बन्धः (phonetic) | - वर्णविन्यासवक्रता। |
| शब्दकोशसम्बन्धः | - पदपूर्वार्धवक्रता। |
| व्याकरणसम्बन्धः | - पदपरार्धवक्रता । |
| रससम्बन्धः | - वाक्यवक्रता। |
| रचनासम्बन्धः | - प्रबन्धवक्रता । |

भाषायाः आधुनिकविकासपरिणामादीन् ज्ञात्वैव राजानकः कुन्तकः स्वालङ्कारसिद्धान्तं सहृदयपुरस्सरं समर्पितवान्।

### 1.3.3 क्षेमेन्द्रः

आनन्दवर्धनाचार्यस्य ध्वनिसिद्धान्तमिव, वामनस्य रीतिसम्प्रदायमिव, कुन्तकस्य वक्रोक्तिसिद्धान्तमिव काव्ये औचित्यसम्प्रदायः समारब्धः प्रसिद्धिं च प्राप। अभिनवगुप्तस्य शिष्यः क्षेमेन्द्रः एव अस्य सिद्धान्तस्य उपज्ञाता। क्षेमेन्द्रः एकादशे शतके काश्मीरदेशे अजायत। तस्य पितामहः सिन्धुः, पिता प्रकाशेन्द्रः, पुत्रः सोमेन्द्रः च आसन्। अयं क्षेमेन्द्रः सर्वतोन्मुखायाः प्रतिभायाः अक्षयनिधिरवर्तत। सोऽयं त्रिंशदधिकानां ग्रन्थानां कर्ता। कविः, नाटककृत्, काव्यशास्त्रज्ञः,

धर्ममीमांसकः इत्येवं रूपेण प्रशोभमानस्य तस्य कविकण्ठाभरणं, सुवृत्ततिलकम्, औचित्यविचारचर्चा इत्येते ग्रन्थाः प्रचुरप्रचारे वर्तमानाः भवन्ति।

### 1.3.3.1 कविकण्ठाभरणम्

कविकण्ठाभरणे वर्तमानाः प्रतिपाद्यमानाः विषयाः के? पञ्चसन्धयः, पञ्चपञ्चाशत् कारिकाः च अस्मिन् सन्ति। कविशिक्षा, अकविः कवित्वं कथं सम्पादयति, वाचः अधीशत्वं, काव्यचमत्कारः गुणदोषविवेचनम् इत्यादीनि सन्ति।

### 1.3.3.2 सुवृत्तितिलकम्

प्रसिद्धानां कतिपयानां वृत्तानां निर्वचनम्, औचित्यपूर्व कथं तानि प्रयोक्तव्यानि इत्यादीनि कार्याणि विन्यासत्रयेण विशदयति। केषाञ्चित् कवीनां कैश्चित् वृत्तैः साकं वर्तमानं तात्पर्यमपि सूचितमस्ति। अभिवन्दः अनुष्टुप्वृत्ते, पाणिनिः उपजातौ, भारविः वंशस्थे, कालिदासः मन्दाक्रान्तायां, रत्नाकरः वसन्ततिलके, भवभूतिः शिखरिण्यां, राजशेखरः शार्दूलविक्रीडिते च प्रियं प्रावीण्यं च प्रदर्शितवन्तः आसन्।

### 1.3.3.3 औचित्यविचारचर्चा

कारिका, वृत्तिः, उदाहरणम् इत्येवं रूपेण विरचिते अस्मिन् शास्त्रकाव्ये ऊनचत्वारिंशत् (३९) कारिकाः पञ्चाधिकशतं (१०५) उदाहरणश्लोकाः च सन्ति।

औचित्यं काव्यजीवितमिति क्षेमेन्द्रः। उक्तं च तेन –

अलङ्कारस्त्वलङ्कारः गुणाः एव गुणाः सदा
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।

उपमाद्याः अलङ्काराः कटककुण्डलादिवत् बाह्यशोभाम्, ओजप्रसादादिगुणाः शौर्यवीर्यादीन् इव आन्तरिकशोभाम्, औचित्यं तेभ्यः आन्तरिकं प्रधानं स्थिरं च वर्तमानत्वात् च काव्यस्य जीवितमेव।

औचित्यस्थानानि अष्टविंशतिः। पदे वाक्ये प्रबन्धार्थे गुणे अलङ्कारे रसे क्रियायां कारके लिङ्गे वचने विशेषणे उपसर्गे निपाते काले देशे कुले व्रते तत्त्वे सत्त्वे अभिप्राये स्वभावे सारसंग्रहे प्रतिभायाम् अवस्थायां विचारे नाम्नि आशिषि काव्याङ्गेषु औचित्यं व्याप्य वर्तते। सूक्तौ तिलकं बिभ्रती एकमुचितं पदं वर्तते चेत् तद् पदौचित्यम्। औचित्येन रचितं वाक्यं काव्यविवेकविचक्षणानामभिमतमेव । तदेव वाक्यगतमौचित्यम्।

यथा - 'देवो दयावान्' इत्यस्मिन् श्लोकद्वये कीचककालिककालदण्डं हिडिम्बादयितः इत्यादीनि पदानि रौद्ररसोपकारकाणि भवन्ति। अम्लानप्रतिभायाः प्रकर्षेण उद्भावितं सम्पूर्णे प्रबन्धे अमृतवर्षि यत् चमत्कारं महाकाव्ये स्फुरति तादृशं औचित्यमेव प्रबन्धार्थौचित्यम्।

यथा 'जातं वंशे भुवनविदिते' इति मेघसन्देशे पुष्करावर्तकं मघोनः प्रकृतिपुरुषम् इत्यादिभिः इतिवृत्तस्योत्प्रेक्षणात् प्रबन्धार्थौचित्यं सूचितम्।

काव्ये प्रस्तुतार्थस्य योग्यं माधुर्यं सौकुमार्यं इत्यादिभ्यः गुणेभ्यः योग्या रचना चेत् तत् गुणौचित्यमेव । 'हारो जालाद्रवसनम्' इत्यस्मिन् श्लोके विप्रलम्भतापभारेण विनष्टधैर्यायाः कादम्बर्याः विरहावस्था माधुर्यसौकुमार्यादिगुणैः सूच्यन्ते।

प्रस्तुतार्थस्य योग्यम् उपमारूपकोत्प्रेक्षाद्यलङ्कारैः अलङ्कृतं चेत् तद् अलङ्कारौचित्यम्। 'विश्रान्तविग्रहकाकोः' इत्यस्मिन् श्लोके वत्सेश्वरं कामदेवेनोपमीयते। तद् श्रृङ्गाररसयोग्यं सरसम् अतिशयकरं चारुत्वं च जनयति।


रसौचित्यं यथा आशयनिर्भरं सर्वव्याप्तं रसम् औचित्येन युक्तं चेत् वसन्तकाले अशोकवृक्षमिव मानसं सन्तोषनिर्भरं करोति। यथा 'बालेन्दुवक्राण्यविकासाभावात्' इत्यस्मिन् श्लोके पार्वत्यां परमेश्वरस्य अभिलाषश्रृङ्गारे वक्ष्यमाणे उद्दीपनविभावः, वसन्तस्य कामुकत्वाध्यारोपः, वनस्थलीललनानां नवसंगमयोग्यानि नखक्षतानि उत्प्रेक्षितानि। अतः परमां चारुत्वचारुतां सूचयति।

वीररसौचित्यं यथा 'शौर्याराधितभर्गभार्गवमुनेः' इत्यस्मिन् श्लोके धनुषः रूपे एव भ्रूभङ्गः प्रदर्शितः। वीरः कोपी चेत् मुखचलनादिविकारः न सम्भविष्यति । धीरता प्रसन्नं मधुरं च भवति।

कर्तृपदौचित्यं यथा 'स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः' इत्यस्मिन् श्लोके शत्रुस्त्रियः व्रतं चरन्ति इति वक्तव्ये स्तनयुगम् अश्रुस्नातं शोकाग्निसमीपतरवर्ति विमुक्ताहारं च व्रतं चरतीति कर्तृपदौचित्यमुचितम्।

करणौचित्यं यथा 'लाङ्गलेन गभस्थिमान् वलयितः' इत्यस्मिन् श्लोके हनूमान् लाङ्गलेन सूर्यं वलयितः शिरसा चन्द्रं प्रोतवान् सटाभिः मेघाः व्याधूताः द्रंष्टाभिः नक्षत्राणि तस्तम्भ, दृशा समुद्रं ततार अट्टहासैः रावणस्य प्रतापाग्निं शमिताः इति बहुभिः करणपदैः उत्साहस्तिमितसोपानैः हनूमतः औचित्यातिशयः प्रकाशितः।

साहित्यनभोमण्डले आलङ्कारिकमण्डले च क्षेमेन्द्रस्य स्थानम् अत्युन्नतमेव। सर्वे सम्प्रदायाः औचित्ये अन्तर्भवन्ति इति प्रोफसर् कुप्पुस्वामिशास्त्री अभिप्रैति। संस्कृते वर्तमानाः सर्वे आलङ्कारिकाः स्वस्वप्रतिभानुसारं रूपीकृताः भवन्ति एते सम्प्रदायाः। यदि गुणः, अलङ्कारः, रीतिः च एकस्य त्रिकोणस्य बिन्दवः इति चिन्तयतु। तेषु बिन्दुषु स्पर्शमानं किञ्चन वृत्तं भवति वक्रोक्तिः। एतद्वृत्तमन्तर्भूतम् अपरं त्रिकोणमस्ति। त्रिषु बिन्दुषु ध्वनिः अनुमानं रसः च वर्तन्ते। एतत्त्रयमपि अन्तर्भवन्ति तद्बहिः वर्तमाने औचित्यं नामके वृत्ते। अर्थात् सर्वेऽपि सम्प्रदायाः औचित्ये अन्तर्भवन्ति।



## पुनरावृत्तिः (Recap)

- काव्यस्यात्मा ध्वनिः इति ध्वनिसिद्धान्तमवतरति ध्वनिकारः आनन्दवर्धनाचार्यः।
- नवमे शतके संजातः सः इतरान् कविश्रेष्ठान् स्वसिद्धान्तस्थापनेन अधःकृतवान् ।
- अलङ्कार-रीति-गुण-वृत्तीनां काव्यनिर्माणे प्राधान्यं सन्त्यपि ध्वनिरेव आत्मा इति सः स्थापयति।
- ध्वनिकाव्यं त्रिधा, वस्तुध्वनिः अलङ्कारध्वनिः रसध्वनिः इति।
- रसध्वनिरेव श्रेष्ठः। यत्र वाच्यापेक्षया व्यङ्ग्यस्य प्राधान्यं तत्रैव ध्वनिः। वाच्यादतिरिक्तः कश्चन शोभातिशयमेव ध्वनिः।
- ध्वन्यालोके चत्वारः उद्योताः (अध्यायाः) सन्ति।
- अभाववादिनां भाक्तानाम् अनिर्वचनीयवादिनां च मतान् सयुक्तिकं निरस्य सिद्धान्तपक्षमवतरति प्रथमे उद्योते।
- अभिधामूलकः व्यञ्जनामूलकः इति प्रथमं ध्वनिभेदं संसूच्य अविवक्षितवाच्यध्वनिं द्वितीये उद्योते विशदयति।
- अविवक्षितवाच्यध्वनेः पदप्रकाशत्वादीन् सोदाहरणं निरूप्य चित्रकाव्यानां प्रसक्तिं सूचयति तृतीये उद्योते।
- चतुर्थे उद्योते सगुणीभूतव्यङ्ग्यस्य ध्वनेः प्रयोजनं सूचयति।
- कविप्रतिभायाः आनन्त्यं सूचयन् सः रामायणे करुणरसस्य महाभारते शान्तरसस्य च महत्वं वर्णयति।
- कुन्तकः वक्रोक्तिं काव्यजीवितत्वेन गणयति।
- कुन्तकस्य वक्रोक्तिजीविते षट्सु वक्रतासु प्रथमा भवति वर्णविन्यासवक्रता। इयं वक्रता स्वरसम्बन्धिनी। वर्णानां पुनः पुनरावर्तनेन चमत्कारातिरेके वर्णविन्यासवक्रता।
- क्षेमेन्द्रः प्रधानतया त्रयाणां ग्रन्थानां कर्ता भवति। ते कविकण्ठाभरणं, सुवृत्ततिलकम्, औचित्यविचारचर्चा च भवन्ति। पञ्चसन्धिसम्बन्धं, कविशिक्षा, कवित्वं, वाचः, अधीशत्वं, काव्यचमत्कारः, गुणदोषवचनं च अस्मिन् प्रतिपाद्यविषयत्वेन सन्ति।
- वृत्तसम्बन्धी ग्रन्थः भवति सुवृत्ततिलकम्।
- औचित्यमेव काव्यजीवितम् इति स्थापयति कुन्तकः।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. ध्वन्यालोके कति उद्योताः सन्ति ?
2. ध्वनिसिद्धान्तस्य प्रवर्तकः कः ?
3. देवीशतकस्य कर्ता कः ?

4. काव्यस्यात्मा ध्वनिः - कस्येदं मतम् ?
5. अविवक्षितवाच्यध्वनेः अपरं नाम किमस्ति ?
6. कः वक्रोक्तिं काव्यजीवनत्वेन गणयति ?
7. औचित्यसम्प्रदायस्य समर्थकः कः?
8. कविकण्ठाभरणं केन रचितम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

1. ध्वनेः द्वौ मुख्यभेदौ कौ स्तः ?
2. वर्णविन्यासवक्रता का? विशदयत।
3. क्षेमेन्द्रस्य कृतयः।
4. औचित्यशास्त्रे प्रोफसर् कुप्पुशास्त्रिणः अभिप्रायः कः?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the question in a paragraph)**

1. ध्वन्यालोकः।
2. कुन्दकस्य काव्यलक्षणम्।
3. काव्यस्य प्राणाः रसः इति कुन्दकः।
4. सुवृत्ततिलकम्।

## निर्दिष्टाभ्यासः (Assignments)

1. “काव्यस्यात्मा ध्वनिः”।
2. “वक्रोक्तिः काव्यजीवितम्”।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. चत्वारः।
2. आनन्दवर्धनः।
3. आनन्दवर्धनः।
4. आनन्दवर्धनस्य।
5. लक्षणामूल ध्वनिः।

6. कुन्तकः।
7. क्षेमेन्द्रः।
8. क्षेमेन्द्रेण।

## सूचनाग्रन्थाः (References)


1. आनन्दवर्धनः, ध्वन्यालोकः, व्याख्याता अभिनवगुप्तः लोचनम्, केंब्रिड्ज् हार्वाई सर्वकलाशालाप्रस्, १९९०।
2. नीलकण्ठशास्त्री, ध्वन्यालोकोज्जीवनी, केरलविश्वविद्यालयः, तिरुवनन्तपुरम्, १९८१
3. राजानकः कुन्तकः, वक्रोक्तिजीवितम्, व्याख्या निरूपणं च सुशील् कुमार् डे, कल्कत्ता ओरियन्टल् सीरीस्, कल्कत्ता, १९२९
4. क्षेमेन्द्रः, औचित्यविचारचर्चा, विवर्तकः डो. टि. भास्करः, केरलसर्वकलाशाला, तिरुवनन्तपुरम्, १९७७
5. लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
6. डो. के सुकुमारपिल्ला, काव्यमीमांसा, केरल भाषा इन्स्टिट्यूट्ट्, तिरुवनन्तपुरम्।
7. औचित्यविचारचर्चा - महाकवि क्षेमेन्द्रः (प्रभाव्याख्या) Published - 1982 चौखम्बा विद्याभवन् वाराणसी – २२१००१

# Unit - 4
# विश्वनाथस्य, राजशेखरस्य च साहित्यसिद्धान्तपरिचयः।

## उद्देश्यानि (Learning Outcomes)

- काव्यशास्त्रेऽवगाहः।
- संस्कृतसाहित्यसिद्धान्तानां परिचयः।
- काव्यलक्षणविषये आलङ्कारिकमतानां भेदावगमनम्।
- काव्यविभागपरिज्ञानम्।
- रससम्प्रदायस्य विश्वनाथमहोदयस्य च महत्वज्ञानम्।
- राजशेखरमहोदयस्य महत्वज्ञानम्।

## प्राग्व्यपेक्षाः (Pre requisites)

विश्वनाथः रससम्प्रदायस्य आचार्यः। विश्वनाथमते काव्यशरीरे रसस्य स्थितिः आत्मरूपा एव वर्तते। आचार्य "कविराज" इत्युपाधिना विश्वनाथः विभूषितः। तस्य सुप्रसिद्धो ग्रन्थः साहित्यदर्पणः। साहित्यदर्पणे दश परिच्छेदाः सन्ति। साहित्यदर्पणे कविराजविश्वनाथः नव रसान् स्वीकरोति।

राजशेखरः विदर्भायां कान्यकुब्जदेशे अजायत। सः राज्ञः महेन्द्रपालस्य तत्सुतस्य महीपालस्य च सदसि अवर्तत। तस्य जीवनकालः दशमे शतके इति गणयन्ति चरित्रकाराः। राजशेखरस्य पिता दुर्दुकः, माता शीलावती चास्ताम्। तस्य आलङ्कारिकः ग्रन्थः भवति काव्यमीमांसा। तस्मिन् ग्रन्थे काव्यविद्यायाः काव्यशिक्षायाः च सर्वाण्यपि कार्याणि सविस्तरं प्रतिपादितानि। काव्यविद्यायाः कश्चन विश्वकोशः भवत्ययं ग्रन्थः। एतदतिरिक्तं बालरामायण-बालभारत-विद्धशालभञ्जिका-कर्पूरमञ्जरीति चत्वारो ग्रन्थाश्च सन्ति।

## मुख्यपदानि (Key terms)

साहित्यदर्पणः, कविमर्मज्ञः, पद-वाक्य-पदवृत्तिप्रभृतयः, काव्यमिमांसा, कविरहस्यं, प्रतिभा, व्युत्पत्तिः, उत्तमकविः, रचनाकविः।

**Discussion**

### 1.4.1 विश्वनाथः - साहित्यदर्पणः

संस्कृतालङ्कारिकेषु अग्रगण्येष्वन्यतमः भवति विश्वनाथः। तस्य साहित्यदर्पणः नाम ग्रन्थः अलङ्कारशास्त्रेषु चूडामणित्वमुपगतो विभाति नितराम्। पण्डितकुले संजातः नारायणदास् महोदयः आसीत् विश्वनाथस्य पिता। सोऽयं विश्वनाथः चतुर्दशे शतके कलिङ्गदेशे अजायत। पिता नरसिंहदेवस्य (१३७८ AD - १४३४ AD) सदस्यः आसीत्। विश्वनाथेन अनेके ग्रन्थाः विरचिताः। ते ग्रन्थाः अधो निर्दिष्टाः।

१. साहित्यदर्पणः - अलङ्कारशास्त्रम् ।
२. काव्यप्रकाशदर्पणः - निरूपणग्रन्थः ।
३. राघवविलापः - काव्यम्।
४. प्रभावतीपरिणयः - नाटकम्।
५. चन्द्रकला - नाटिका।
६. कुवलयस्वचरितम् - प्राकृतं काव्यम् ।
७. प्रशस्तिरत्नावली - काव्यम्। षोडशभाषासु विवर्तितम् ।
८. नरसिंहविजयः - काव्यम् ।
९. कंसवधः - काव्यम् ।
१०. लक्ष्मीस्तवः - स्तोत्रकाव्यम् ।

विश्वनाथः कविमर्मज्ञः एव। सः सर्वेषां मतानि अङ्गीकृतवान्। अलङ्कार-रस-वक्रोक्तिप्रभृतीन् वादान् समचित्ततया वीक्षितवान्। तथापि रसध्वनिरेव काव्यस्य महत्वनिर्णये प्रधानः हेतुः। 'वाक्यं रसात्मकं काव्यम्' इत्युक्त्वा काव्यलक्षणं प्रस्तौति प्रथमे अध्याये। साहित्यदर्पणे दश अध्यायाः। लोकोत्तराह्लादकारित्वं काव्यमिति संक्षिप्ततया आचार्यः काव्यलक्षणं सूचयति।

द्वितीयेऽध्याये वाक्यस्वभावं विवृणोति। पद-वाक्य-पदवृत्ति-शब्दवृत्तिप्रभृतीन् विशदयति। किं नाम पदम्? किं नाम वाक्यम्? पदसमूहं वाक्यम्। 'सुप्तिङन्तं पदम्' इति वैयाकरणाः। प्रतीतपदार्थको लोके ध्वनिः शब्दः इत्युच्यते पतञ्जलिः। पूर्णमाशयं यस्मिन् अन्तर्भवति तदेव वाक्यम्। वाक्ये वर्तमानानां पदानां त्रयः गुणविशेषाः। आकाङ्क्षा-योग्यता-सन्निधिः चेति । ते वाक्यार्थज्ञाने हेतवः

इति तार्किकाः। शब्दवृत्तयः त्रिधा। अभिधा-लक्षणा-व्यञ्जनाभेदात्। सङ्केतितार्थगोचरः शब्दव्यापारो अभिधा। शब्दश्रवणानन्तरं तच्छब्दसम्बन्धः अर्थः स्मृतौ आयाति तर्हि तत्र अभिधा। पदस्य साक्षात्सम्बन्धेन जायमानः अर्थः अभिधा। पदस्य परम्परासम्बन्धेन लब्धार्थः लक्षणा। मुख्यार्थबाधे यया तद्युक्तः अन्यार्थः प्रतीयते सा लक्षणा। अस्मिन् कार्ये रूढिः प्रयोजनं वा निमित्तत्वेन वर्तितव्यम्। पदस्य परम्परया सिद्धः अर्थः रूढार्थः। का नाम व्यञ्जना? उच्यते-

विरतास्वभिधाद्यासु ययार्थो बोध्यते परः
सा वृत्तिः व्यञ्जना नाम शब्दस्यार्थस्य वा। इति।

तृतीयमध्यायं रसप्रकरणमेव। रसो नाम व्यक्तिनिष्ठं परस्पराश्रयणम् (objective co-relative) इति टि.एस्.एलियट्ट् महाभागः। काव्ये नव रसाः। श्रृङ्गारहास्यकरुणौ रौद्रवीर्यभयानकाः, बीभत्साद्भुतशान्ताः च भवन्ति। स्थायीभावः अपि नव । ते यथाक्रमं रतिः, हासः, शोकः, क्रोधः, उत्साहः, भयं, जुगुप्सा, विस्मयः, शमः च भवन्ति। सहृदये रसानुभूतिजनकः घटकः भवति भावः। भावाः द्विविधाः। स्थायी-व्यभिचारिभेदात् । उत्पत्तिविनाशरहितः काव्ये सर्वव्यापिनः भावाः स्थायीभावाः। अस्थिराः चाञ्चल्ययुक्ताः व्यभिचारिभावाः। व्यभिचारिभावाः त्रयत्रिंशत्। हर्ष – स्मृति – व्रीडा – मोहः – धृतिः – शङ्का – ग्लानिः – दैन्यं – चिन्ता – मदः – श्रमः – गर्वः – निद्रा – मतिः – व्याधिः – त्रासः – सुप्तः - विबोधः - अमर्षः – अवहित्थम् – उग्रता – उन्मादः – मरणं – वितर्कः – विषादः – औत्सुक्यं - निर्वेद इति काव्योचितरूपेण परिणतिं प्राप्तः लौकिककारणं भवति विभावः। काव्यास्वादने सहृदयस्य हृदयस्य तन्मयीभावः अनुभावः। चतुर्थे अध्याये काव्यविभजनमेव प्रतिपादयति। उत्तम-मध्यम-अधमभेदेन काव्यानि त्रिविधानि। वाच्यात् व्यङ्ग्यस्य प्राधान्ये उत्तमं काव्यम्। व्यङ्ग्यापेक्षया वाच्यस्य अतिशयचमत्कारजनके मध्यमं काव्यम्। अव्यङ्ग्यं काव्यम् अधमम् इति ।

पञ्चमेऽध्याये व्यञ्जनावृत्तिं प्रतिपादयति। अभिधादिवृत्तयः स्वधर्मं कृत्वा विरम्य व्यञ्जनादिभिन्नस्य कस्यचिदर्थस्य बोधने उपयुक्ता वृत्तिः व्यञ्जनावृत्तिः। प्रसिद्धार्थं विना अप्रसिद्धार्थं

बोधयितुं अभिधया न शक्यते। मुख्यार्थेन सम्बन्धं कार्यमेव लक्षणा बोधयति। व्यञ्जनायाः व्यापारः अप्रतिहतः। अभिधा लक्षणा च शब्दमात्रनिष्टे वृत्ती। व्यञ्जनायाः वृत्तिः अतिविपुला। तस्याः व्यापारः शब्दे (वाक्ये, पदे, पदैकदेशे, प्रकृतिप्रत्यये, वर्णे, प्रकरणे, प्रबन्धे च) अर्थे (वाच्य-लक्ष्य-व्यङ्ग्ये) चेष्टादिषु च अन्तर्भवन्ति।

षष्ठे अध्याये नाट्यशास्त्रं प्रतिपादयति। काव्यं दृश्यं श्रव्यमिति विभागं कृत्वा विशदीकरणमकरोत्। नाटक-प्रकरण-भाण-प्रहसन-डिम-व्यायोग-समवकार-वीथी-अङ्क-ईहामगाः चेति नाटकभेदान् सविस्तरं प्रतिपादयति। एकेन प्रयोजनेन अन्वितानां कथांशानाम् अवान्तरप्रयोजनसम्बन्धः सन्धिः। पञ्चसन्धिसमन्वितं भवेत् नाटकम्। मुख-प्रतिमुख-गर्भ-सावमर्श-निर्वहणाः पञ्चसन्धयः।

सप्तमेऽध्याये दोषान् विवृणोति। उद्वेगजनकः दोषः इति अग्निपुराणे। साहित्यदर्पणे विश्वनाथः सूचयति यत् 'वाक्यं रसात्मकं काव्यम्, दोषस्तस्यापकर्षकाः' इति । अर्थात् काव्यस्य अपकर्षकाः दोषाः। आस्वादकानाम् अरुचिदायकः दोषः। रसोत्पत्यभावे, रसप्रतीतेः विलम्बे, रसप्रतीतौ चमत्कारन्यूनता च रसदोषहेतवः भवन्ति। सामान्येन दोषाः चतुर्विधाः पद-वाक्य-अर्थ-रसदोषाः इति। केचन दोषाः केषुचिदवसरेषु गुणत्वेन परिणामं प्राप्नुवन्ति। ते अनित्यदोषाः। इतरे नित्यदोषाः इति व्यवह्रियन्ते।

अष्टमेऽध्याये गुणान् विवृणोति। माधुर्यम्-ओजः-प्रसादादयः गुणाः भवन्ति। काव्योत्कर्षहेतवः गुणाः। विश्वनाथः आनन्दवर्धनः भामहश्च त्रीन् गुणान् अङ्गीकुर्वन्ति। भरतमुनिः दण्डी च दशगुणवादिनौ स्तः। श्रवणमात्रे अर्थबोधजनकः ललितपदावली एव प्रसादगुणः। झटित्यर्थसमर्पणः प्रसादगुणः। शब्दार्थयोः रसपूर्णतारूपेण वर्तमाना रचनारीतिरेव माधुर्यम्। रसे वाचि च रसवत् माधुर्यम्। आह्लादकत्वं माधुर्यम्। चित्तविस्ताररूपं दीप्तित्वमोजः । गाढबन्धत्वम् ओजः इति वामनः । समासभूयस्त्वमोजः इति दण्डी। प्रायेण सर्वे आलङ्कारिकाः एतत् गुणत्रयमङ्गीकुर्वन्ति।

नवमेऽध्याये रीतिं वर्णयति । पादसंघटना रीतिः। रीतिः काव्यसौन्दर्यस्य जननी तथा रसादीनाम् उपकारिणी च भवति। विश्वनाथमते वैदर्भी-गौडी-पाञ्चाली-लाटी इति चतुर्विधाः रीतयः। वैदर्भ्यां रीतौ माधुर्यव्यञ्जकाः वर्णाः, ललिता रचना, अवृत्तिः, अल्पवृत्तिः वा अन्तर्भवन्ति। गौड्यां तु

ओजःप्रकाशकैः वर्णैः बन्धः, पुनः आडम्बरः समासबाहुल्यं च सन्ति। पञ्च वा षड् वा समस्तपदैर्युक्ता रचना पाञ्चाली। वैदर्भीपाञ्चाल्योः मध्ये स्थिता रचना लाटी। रीतिविवेचने गुण-वर्णसंघटन-समास-वृत्तीन् आधारत्वेन गणयत्याचार्यः ।

अन्तिमेऽध्याये, दशमेऽध्याये, अलङ्कारान् अलङ्कारसिद्धान्तान् च विशदयति विश्वनाथः। शब्दार्थयोः शोभातिशयहेतुकं रसादीनामुपकारकं ये अनियतधर्माः ते अलङ्काराः इति अलङ्कारनिर्वचनम्। उपमायाः आचार्येण कथितं लक्षणन्तु साम्यं वाच्यमवैधर्म्यम् इति। उपमा-उपमानोपमा-अनन्वयः- रूपकमित्यादयः अर्थालङ्काराः। उपमारूपकयोः बहुविधाः भेदाः सूचिताः। अपि तयोरलङ्कारयोः व्यक्ततया भेदद्वयं वर्तते। उपमा भेदाभेदप्रधानः अलङ्कारः, रूपकं तु अभेदप्रधानः। उपमायां सादृश्यं, रूपके आरोपं च वाच्यमेव। विश्वनाथः अलङ्कारसम्बन्धीनि अनेकानि तत्वानि सहृदयसमक्षं अलङ्कारसागरमेव समर्पयति।

साहित्यदर्पणस्य महत्वम् इदानीमपि देशे देशे प्रचलति। हि लेखकः तत्त्वदर्शी भाषापण्डितः च प्रोफ. आनन्दचरन् शुक्लामहाशयस्य नेतृत्वे 'भारतीयसाहित्यस्य निर्मातारः' (Makers of Indian Literature) इत्ययं ग्रन्थः निर्ममे। अस्मिन् ग्रन्थे विश्वनाथस्य प्रतिभां, निरूपणपाण्डित्यं, निष्पक्षतां, काव्यशास्त्रचरित्रं च समीचनतया विशदयति। पौराणिककालादारभ्य काव्यविषये यानि यानि चलनानि सम्भूतानि तानि स्पष्टतया विश्वनाथः विस्तारयति। आधुनिकानां कवीनां काव्यशास्त्रविशारदानां मार्गदर्शनाय दीपस्तम्भमिव देदीप्यते सोऽयं महाशयः।

१८७५ वर्षे साहित्यदर्पणस्य आङ्गलेयभाषायां विवर्तनं पण्डितेन बल्लव्यने महाशयेन आरब्धः। किन्तु दौर्भाग्यवशात् तन्न पूर्णं कृतम्। अवशिष्टभागन्तु पण्डितेन परमदासमित्रेण पूर्णतया रचितम्।

### 1.4.2 राजशेखरः

राजशेखरः विदर्भायां कान्यकुब्जदेशे अजायत। सः राज्ञः महेन्द्रपालस्य तत्सुतस्य महीपालस्य च सदसि अवर्तत। तस्य जीवनकालः दशमे शतके इति गणयन्ति चरित्रकाराः। राजशेखरस्य पिता दुर्दुकः, माता शीलावती चास्ताम्। तस्य आलङ्कारिकः ग्रन्थः भवति काव्यमीमांसा। तस्मिन् ग्रन्थे काव्यविद्यायाः काव्यशिक्षायाः च सर्वाण्यपि कार्याणि सविस्तरं प्रतिपादितानि। काव्यविद्यायाः कश्चन

विश्वकोशः भवत्ययं ग्रन्थः। एतदतिरिक्तं बालरामायण-बालभारत-विद्धशालभञ्जिका-कर्पूरमञ्जरीति चत्वारो ग्रन्थाश्च सन्ति।

काव्यमीमांसायाम् अष्टादशाध्यायाः सन्ति। प्रथमः अध्यायः कविरहस्यः भवति। पुनः शास्त्रसंग्रहः - शास्त्रनिर्देशः – काव्यपुरुषोत्पत्तिः – शिष्यप्रतिभा – व्युत्पत्तिकविपाकः – पदवाक्यविवेकः – वाक्यविधिकाकुप्रकारः – पाठप्रतिष्ठा – काव्यार्थयोनिः – अर्थानुशासन – कविचर्या – राजचर्या – शब्दार्थहरणोपायः – कविविशेषः – कविसमयः – देशकालविभागः - भुवनकोशः इति ।

कवित्वस्य निदानं खलु प्रतिभा - कारयित्री प्रतिभा। सा कारयित्री प्रतिभा त्रिधा। सहजा- आहार्या- औपदेशिका चेति। राजशेखरः साहित्यं द्विधा विभजति। काव्य-शास्त्रभेदात्। कवयः त्रिविधः, सारस्वत- आभ्यासिक-औपदेशिकभेदात्। पूर्वजन्मसंस्कारार्जितः सहजप्रतिभावान् सारस्वतकविः। वर्तमानजन्मनि अभ्यासेन बुद्ध्या च काव्यरचनायां व्याप्तः अभ्यासकविः। दिव्योपदेशेन प्रचोदितः सन् काव्यं रचयन् औपदेशिककविः। एषु सारस्वतः उत्तमकविः, आभ्यासिकः मध्यमकविः, औपदेशिकः अधमकविः।

प्रतिभां व्युत्पत्तिं चाश्रित्य कविविभजनेऽपि त्रिविधाः कवयः। ते काव्यकविः, शास्त्रकविः, उभयकविः च भवन्ति। काव्यकवौ कवित्वशक्तिरधिका, अभ्यासे ज्ञाने च न्यूनता दृश्यते। शास्त्रकवौ अभ्यासज्ञाने वर्धना, कवित्वशक्तौ न्यूनता वर्तते। उभयकवौ कवित्वशक्तिः अभ्यासज्ञानादिकं चाधिकतया वर्तते।

अत्र उभयकविः उत्तमकविः, काव्यकविः मध्यमः, शास्त्रकविः अधमकविः इति गणयत्याचार्यः। काव्यात्मेति व्यवह्रियमाणानां रसालङ्काररीतीणां काव्यतत्वानां कल्पनया कविप्रभेदत्वं सूचितम् ।

वाक्य-शब्द-वर्णादीनां गुम्भनेन चमत्कारमुत्पादयन् कविः रचनाकविः। शब्दरचनायां चमत्कारं यः वीक्ष्यते सः शब्दकविः। अर्थचमत्कारस्य यः प्राधान्यं दीयते सः अर्थकविः। अलङ्कारप्रयोगे यः चमत्कारातिशयं वीक्ष्यते सः अलङ्कारकविः। उक्तिवैचित्र्ये (वक्रोक्तौ) यः प्राधान्यं कल्पयति सः

उक्तिकविः। रसाभिव्यक्तौ प्राधान्यं यः ददाति सः रसकविः। कविमार्ग (रीतौ शैल्यां वा) यः सविशेषां श्रद्धां अर्पयति सः मार्गकविः।

यः अयत्नललितरूपेण शास्त्रतत्त्वानि निरूपयति सः शास्त्रार्थकविः। एषु शब्दकविः मार्गकविः च रचनाकवौ अन्तर्भवतः। (ध्वनिसिद्धान्तस्य औचित्यसिद्धान्तस्य च पूर्वमेव इयं कविकल्पनारीतिः) यदि ध्वनिं प्राधान्येन कल्प्यते चेत् ध्वनिकविरिति । सः कविः अर्थकवौ अन्तर्भविष्यति। यदि औचित्यं प्राधान्येन गणयति चेत् औचित्यकविरिति विभागमपि वक्तुं शक्यते।

पूर्वोक्तानां सारस्वत-आभ्यासिक-औपदेशिककविषु दश अवस्थाः राजशेखरेण निर्दिष्टाः, तदनुकूलानि नामानि च दत्तानि।

१. काव्यरचना कर्तव्या इति प्रबलचिन्तया यः गुरुकुले उषित्वा काव्यकर्मणि व्यापृतः सः काव्यविद्यास्नातकः।

२. काव्यं हृदये विरच्य अन्येभ्यः अप्रकटयन् वर्तते सः हृदयकविः।

३. काव्यं विरच्य तस्मिन् दोषान् आशङ्क्य अपरस्य नाम्नि यः प्रकाशयति सः अन्यापदेशी।

४. काव्याभ्यासं सम्पूर्णतां कृत्वा उत्तमं कञ्चन कविम् उपजीव्य रचनां यः करोति सः सेविता।

५. इतिवृत्तकार्ये श्रद्धा न दत्ता किन्तु भावनायां निर्दोषत्वं वर्तते, एतादृशस्य कवेः नाम भवति घटमानः (मुक्तकविः इति नामान्तरम्) ।

६. आशयनिर्भरस्य प्रबन्धस्य रचनायां समर्थः महाकविः।

७. विविधभाषासु विविधान् रसान् सन्निवेश्य प्रबन्धरचनापटुः कविराजः।

८. मन्त्रबलेः इतरसिद्धिभिः वा काव्यरचनाकर्ता भवति आवेशिकः।

९. किमपि विघ्नं विना इच्छानुसारं काव्यरचनायां व्याप्तः भवति अविच्छेदी।

१०. स्वस्य मन्त्रबलेन कुमारेषु कवित्वशक्तिं परिणामयितुं समर्थः भवति संक्रामिता नाम कविः।

कवित्वसम्पादने वासना, प्रतिभा, व्युत्पत्तिः, शिक्षा चावश्यकाः इति राजशेखरः।

## पुनरावृत्तिः (Recap)

- विश्वनाथेन रचितः अलङ्कारशास्त्रग्रन्थः भवति साहित्यदर्पणः।
- विश्वनाथः रस-गुण-रीति-अलङ्कारप्रभृतीन् सर्वान् मतान् अङ्गीकृतवान्।

- उद्वेगजनकः दोषः इति अग्निपुराणे। काव्यस्य अपकर्षकाः दोषाः इति विश्वनाथः। आस्वादकानाम् अरुचिदायकः दोषः।
- राजशेखरः कविशिक्षामधिकृत्य सविस्तरं प्रतिपादितवान्।
- राजशेखरः स्वग्रन्थे काव्यमीमांसायां कवयः त्रिविधाः इति सूचयति। ते सारस्वतः आभ्यासिकः औपदेशिकः च भवन्ति।
- तेषु पूर्वजन्मसंस्कारार्जितः सहजप्रतिभावान् भवति सारस्वतकविः। वर्तमानजन्मनि अभ्यासेन बुद्ध्या च काव्यरचनायां व्यापृतः आभ्यासिककविः।
- राजशेखरः कवि-काव्यसम्बन्धि सर्वान् विषयान् विवृण्वन् काव्यमीमांसा नामकं शास्त्रग्रन्थं रचितवान्।
- बालरामायणं, बालभारतं, विद्धशालभञ्जिका, कर्पूरमञ्जरी इति ग्रन्थचतुष्टयमपि सः रचितवान्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. विश्वनाथेन रचितः अलङ्कारशास्त्रग्रन्थः कः ?
2. का नाम अभिधा ?
3. साहित्यदर्पणे कविराजविश्वनाथः कति रसान् स्वीकरोति?
4. दोषस्तस्यापकर्षकाः' इति कः उक्तवान्?
5. काव्यमीमांसा इत्यस्य लेखकः कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

1. किं नाम दोषः?
2. कविशिक्षामधिकृत्य कः सविस्तरं प्रतिपादितवान् ?
3. सारस्वतकविम् आभ्यासकविं च विशदयत ।
4. राजशेखरमतानुसारम् अर्थकविम्, अलङ्कारकविं च विशदयत ।

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the question in a paragraph)**

1. राजशेखरस्य कृतयः।

## निर्दिष्टाभ्यासः (Assignment)

1. संस्कृतकाव्यशास्त्रे राजशेखरस्य योगदानं पुटद्वयेन उपन्यसत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. साहित्यदर्पणः।
2. पदस्य साक्षात्संबन्धेन जायमाना वृत्तिः।
3. नव रसान्।
4. विश्वनाथः।
5. राजशेखरः।

## सूचनाग्रन्थाः (References)


1. साहित्यदर्पणः - विश्वनाथः (लक्ष्मीव्याख्यासहितः) Printed & published - 1967 चौखम्बा संस्कृतसीरीस् वाराणसी -२
2. विश्वनाथकविराजः, साहित्यदर्पणः, मोत्तिलाल् बनारसीदास्, १९९८
3. लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी, २०१६
4. डो. के सुकुमारपिल्ला, काव्यमीमांसा, केरल भाषा इन्स्टिट्यूट्ट्, तिरुवनन्तपुरम्।

BLOCK -2

# काव्यादर्शः-दण्डी प्रथमपरिच्छेदात् 1-39 कारिकाः

SGOU

# Unit - 1
# प्रथमपरिच्छेदात् 1-10 कारिकाः

## उद्देश्यानि(Learning Outcomes)

- काव्याध्ययने रुच्युत्पादनम् ।
- कवेः व्यक्तित्वस्य, काव्यमहत्वस्य च परिचयः।
- काव्यसौन्दर्यानुभूतिः ।
- पद्यगद्यरचनायै प्रेरणादानम् ।
- कल्पनाशक्तेः रचनाशक्तेः च विकासः।

## प्राग्व्यपेक्षाः (Prerequisites)

संस्कृतशास्त्रमण्डले कविमण्डले च विश्रुतः आसीत् दण्डी। क्रिस्त्वब्धे सप्तमे शतके सः स्वजीवितनेमं लोकं पावयामास। तेन विख्याताः त्रयः ग्रन्थाः रचिताः। शास्त्रमण्डले विश्रुतमेव भवति तस्य काव्यादर्शः नाम ग्रन्थः। दशकुमारचरितं नामकं गद्यग्रन्थः संस्कृतगद्यसाहित्ये नितरां प्रसिद्धः। अपरः कश्चन प्रसिद्धः ग्रन्थतल्लजः भवति अवन्तिसुन्दरीकथा। यद्यपि गुणसम्प्रदायः इतरैराचार्यैः काव्यात्मेति न परिगणितः तथापि सर्वे शास्त्रकाराः गुणमङ्गीकृतवन्तः।

काव्यस्यात्मा गुणः इति वादः वामनाचार्येण उद्घोषितः।

अस्मिन् खण्डे ३९ श्लोकाः एव अस्माभिः पठितव्याः। आहत्य त्रयः परिच्छेदाः। प्रथमे - काव्यलक्षणं काव्यगुणान् द्वितीये - ३५ अर्थालङ्कारः तृतीये - अर्थालङ्काराःच वर्णिताः ।

## मुख्याशयाः (Key themes)

मङ्गलश्लोकं, संसारे त्रिविधाः वाचः, शब्दमाहात्म्यं, साधु असाधुप्रयोगयोः वैलक्षण्यं, काव्ये दोषाः वर्जितव्याः, काव्यलक्षणम्।

## Discussion

### इष्टदेवताप्रार्थना।

भारतीयपरम्परानुसारं ग्रन्थकर्ता आचार्यदण्डी इष्टदेवतानमस्कारपूर्वकं मङ्गलमाचरति।

**१. चतुर्मुखवनाम्भोजवनहंसवधूर्मम ।**
**मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ।।**

**पदच्छेदः** - चतुर्मुखवनाम्भोजवनहंसवधूर्मम - चतुर्मुखवनाम्भोजवनहंसवधूः+ मम

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| चतुर्मुखवनाम्भोजवधूः | - | ब्रह्मणः मुखकमलानां समूहे हंसी। (चत्वारि मुखानि यस्य सः चतुर्मुखः ब्रह्मा। मुखानि एव कमलानि मुखकमलानि। वनं समूहः। हंसस्य वधूः हंसी) |
| सर्वशुक्ला | - | सर्वतः शुक्लवर्णा। |
| सरस्वती | - | विद्याधिष्ठातृदेवता । |
| नित्यम् | - | सर्वदा। |
| मम मानसे | - | मामके हृदये। |
| रमताम् | - | प्रीतिमाधाय वसतु । |

**सारः** - ब्रह्मणः मुखकमलानां समूहे हंसीव प्रशोभमाना शुक्लवर्णा वाग्देवता सरस्वती दण्डिनः चित्ते सदा प्रीतिमुत्पाद्य वसतु।

काव्यलक्षणरूपके अस्मिन् ग्रन्थे सरस्वत्याः स्तुतिः अतिसमुचिता ।

**प्रतिज्ञावाक्यम् ।**

**२. पूर्वशास्त्राणि संगृह्य प्रयोगानुपलक्ष्य च।**
**यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम् ।।**

**पदच्छेदः** - प्रयोगानुपलक्ष्य - प्रयोगान् + उपलक्ष्य ।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| पूर्वशास्त्राणि | - | भरतादीनामाचार्याणां शास्त्राणि। |
| संगृह्य | - | अर्थतः संगृह्य। |
| प्रयोगान् उपलक्ष्य च | - | व्यासप्रभृतिकविग्रन्थेषु स्थितानि तत्प्रयुक्तानि सूक्ष्मेक्षिकया विभाव्य च। |
| यथासामर्थ्यम् | - | सामर्थ्यानुसारम्। |
| अस्माभिः | - | दण्डिमहाशयेन। |
| काव्यलक्षणं | - | काव्यपरिचायकं काव्यलक्षणं। |

क्रियते - विधीयते।

**सारः-** भरतादीनामाचार्याणां शास्त्राणि सम्यक् ज्ञात्वा व्यासकालिदासादीनां ग्रन्थेषु तत्प्रयुक्तानि निरीक्ष्य स्वबुद्ध्यनुसारं काव्यलक्षणादिकं विशदयति दण्डिमहाशयः।

**इह संसारे विविधाः वाचः उपलभ्यन्ते।**

**३. इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।**
**वाचामेव प्रसादेन लोकयात्रा प्रवर्तते ।।**

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| इह | - | अस्मिन् लोके। |
| शिष्टानुशिष्टानां | - | शब्दशास्त्रमतिभिः व्युत्पादितानाम्। (साध्वसाधुशासनविधया शासितानां वा) |
| शिष्टानामपि | - | संस्कृतप्राकृतभिन्नानां देशभाषाणाम्। |
| वाचामेव | - | एतत्त्रितयरूपाणामेव गिराम्। |
| प्रसादेन | - | अनुग्रहेण। |
| लोकयात्रा | - | देवानारभ्य पामरपर्यान्तानां प्राणिनां व्यवहारः। |
| सर्वदा | - | सदा। |
| प्रवर्तते | - | सिद्ध्यति। |

**सारः-** अस्मिन् लोके त्रिविधाः वाचः उपलभ्यन्ते। पाणिन्यादिभिः अनुशिष्टा संस्कृतभाषा, वररुचिना कृतानुशासना प्राकृता, पुनः शिष्टा देशी वाक् च। एताः वाचः आधारीकृत्य देवादिपामरपर्यन्तं सर्वे जनाः व्यवहारं कुर्वन्ति।

**शब्दमाहात्म्यं सूचयति।**

**४. इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**

**पदच्छेदः** - ज्योतिरासंसारम् - ज्योतिः + आसंसारम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| इदं कृत्स्नं | - | इदं समस्तं |

| | | |
|---|---|---|
| भुवनत्रयं | - | लोकत्रयं |
| अन्धं तमः | - | गाढान्धकारव्याप्तं |
| जायेत | - | सम्भवेत् |
| यदि शब्दाह्वयं ज्योतिः | - | यदि शब्दाभिधानं प्रकाशकरं |
| आसंसारं | - | सृष्टिकालादारभ्य लोकावसानपर्यन्तं |
| न दीप्येत | - | न प्रकाशत् । |

**सार:** - यदि शब्दाभिधानं किमपि तत्वं न वर्तते चेत् सम्पूर्ण लोकत्रयं अगाधान्धकारे निमज्जेत। यथा सूर्यादिज्योतेरभावे सर्वे पदार्थाः तमसा व्याप्ता भवन्ति तथैव।

**शब्दाभिधानज्योतिरभावे लोकोऽयं तमसीव मग्नः जायेत।**

५. **आदिराजयशोबिम्बमादर्श प्राप्य वाङ्मयम्।**
**तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति ।।**

**पदच्छेदः** - तेषामसन्निधानेऽपि - तेषाम् + असन्निधाने + अपि ।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| आदिराजयशोबिम्बम् | - | प्राचीनकालजातानाम् इक्ष्वाकुदिलीपप्रभृतीनां राज्ञां यशोरूपं बिम्बं |
| वाङ्मयं | - | काव्यादिरूपं वाङ्मयं |
| आदर्शं प्राप्य | - | दर्पणं प्राप्य |
| तेषामसन्निधानेऽपि | - | इदानीं तेषां राज्ञामभावेऽपि |
| न नश्यति | - | न विलीयते |
| स्वयम् | - | आत्मनैव |
| पश्य | - | विभावय। |

**सारः** - किमपि बिम्बं दर्पणे पतित्वा प्रतिरूपं प्रकाशते। बिम्बाभावे प्रतिरूपं नश्यति। किन्तु काव्यात्मके दर्पणे प्राप्तं राज्ञां यशोरूपं बिम्बं सदैव भासते।

**साध्वसाधुप्रयोगयोः वैलक्षण्यं सूचयति ।**

६. **गौर्गौः कामदुधा सम्यक् प्रयुक्ता स्मर्यते बुधैः।**
**दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति ।।**

**पदच्छेदः** - गौर्गौः - गौः + गौः। सैव - सा + एव । पुनर्गोत्वम् - पुनः + गोत्वम्।

**अन्वयः** **अन्वयार्थः**

| | | |
|---|---|---|
| सम्यक् प्रयुक्ता गौः | - | दूषणराहित्येन व्यवहृता वाक् |
| बुधैः कामदुधा स्मर्यते | - | पण्डिताः सर्वकामप्रदात्रीं गणयन्ति। |
| सैव गौः पुनः | - | सा एव वाक् पुनः |
| दुष्प्रयुक्ता | - | स्वरमात्रादिवैगुण्येन |
| प्रयोक्तुः गोत्वं शंसति | - | दुष्प्रयोक्तुः गोत्वं (गोः भावः - बलीवर्दत्वं) प्रथयति। |

**सारः** - दोषरहितेन प्रयुक्ता वाक् पण्डिताः सर्वकामप्रदात्री इति गणयन्ति। वाणी दुष्प्रयुक्ता चेत् प्रयोक्तुः वक्तुः कवेः वा गोत्वं सूचयति ।

अत्र महाभाष्यकारस्य वचनं स्मर्तव्यम्- 'एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति'। अपि च 'वाग्योगवित् दुष्यति चापशब्दैः' इति।

**काव्ये दोषाः वर्जितव्याः।**

**७. तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।**
**स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ।।**

**पदच्छेदः** – तदल्पमपि - तत् + अल्पम् + अपि । नोपेक्ष्यम् - न + उपेक्ष्यम्।

स्याद्वपुः - स्यात् + वपुः। श्वित्रेणैकेन- श्वित्रेण + एकेन।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| तत् अल्पमपि | - | तस्मात् काव्ये निस्सारमपि(पद- पदांशगतमपि) |
| दुष्टं कथञ्चन | - | दोषः येन केनापि प्रकारेण |
| न उपेक्ष्यम् | - | न परित्यक्तव्यम् (दोषाणां परिहाराय यत्नः कार्यः) |
| सुन्दरमपि वपुः | - | रमणीयमपि शरीरं |
| एकेन श्वित्रेण | - | एकेन श्वेतकुष्ठेन |
| दुर्भगं स्यात् | - | निन्दापात्रं जायेत। |

**सारः** - काव्ये दोषाः न वर्तितव्याः। निस्सारमपि दोषः न भवेत्। हि रमणीयं शरीरं एकेन श्वेतकुष्ठेन दुर्भगः निन्दापात्रं च जायेत।

कुपुत्रेण कुलनाशः इव अल्पमपि दोषः पदगतो पदांशगतो वा भवतु, काव्ये न वर्तितव्यः।

**शास्त्रज्ञानं सम्पादनीयम् ।**

**८. गुणदोषानशास्त्रज्ञः कथं विभजते जनः।**
**किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु।।**

**पदच्छेदः- गुणदोषानशास्त्रज्ञः - गुणदोषान् + अशास्त्रज्ञः।**

किमन्धस्याधिकारोऽस्ति - किम् + अन्धस्य + अधिकारः + अस्ति।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| अशास्त्रज्ञः जनः | - | गुणदोषनिरूपणज्ञानरहितः लोकः |
| गुणदोषान् कथं विभजते | - | केन प्रकारेण गुणान् दोषान् च विभक्तुं शक्यते? |
| किं रूपभेदोपलब्धिषु | - | किं चक्षुरिन्द्रियमात्रग्राह्यत्वे रूपभेदेषु श्वेतपीतादिषु |
| अन्धस्याधिकारोऽस्ति | - | चक्षुरिन्द्रियविकलस्य क्षमत्वमस्ति? (नास्ति) |

**सारः** - काव्ये गुणस्वीकारेण दोषपरित्यागः कार्यः। अतः कविः शास्त्रज्ञः च गुणदोषनिरूपणे शक्तः भवेत् चक्षुरिन्द्रियविकलः (अन्धः) श्वेतपीतादिरूपनिर्णये समर्थः न भवति। तद्वत् अशास्त्रज्ञेन गुणदोषनिरूपणं न शक्यते।

**सूरयः गुणदोषान् ज्ञात्वा काव्यानि रचयामासुः ।**

९. **अतः प्रजानां व्युत्पत्तिमभिसन्धाय सूरयः।**
**वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम्।।**

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| अतः सूरयः | - | साहित्यशास्त्रज्ञानाधीनत्वात् भरतादयः विद्वांसः |
| प्रजानां व्युत्पत्तिमभिसन्धाय | - | लोकानां काव्यव्युत्पत्तिमुद्दिश्य |
| विचित्रमार्गाणां वाचां | - | वैदर्थ्यादिरचनाप्रकाराणां काव्यगिरां |
| क्रियाविधिं निबबन्धुः | - | निर्माणपद्धतिं रचयामासुः । |

**सारः** - अस्माकं पूर्वसूरयः भरतादयः काव्यशास्त्रादीनां परिज्ञानं लोकेभ्यः सिद्धितव्यमिति चिन्तया वैदर्भी- गौडीयादिविचित्ररीतीणां सन्निवेशं काव्ये विरचयामासुः ।

**काव्यशरीरविवेचनम् ।**

**१०. तैः शरीरं च काव्यानामलङ्काराश्च दर्शिताः।**
**शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली ।।**

**पदच्छेदः** - काव्यनामलङ्काराश्च - काव्यानाम् + अलङ्काराः + च।

तावदिष्टार्थव्यवच्छिन्ना- तावत् + इष्टार्थव्यवच्छिन्ना।

**अन्वयः** **अन्वयार्थः**

| | | |
|---|---|---|
| तैः शरीरं | - | भरतादिभिः गद्यपद्यादिभेदेन भिन्नानां काव्यशरीरं |
| अलङ्काराश्च दर्शिताः | - | अनुप्रासोपमादयः च प्रदर्शितवन्तः |
| तावत् | - | तु |
| इष्टार्थव्यवच्छिन्ना | - | कविप्रतिभया प्रतिफलितैः सुन्दरैः पदार्थैः युक्ता |
| पदावली | - | पदसमूहः एवं काव्यम्। |

**सारः** - भरतादयः सूरयः गद्यपद्यमिश्रादिभेदेन भिन्नानां काव्यशरीराणाम् अनुप्रासोपमाद्यैरलङ्कारैः अलङ्कृतः देहमिति मन्यन्ते। कविप्रतिभया प्रतिफलितैः सुन्दरैः पदार्थैः युक्ता पदावली एव काव्यम्।

## पुनरावृत्तिः(Recap)

- काव्यादर्शे आचार्यः दण्डी देवीं सरस्वतीं स्तौति ।
- अस्मिन् लोके संस्कृतं प्राकृतं देशी इति त्रिविधाः वाचः उपलभ्यन्ते।
- शब्दमाहात्म्यं सूचयति । शब्दज्योतिषः प्रकाशेन सम्पूर्ण भुवनत्रयं प्रकाशते।
- प्राचीनाचार्याणां राज्ञां च यशोरूपं बिम्बं तेषामभावेऽपि काव्यादिरूपे दर्पणे इदानीमपि प्रतिबिम्बते।
- दोषरहिता वाक् काव्ये प्रयोक्तव्या। दुष्टा वाक् अल्पापि श्वित्रमिव दुर्भगमेव। अल्पमपि दोषः काव्ये न वर्तितव्यः। स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगं भवति।
- कव्यस्य गुणदोषान् अधिकृत्य कविः ज्ञातवान् भवेत्। कविः शास्त्रज्ञः च गुणदोषान् विविच्य जानीयात्। अन्धः रूपज्ञाने असमर्थः इव, गुणदोषज्ञहीनः काव्यस्वरूपज्ञाने असमर्थः भवेत्। अन्धस्य रूपभेदोपलब्धिषु अधिकारो नास्ति।
- कविप्रतिभया प्रतिफलितैः सुन्दरैः पदैः युक्ता पदावली एव काव्यम्।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति - केषाम् ?
2. सम्यक् प्रयुक्ता गौः कीदृशी भविष्यति ?
3. अस्मिन् लोके कतिविधाः वाचः उपलभ्यन्ते ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

1. इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् – कदा ?
2. काव्यरचनायां किमवश्यं ज्ञातव्यम् ?
3. आचार्य दण्डिनः अभिप्राये काव्यलक्षणं किम् ?
4. तदल्पमपि दुष्टं काव्ये न वर्तिसेव्यम् – किमिव ?
5. अन्धस्य कस्मिन् अधिकारः नास्ति ?

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. आदिराजयशसाम्।
2. बुधैः स्मर्यते ।
3. त्रिविधः।

## सूचनाग्रन्थौ (References)


1. दण्डी, काव्यादर्शः, व्याख्या आचार्यः श्रीरामचन्द्रमिश्रः, प्रथमः परिच्छेदः, कारिका 1-39 चौखम्बा विद्याभवनम्, वाराणसी, 1998 पुटं 1-38
2. आचार्यलोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2016, पुटं 66-135

# Unit -2
# प्रथमपरिच्छेदात् 11-20 कारिकाः

## उद्देश्यानि(Learning Outcomes)

- काव्याध्ययने रुच्युत्पादनम् ।
- कवेः व्यक्तित्वस्य, काव्यमहत्वस्य च परिचयः।
- काव्यसौन्दर्यानुभूतिः ।
- पद्यगद्यरचनाप्रवृतै प्रेरणा ।
- कल्पनाशक्तेः रचनाशक्तेः च विकासः।

## प्राग्व्यपेक्षाः (Prerequisites)

काव्यादर्शे आचार्यः दण्डी प्रथमे एकके त्रिविधाः वाचः, शब्दमाहात्म्यं, कविः शास्त्रज्ञः, काव्यलक्षणं इत्यादिकं वर्णयित्वा काव्यभेदान्, पद्यकाव्यस्य भेदं, महाकाव्यलक्षणं इत्यादीन् वर्णयति।

## मुख्याशयाः (Key themes)

काव्यभेदाः, पद्यकाव्यस्य भेदाः, महाकाव्यलक्षणम्, पद्यं चतुष्पादी, मुक्तकं, कुलकं, कोषः, सङ्घातः।

## Discussion:

**काव्यभेदान् विशदयति।**

११. **गद्यं पद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम्।**
**पद्यं चतुष्पदी तच्च वृत्तं जातिरिति त्रिधा ।।**

**पदच्छेदः** - त्रिधैव - त्रिधा + एव। तच्च - तत् + च। जातिरिति - जातिः + इति ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| तत् | - | तत्काव्यं |
| गद्य पद्यं च मिश्रं च | - | गद्य-पद्य-मिश्रत्वेन<br>(स्वाभाविकरूपेण उच्चार्यते इति गद्यम्।<br>श्लोकचरणमर्हतीति पद्यम्।<br>गद्यपद्योभयमिलितं मिश्रम्) |
| त्रिधैव व्यवस्थितम् | - | त्रिषु प्रकारेषु नियतम् |
| पद्यं चतुष्पदी | - | पद्यं पादचतुष्टयनामकं |

तत् च वृत्तं जातिः इति - पद्यं वृत्तं जातिः इति ।
(अक्षरसङ्घातं वृत्तम्। मात्रासङ्घातं जातिः)

द्विधा - द्विप्रकारा।

**सारः** - काव्यं त्रिधा, गद्य-पद्य-मिश्रभेदेन। यत् स्वाभाविकरूपेण उच्चार्यते तत् गद्यम्। पद्यं चतुष्पदी। पुनः पद्यं वृत्तं जातिः इति भेदेन द्विधा विभक्तम्।

**वृत्तजात्योः विस्तारः छन्दोविचित्यां वर्तते।**

१२. **छन्दोविचित्यां सकलस्तत्प्रपञ्चो निदर्शितः।**
**सा विद्या नौस्तितीर्षूणां गभीरं काव्यसागरम् ।।**

**पदच्छेदः** - सकलस्तत्प्रपञ्चः - सकलः + तत्प्रपञ्चः। नौस्तितीर्षूणाम् - नौः + तितीर्षूणाम्।

**अन्वयः** - **अन्वयार्थः**

सकलस्तत्प्रपञ्चः - समस्तः वृत्तजात्योर्विस्तारः

छन्दोविचित्यां - छन्दोविचिति नामके ग्रन्थे

निदर्शितः - उदाहृतः

सा विद्या - छन्दोविचित्यां वर्तमाना छन्दशास्त्रविषया विद्या

गभीरं काव्यसागरं - दुरवगाहं काव्यरूपं समुद्रं

तितीर्षूणां नौः (इव) - पारं तर्तुम् इच्छूणां पोतः (भवति)।

**सारः** - पद्यस्य भेदे भवतः वृत्तं जातिश्च। वृत्तजात्योः विस्तारः छन्दोविचिति नामके वृत्तशास्त्रग्रन्थे उदाहृतः। सा विद्या काव्यसमुद्रं तर्तुम् इच्छूणां नौः इव भवति।

छन्दोविचितिः दण्डिनः ग्रन्थः भवतीति केचन गवेषकाः वदन्ति ।

**पद्यकाव्यस्य भेदाः।**

१३. **मुक्तकं कुलकं कोषः सङ्घात इति तादृशः।**
**सर्गबन्धांशरूपत्वादनुक्तः पद्यविस्तरः।।**

**पदच्छेदः** - सर्गबन्धांशरूपत्वादनुक्तः - सर्गबन्धांशरूपत्वात् + अनुक्तः ।

**अन्वयः** - **अन्वयार्थः**

मुक्तकं कुलकं कोषः सङ्घातः - पद्यकाव्यस्य भेदाः मुक्तकं कुलकं
कोषः सङ्घातः इति ।
(एकैकचमत्कारक्षमः श्लोकः मुक्तकम् इति अमरुशतकम्।

अनेकपद्येन एकक्रियान्वयं कुलकम्। अन्योन्यानपेक्षकः श्लोकसमूहः कोषः। यत्र कविः एकमर्थम् एकेन वृत्तेन वर्णयति सः सङ्घातः। यथा - मेघसन्देशः।)

| | | |
|---|---|---|
| तादृशः पद्यविस्तारः | - | एतादृशः विभागः |
| सर्गबन्धांशरूपत्वात् | - | महाकाव्यांशरूपत्वात् |
| (अत्र) अनुक्तः | - | अत्र न सूचितः। |

**सारः** - पद्यकाव्यस्य मुक्तकं कुलकं कोषः सङ्घातः इति भेदाः सन्ति। महाकाव्यांशरूपत्वात् तेषां वर्णना अत्र न कृता।

**महाकाव्यविषयाः ।**

**१४. सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।**
**आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम् ।।**

**पदच्छेदः** - आशीर्नमस्क्रिया - आशीः + नमस्क्रिया। वापि- वा + अपि ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| सर्गबन्धः | - | अवान्तरप्रकरणसम्बन्धा रचना |
| महाकाव्यं | - | महाकाव्यमेव |
| तस्य लक्षणम् | - | तस्य इतरव्यावृत्तिकरं चिह्नं |
| आशीर्नमस्क्रियावस्तुनिर्देशः वापि- | | आशीः नमस्क्रिया वस्तुनिर्देशः एतत्त्रितयान्यतमः वा |
| तन्मुखं | - | तस्यारम्भः |
| उच्यते | - | कथ्यते |

**सारः**- सर्गबन्धः महाकाव्यमुच्यते। सर्गबन्धः नाम अवान्तरप्रबन्धरचना। महाकाव्यस्य प्रारम्भः आशिषा नमस्क्रियया वस्तुनिर्देशेन वा भवेत् ।

आशिषा महाकाव्यमारभते – चन्द्रप्रभाकाव्ये
नमस्क्रियया - रघुवंशः
वस्तुनिर्देशेन - शिशुपालवधम्।

**इतिवृत्तं किम्?**

**१५. इतिहासकथोद्भूतमितरद्वा सदाश्रयम्।**
**चतुर्वर्गफलायत्तं चतुरोदात्तनायकम्।।**

**पदच्छेदः** - इतिहासकथोद्भूतमितरद्वा - इतिहासकथोद्भूतम् + इतरत् + वा ।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| इतिहासकथोद्भूतम् | - | इतिहासवर्णितकथामाधारीकृत्य प्रबद्धम् |
| सदाश्रयम् | - | सतां बुद्धादीनां कथामाश्रित्य |
| इतरद्वा | - | अन्यद्वा (इतिवृत्तं भवेत्) |
| चतुर्वर्गफलायत्तं | - | धर्मार्थकाममोक्षाणां फलमुद्दिश्य प्रणीतं |
| चतुरोदात्तनायकं | - | व्यवहारकुशलः धीरोदात्तनायकसहितं |

(भवेत् महाकाव्यम्)

**सारः** - महाकाव्यस्य इतिवृत्तम् इतिहासकथातः उद्धृतम् अथवा सज्जनाश्रयभूतं भवेत्। महाकाव्यस्य उद्देश्यं तु चतुर्वर्गफलप्राप्तिः। अर्थात् धर्मार्थकाममोक्षाणां फलप्राप्तिः। नायकः कुशलः धीरोदात्तादिषु नायकेषु अन्यतमः भवेत्।

**वर्ण्यविषयाः के ?**

**१६. नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः।**
**उद्यानसलिलक्रीडामधुपानरतोत्सवैः।।**

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः | - | महाकाव्ये तावत् नगर-समुद्र-पर्वत- ऋत्वर्णनाः चन्द्रस्य सूर्यस्य च उदयास्तमयवर्णनाभिः |
| उद्यानसलिलक्रीडामधुपानरतोत्सवैः | - | उद्यानवर्णना जलधारे क्रीडाविहारः मद्यसेवनवर्णना सम्भोगश्रृङ्गारवर्णनादिकं च वर्तितव्याः। |

**सारः** - महाकाव्ये अधोनिर्दिष्टाः वर्णनाः सन्दर्भानुसारं योजनीयाः। नगर-समुद्र-पर्वत-ऋतूनां वर्णनाः, सूर्यचन्द्रयोः उदयास्तमयवर्णनाः, उद्यानस्य वर्णना तथा जलधारे क्रीडाविहारः मद्यपानस्य सम्भोगश्रृङ्गारस्य च वर्णनाः भवितव्याः।

एभिः वर्णनाविशेषैः काव्यं यशोजनकं जायते।

**१७. विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।**
**मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि।।**

**पदच्छेदः** – विप्रलम्भैर्विवाहैश्च - विप्रलम्भैः + विवाहैः + च।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि - मन्त्रदूतप्रयाणाजिनायकाभ्युदयैः + अपि ।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| विप्रलम्भैः विवाहैः च | - | विविधैः विप्रलम्भश्रृङ्गारैः पाणिग्रहणैः च |
| कुमारोदयवर्णनैः | - | पुत्रोत्पत्तिवर्णनैः |

मन्त्रदूतप्रयाणाजिनायकाभ्युदयैः - रिपुजयार्थं प्रधानपुरुषैः सह गुप्तभाषणं, दूतप्रेषणं, विजययात्रावर्णनं, नायकाभ्युदयवर्णनम् इत्यादिकं सन्दर्भानुसारं महाकाव्ये वर्तितव्याः।

**सारः** - महाकाव्ये वर्ण्यविषयत्वेन इमे कार्याः वर्तितव्याः। विविधाः विप्रलम्भश्रृङ्गारवर्णनाः, विवाहोत्सवः, पुत्रोत्पत्तिवर्णना, रिपुजयार्थं गुप्तचरैर्भाषणं दूतप्रेषणं विजययात्रावर्णना, नायकस्य अभ्युदयप्राप्तिः इत्यादयः सन्दर्भानुसारं वर्तितव्यानि।

**१८. अलङ्कृतमसङ्क्षिप्तं रसभावनिरन्तरम्।**
**सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः।।**

**पदच्छेदः** - सर्गैरनतिविस्तीर्णैः - सर्गैः + अनतिविस्तीर्णैः ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| अलङ्कृतां | - | नगरार्णवादारभ्य नायकाभ्युदयवर्णनापर्यन्तं वर्तमानानां वस्तूनां वर्णनैरलङ्कृतम् |
| असङ्क्षिप्तं | - | अतिसंक्षेपेण न वर्तमानं |
| रसभावनिरन्तरं | - | रसैः भावैः च पूर्णं |
| अनतिविस्तीर्णैः | - | साधारणतया विस्तारैः |
| श्रव्यवृत्तैः | - | छन्दोनिबद्धैः |
| सुसन्धिभिः | - | मुखप्रतिमुखादिभिः सन्धिभिः |
| सर्गः (उपेतम्) | - | सर्गः, अध्यायैः सहितं (भवेत्) |

**सारः** - नगरार्णवशैलादिभिरारभ्य नायकाभ्युदयेन युक्तेन वर्णनापाटवैरलङ्कृतं नातिसंक्षेपयुक्तं रसभावैरलङ्कृतं उचितैः वृत्तैः युक्तं मुखप्रतिमुखादिसन्धिभिः सर्गैः उपेतं भवेत् महाकाव्यम्।

**१९. सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्।**
**काव्यं कल्पान्तरस्थायि जायते सदलङ्कृति।।**

**पदच्छेदः** - भिन्नवृत्तान्तैरुपेतम् - भिन्नवृत्तान्तैः + उपेतम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| सर्वत्र भिन्नवृत्तान्तैरुपेतं | - | सर्वेषां सर्गाणां समाप्तौ अन्यवृत्तैः सहितं |
| सदलङ्कृति | - | सत्यः यमकानुप्रासोपमालङ्कारयुक्तं |

| | | |
|---|---|---|
| लोकरञ्जकं काव्यं | - | श्रोतृजनहृदयावर्जनक्षमं महाकाव्यं |
| कल्पान्तरस्थायि | - | लोकावसानपर्यन्तं (स्थायेत) |

**सारः** - महाकाव्ये प्रतिसर्गम् अन्ते भिन्नवृत्तयुक्तं श्लोकम् आवश्यकम्। यमकानुप्रासोपमालङ्काराः वर्तित्तव्याः। सहृदयहृदयावर्जिका भवेत् इतिवृत्तादिसम्बन्धा काव्यरचना। तादृशी रचना कल्पान्तरस्थायिनी भवेत्।

**यस्य कस्यापि वर्णनाभावेऽपि न महाकाव्यत्वहानिः ।**

२०. **न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति।**
**यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः ।।**

**पदच्छेदः** - न्युनमप्यत्र - न्यूनम् + अपि + अत्र।
कैश्चिदङ्गैः - कैश्चित् + अङ्गैः । यद्युपात्तेषु - यदि + उपात्तेषु ।
सम्पत्तिराराधयति - सम्पत्तिः + आराधयति ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| कैश्चिदङ्गैः | - | महाकाव्यलक्षणेषु प्रतिपादितेषु कैश्चित् अंशैः |
| न्यूनं काव्यं | - | रहितं महाकाव्यं |
| न दुष्यति | - | न दूषणीयं भवति |
| यदि उपात्तेषु | - | वर्णयितुमङ्गीकृतेषु नगरार्णववर्णनासु |
| सम्पत्तिः | - | पूर्णताजनितः रसपोषः |
| तद्विदः आराधयति | - | काव्यरहस्यज्ञाः विदुषः अङ्गीकुर्वन्ति। |

**सारः** - महाकाव्यलक्षणे प्रतिपादितेषु यदि कैश्चित् भागैः न्यूनता वर्तमानेऽपि न महाकाव्यत्वहानिः। वर्णितेषु पदार्थेषु रसपरिपोषः वर्तते चेत् तदेवोचितम्। यथा यदि कुत्रापि महाकाव्ये शैलर्तुवर्णनेनैव रसपरिपोषः सम्पाद्यते, तदा तत्र कुमारोदयवर्णनायाः आवश्यकता न।

## पुनरावृत्तिः(Recap)

- गद्यं, पद्यं, मिश्रं चेति काव्यं प्रथमतया त्रिधा।
- पद्यं चतुष्पदी। पद्यं द्विधा - वृत्तं जातिः इति भेदात्। वृत्तजात्योः विस्तारः छन्दोविचितिनामके ग्रन्थे सूचितः। काव्यसागरं तरणाय नौः इव भवति छन्दोविचित्यां वर्तमाना विद्या।
- महाकाव्यस्थान् विषयान् वर्णयति। सर्गबन्धः महाकाव्यम्। महाकाव्यस्य प्रारम्भः आशिषा नमस्क्रियया वस्तुनिर्देशेन वा भवेत्।
- इतिवृत्तं इतिहासात् सज्जनकथामाश्रित्य वा भवेत्। चतुर्वर्गफलप्राप्तिः लक्ष्यम्। व्यवहारकुशलः

धीरोदात्तादिः नायकः भवेत्।

- नगर- समुद्र -ऋतु - सूर्य -चन्द्र -उद्यान -जलक्रीडा -मद्यपान - सम्भोगश्रृङ्गारादिवर्णनाः तथा विप्रलम्भश्रृङ्गार-विवाहादिवर्णनाः काव्यविषयत्वेन वर्तितव्याः।
- अलङ्कारैरलङ्कृतं रसभावनिरन्तरं पञ्चसन्धिसमन्वितं भिन्नवृत्तैरुपेतं च भवेत् महाकाव्यम्।
- रसपोषः वर्तते चेत् यदि कैश्चिदंशैः न्यूनतायामपि न दोषः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. छन्दोविचिति नाम वृत्तशास्त्रस्य कर्ता कः?
2. पद्यस्य भेदौ कौ ?
3. किं नाम सर्गबन्धः?
4. महाकाव्यस्य इतिवृत्तं किम् ?
5. महाकाव्यस्य उद्देश्यं किम् ?
6. महाकाव्यस्य नायकः कीदृशः भवेत्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

1. काव्यभेदान् लिखत ।
2. पद्यकाव्यस्य भेदाः के?
3. पद्यस्य लक्षणं किम् ?

## निर्दिष्टाभ्यासः (Assignments)

1. महाकाव्ये वर्तमानाः प्रतिपाद्यविषयाः के ?

## वस्तुनिष्ठप्रश्नानामुत्तराणि (Answer to Objective type questions)

1. दण्डिनः।
2. वृत्तं जातिश्च।
3. महाकाव्यम् ।
4. इतिहासकथातः उद्धृतम्।

5. चतुर्वर्गफलप्राप्तिः।

6. व्यवहारकुशलः धीरोदात्तादिः नायकः भवेत्।

## सूचनाग्रन्थौ (References)


1. दण्डी, काव्यादर्शः, व्याख्या आचार्यः श्रीरामचन्द्रमिश्रः, प्रथमः परिच्छेदः, कारिका 1-39 चौखम्बा विद्याभवनम्, वाराणसी, 1998 पुटं 1-38
2. आचार्यलोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2016, पुटं 66-135

# Unit - 3
# प्रथमपरिच्छेदात् 21-30 कारिकाः

## उद्देश्यानि(Learning Outcomes)

- काव्याध्ययने रुच्युत्पादनम् ।
- कवेः व्यक्तित्वस्य, काव्यमहत्वस्य च परिचयः।
- काव्यसौन्दर्यानुभूतिः ।
- पद्यगद्यरचनायै प्रेरणादानम् ।
- कल्पनाशक्तेः रचनाशक्तेः च विकासः।

## प्राग्व्यपेक्षाः (Prerequisites)

काव्यं काव्यभेदं महाकाव्यस्वरूपं च वर्णयित्वा दण्डी गद्यपद्यप्रभेदौ वर्णयति। महाकाव्ये कस्य प्राधान्यं देयम् इत्यस्मिन् कार्ये विचारः क्रियते।

## मुख्याशयाः (Key themes)

नायकप्रतिनायकवर्णना, गद्यपद्यप्रभेदौ, काव्याख्यायिकयोः लक्षणं, नायकं, प्रागुपन्यस्य, वक्त्रम्, अपरवक्त्रम्।

## Discussion

**महाकाव्ये नायकप्रतिनायकवर्णना।**

२१. **गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्।**
**निराकरणमित्येष मार्गः प्रकृतिसुन्दरः।।**

**पदच्छेदः** - प्रागुपन्यस्य - प्राक् + उपन्यस्य । निराकरणमित्येषः - निराकरणम् + इति + एषः ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| प्राक् गुणतः | - | प्रथमं नायकागुणवर्णनतः |
| नायकम् उपन्यस्य | - | काव्यनेतारम् अभिधाय |
| तेन विद्विषां | - | नायकवर्णनेन प्रतिनायकानां |
| निराकरणं | - | उच्छेदः (वर्ण्यते) |
| एषः मार्गः | - | एषः प्रकारः |

प्रकृतिसुन्दरः - स्वाभाविकतया मनोहरः (भवति)।

**सारः -** महाकाव्ये प्रथमं नायकस्योत्कर्षं वर्णयित्वा पुनः प्रतिनायकस्य उत्कर्षः नायककृतः प्रतिनायकपराजयः इत्येषः मार्गः प्रकृतिसुन्दरः भवति।

२२. **वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि ।**
**तज्जयान्नायकोत्कर्षकथनं च धिनोति नः ।।**

**पदच्छेदः** - रिपोरपि - रिपोः + अपि ।
तज्जयान्नायकोत्कर्षकथनम् - तज्जयात् + नायकोत्कर्षकथनम्।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| रिपोरपि | - | प्रतिनायकस्य अपि |
| वंशवीर्यश्रुतादीनि | - | कुलं पराक्रमप्रकर्षं शास्त्रज्ञानम् औदार्यादीनि |
| वर्णयित्वा | - | वर्णनां कृत्वा |
| तज्जयात् | - | प्रतिनायकस्य उच्छेदात् |
| नायकोत्कर्षकथनं च | - | नायकश्रेष्ठत्वस्य वर्णनं च |
| नः धिनोति | - | अस्मान् प्रीणयति। |

**सारः** - नायकवर्णनात् प्राक् प्रतिनायकस्यापि कुलं पराक्रमं शास्त्रज्ञानम् औदार्यं नीतिशास्त्रादिकं वर्णयित्वा प्रतिनायकात् नायकश्रेष्ठत्ववर्णनमपि दण्डिनः अभिमतमेव।

काव्यं काव्यभेदं महाकाव्यस्वरूपं च वर्णयित्वा दण्डी गद्यपद्यप्रभेदौ वर्णयति ।

**गद्यपद्यप्रभेदौ ।**

२३. **अपादः पदसन्तानो गद्यमाख्यायिका कथा।**
**इति तस्य प्रभेदौ द्वौ तयोराख्यायिका किल ।।**

**पदच्छेदः** - तयोराख्यायिका - तयोः + अख्यायिका।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| अपादः पदसन्तानः गद्यम् | - | गणमात्रनियमवर्जितः सुप्तिङ्समुदायो गद्यमिख्यायते। |
| कथा आख्यायिका | - | कथा आख्यायिका चेति |
| तस्य द्वौ प्रभेदौ | - | गद्यस्य द्वौ भेदौ |
| तयोराख्यायिका किल | - | कथाख्यायिकयोः मध्ये आख्यायिकायाः (प्राचीनोक्तं लक्षणं वक्ष्यति) |

**सारः -** पादरहितः पदसमूहः गद्यम्। गद्यस्य द्वौ भेदो कथा आख्यायिका चेति । तयोर्मध्ये आख्यायिकायाः लक्षणं वक्ष्यते।

**प्राचीनमतानुसारं काव्याख्यायिकयोः लक्षणम्।**

२४. **नायकेनैव वाच्यान्या नायकेनेतरेण वा ।**
**स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसिनः।।**

**पदच्छेदः -** नायकेनैव - नायकेन + एव । वाच्यान्या - वाच्या + अन्या ।
नायकेनेतरेण - नायकेन + इतरेण। नात्र - न + अत्र ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| नायकेनैव वाच्या | - | आख्यायिका नायकेन स्वयं वाच्या |
| अन्या नायकेनेतरेण वा | - | कथा नायकेन अन्येन पुरुषेण वा वाच्या |
| भूतार्थशंसिनः | - | यथार्थव्यवहारिणः नायकस्य |
| स्वगुणाविष्क्रिया | - | निजगुणवर्णनं |
| न अत्र दोषः | - | न दोषः भवति । |

**सारः -** कथाख्यायिकयोः आख्यायिका स्वयं नायकेन वाच्या। कथा नायकेन इतरपुरुषेण वा वाच्या। अत्र यथार्थव्यवहारिणः नायकस्य स्वगुणवर्णने दोषः नाशङ्कनीयः। एतदेव कथाख्यायिकयोः विषये प्राचीनोक्तं लक्षणम्।

**कथाख्यायिकयोः प्राचीनमते अनियमः।**

२५. **अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात्।**
**अन्यो वक्ता स्वयं वेति कीदृग् वा भेदलक्षणम् ।।**

**पदच्छेदः -** त्वनियमः - तु + अनियमः ।
दृष्टस्तत्राप्यन्यैरुदीरणात् - दृष्टः + तत्र + अपि + अन्यैः + उदीरणात्।
अन्यो वक्ता - अन्यः + वक्ता । वेति - वा +इति। कीदृग् वा - कीदृक् + वा।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| तत्र अपि | - | आख्यायिकायामपि |
| अन्यैरुदीरणात् | - | नायकभिन्नैरुदीरणात् वर्णनात् |
| अनियमः | - | आख्यायिका नायकेनैव वाच्या इत्यस्मिन् अनियमः |
| दृष्टः | - | उदाहरणत्वेन दृष्टः |
| अन्यः वक्ता | - | कथायामन्यो वक्ता |
| स्वयं वेति वक्ता | - | आख्यायिकायां स्वयं वक्ता |
| भेदलक्षणं कीदृक् वा | - | भेदकथनं न युक्तम्। |

**सारः** - आख्यायिकायां नायक एव वर्णयेत् इति नियमो न। अन्यैरपि वर्णनं कृतस्य दर्शनात्। कथायामन्यो वक्ता, तथा आख्यायिकायां स्वयं वक्ता इति भेदकथनम् अयुक्तमेव। न वक्तृगतवैलक्षण्यमनयोः भेदः।

**छन्दोनिवेशादिकृतं भेदमपि निरस्यति।**

२६. **वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वं च भेदकम्।**
**चिह्नमाख्यायिकाश्चेत्प्रसङ्गे न कथास्वपि ।।**

**पदच्छेदः** - चापरवक्त्रम् - च + अपरवक्त्रम् ।
चिह्नमाख्यायिकायाश्चेत् - चिह्नम् + आख्यायिकायाः + चेत्। कथास्वपि - कथासु + अपि ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| वक्त्रम् अपरवक्त्रं च | - | छन्दोभेदे वक्त्रापरवक्त्रे च |
| सोच्छ्वासत्वं च | - | कथांशव्यवच्छेदसंज्ञा उच्छ्वासः (अध्यायः) |
| आख्यायिकायाः भेदकं | - | कथातः आख्यायिकायाः वैलक्षण्यं |
| चिह्नं चेत् न | - | लक्ष्म चेत् तन्न युक्तं |
| प्रसङ्गे | - | सन्दर्भे |
| कथास्वपि | - | कथायामपि वक्त्रापरवक्त्रनिवेशनं (दृश्यते) |

**सारः** - छन्दभेदे वक्त्र-अपरवक्त्रे, अध्ययनाम उच्छ्वासत्वं च कथातः आख्यायिकायाः भेदमिति कथनं न युक्तम्। हि कथायामपि वक्त्रापरवक्त्रयोः निवेशस्य सम्भवात्।

**आर्यावृत्ताधारेणापि कथाख्यायिकयोः भेदत्वं न।**

२७. **आर्यादिवत् प्रवेशः किं न वक्त्रापरवक्त्रयोः ।**
**भेदश्च दृष्टो लम्भादिरुच्छ्वासो वास्तु किं ततः ।।**

**पदच्छेदः** - भेदश्च - भेदः + च । लम्भादिरुच्छ्वासः - लम्भादिः + उच्छ्वासः । वास्तु - वा + अस्तु ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| आर्यादिवत् | - | कथायामपि आर्यावृत्तवत् |
| वक्त्रापरवक्त्रयोः प्रवेशः किं न | - | वक्त्रापरवक्त्रयोः प्रवेशे किं न बाधकम्?(कथायाम् आख्यायिकायां च आर्यायाः वक्त्र-अपरवक्त्रयोः च यथेच्छं प्रयोगः दृश्यते) |
| लम्भादिः उच्छ्वासः भेदश्च | - | प्रकरणविच्छेदरूपेण वर्तमानौ लम्भः उच्छ्वासः च भेदौ |

| | | |
|---|---|---|
| वास्तु दृष्टः | - | उभयत्रापि दृश्यते |
| किं ततः | - | तेन कः भेदः ? (न कोऽपि भेदः) |

**सारः** - कथायामपि आर्यावत् वक्त्रापरवक्त्रयोः प्रवेशनेन बाधकत्वं न वर्तते। अध्यायस्य स्थाने प्रयुज्यमानौ लम्भ-उच्छ्वासौ उभयत्रापि दृश्यते।

**कथाख्यायिके एका एव जातिः ।**

२८. **तत् कथाख्यायिकेत्येका जातिः संज्ञा द्वयाङ्किता।**
**अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः ।।**

**पदच्छेदः** - कथाख्यायिकेत्येका – कथा + आख्यायिका + इति + एका।

अत्रैवान्तर्भविष्यन्ति - अत्र + एव + अन्तर्भविष्यन्ति।

शेषाश्चाख्यानजातयः - शेषाः + च + आख्यानजातयः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| तत् | - | तस्मात् (संज्ञाभेदस्य अप्रयोजकत्वात्) |
| कथाख्यायिका | - | कथा आख्यायिका चेति |
| संज्ञाद्वयाङ्किता | - | नामाद्वितयाभिधाना |
| एका जातिः | - | तुल्यः पदार्थः |
| शेषाः चाख्यानजातयः | - | शेषाः अतिरिक्ताः गद्यकाव्यानि |
| अत्रैवान्तर्भविष्यन्ति | - | कथायामेव अन्तर्भविष्यन्ति। |

**सारः –** अतः कथा आख्यायिका चेति संज्ञाद्वयाङ्किता एका एव जातिः। शेषाः अतिरिक्ताः गद्यकाव्यानि( खण्डकथा, परिकथा, कथालिका इत्यादीनि) कथायामेव अन्तर्भविष्यन्ति।

**प्रतिपाद्यविषयः कथा-आख्यायिकाभेदनिर्णये हेतुः न भवति।**

२९. **कन्याहरणसंग्रामविप्रलम्भोदयादयः।**
**सर्गबन्धसमा एव नैते वैशेषिका गुणाः।।**

**पदच्छेदः** - नैते - न + एते।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| कन्याहरणसंग्रामविप्रलम्भोदयादयः | - | कन्याहरणं संग्रामः (युद्धः)<br>विप्रलम्भश्रृङ्गारः चन्द्रसूर्योदयवर्णनादयः<br>नायकाभ्युदयः |
| एते गुणाः सर्गबन्धसमाः | - | पूर्वोक्ताः गुणाः महाकाव्यसदृशाः |
| न वैशेषिकाः | - | कथाख्यायिकाभेदनिर्णयाः न भवन्ति । |

**सारः -** कन्यकापहरणं युद्धं विप्रलम्भश्रृङ्गारः सूर्यचन्द्रमसोः उदयास्तमयवर्णनाः नायकाभ्युदयम् इत्येते महाकाव्यस्य सदृशाः प्रतिपाद्यविषयाः। कथा-आख्यायिकाभेदनिर्णये एते न हेतुभूताः।

**कविभावकृतः चिह्नोऽपि म कारणम्।**

**३०. कविभावकृतं चिह्नमन्यत्रापि न दुष्यति।**
**मुखमिष्टार्थसंसिद्धौ किं हि न स्यात् कृतात्मनाम् ।।**

**पदच्छेदः** - चिह्नमन्यत्रापि - चिह्नम् + अन्यत्र + अपि ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| अन्यत्र | - | कथातः भिन्ने पद्यप्रबन्धे |
| कविभावकृतं चिह्नमपि | - | कविना स्वेच्छया निबद्धं लक्ष्म अपि |
| न दुष्यति | - | न कापि त्रुटिः |
| हि कृतात्मनां | - | यस्मात् सूरीणां |
| इष्टार्थसंसिद्धौ | - | मङ्गलादिरूपस्य अभिमतार्थसम्पादने |
| मुखं किं न स्यात् | - | उपायः किं न स्यात् (मङ्गलादिकृतः उपाय एव) |

**सारः -** न केवलं कथासु किन्तु आख्यायिकास्वपि कविभावकृतं चिह्नं द्रष्टुं शक्यते। हि मङ्गलादिरूपस्य अभिमतार्थसम्पादने तादृशं चिह्नमुपकरोति। न तु कथाख्यायिकयोः भेदज्ञानाय।

कथा-आख्यायिकाविषये दण्डिनः अभिप्रायः कः? प्राचीनाचार्याणाम् अभिप्रायश्च कः ? अपादः पदसङ्घातः गद्यम्। गद्यं द्विधा - कथा आख्यायिका इति भेदात्। अत्र प्राचीनाः एवं वदन्ति ।

| **कथा** | **आख्यायिका** |
|---|---|
| 1.आख्यायिका नायकेनैव वाच्या। | 1.कथा नायकेन इतरेण वा वाच्या। |
| 2.यथार्थव्यवहारिणः नायकस्य स्वस्य गुणवर्णने न दोषः। | 2. कथायाम् आर्यावृत्तं प्रयुज्यते । |
| 3.वक्त्र-अपरवक्त्रयोः प्रयोगः दृश्यते । | 3. अध्यायस्य पर्यायरूपेण लम्भः इति पदम् । |
| 4.उच्छ्वासः अध्यायस्य पर्यायरूपेण प्रयुज्यते। | 4. कविभावकृतं चिह्नं (श्रीः, लक्ष्मीः) प्रयुज्यते। |
| 5. खण्डकथा, परिकथा, कथालिका, इत्याद्याः आख्यायिकायाम् अन्तर्भवन्ति । | |
| 6. कन्याहरणं, संग्रामः (युद्धं) विप्रलम्भश्रृङ्गारः चन्द्रसूर्यादयः वर्णनाः अन्तर्भवन्ति । | |

दण्डिनः मते कथा-आख्यायिका इति एका जातिः संज्ञाद्वयाङ्किता भवति। अनेन महाशयेन सूचितानि कार्याणि तु –

1. आख्यायिकायां नायकः एव वर्णयेत् इति नियमो न। अन्यैरपि वर्णना कृता।
2. कथायामन्यो वक्ता, आख्यायिकायां स्वयं वक्ता इति भेदकल्पनम् अयुक्तम्।
3. छन्दोभेदाः न दृश्यन्ते। उभयत्रापि आर्या-वक्त्र-अपरबक्त्रवृत्तदर्शनात्। तथा अध्यायपर्यायरूपेण लम्ब - उच्छ्वासयोः आविर्भावः उभयत्रापि दृश्यते।
4. खण्डकथा, परिकथा, कथालिका इत्यादिभेदाः उभयत्रापि सन्ति ।
5. कन्याहरणं संग्रामः विप्रलम्भश्रृङ्गारः चन्द्रसूर्यादयः आख्यायिकामिव कथास्वपि सन्ति ।
6. कविभावकृतं चिह्नं (श्रीः, लक्ष्मीः) कथास्वेव प्रयोक्तव्यम् इति नियमो नास्ति। कवेरिच्छा एव तत्र हेतुः।
7. अतः कथा - आख्यायिका च एका एव । नामधेयद्वयम् अस्ति इति दण्डिनः मतम् ।

## पुनरावृत्तिः(Recap)

- प्रथमं नायकं पुनः प्रतिनायकं वर्ण्यते चेद्वरम्। यदि प्रतिनायकस्य कुलवीर्यविद्यादीन् वर्णयित्वा प्रतिनायकात् नायक श्रेष्ठत्ववर्णनेनापि न दोषः। प्रतिनायकस्य निराकरणं करोति चेत् स मार्गः प्रकृतिसुन्दरः।
- गद्यं पद्यं मिश्रं चेति काव्यं त्रिधा।

  अपादः पदसन्तानः गद्यम्। गद्यस्य द्वौ भेदौ, कथा आख्यायिका चेति प्राचीनाः।
- आख्यायिका नायकेनैव वाच्या। कथा तु नायकेन इतरेण व वाच्या।
- वक्त्रम् अपरवक्त्रम् आर्या इत्यादि वृत्तभेदाः उच्छ्वासः लम्भः इत्यादि अव्ययपर्यायपदानि वा कथा-आख्यायिकयोः भेदनिर्णये न हेतवः।
- अतः कथा -आख्यायिका इत्येते पदे संज्ञाद्वयाङ्किता एका जातिः।
- प्रतिपाद्यविषयः कथा-आख्यायिकाभेदनिर्णये हेतुः न भवति ।
- कन्याहरणसंग्रामादयः महाकाव्यस्य प्रतिपाद्यविषयः।
- कथा-आख्यायिकाभेदनिर्णये कविभावकृतः चिह्नोऽपि न कारणम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. अपादः पदसन्तानः - किम् ?
2. कथाख्यायिकयोः इत्येका जातिः संज्ञाद्वयाङ्किता - कस्येदं मतम् ?
3. नायकेनैव वाच्या इति प्राचीनाः - का?
4. वक्त्रम् अपरवक्त्रं च कस्मिन् विभागे अन्तर्भवति ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

1. एषः मार्गः प्रकृतिसुन्दरः - कः मार्गः ?
2. कन्याहरणसंग्रामादयः कीदृशाः भवन्ति ?
3. कविभावकृतः चिह्नोऽपि कस्मिन् न हेतुः ?

## निर्दिष्टाभ्यासः (Assignments)

1. नायकप्रतिनायकवर्णनाविषये दण्डिनः अभिप्रायः कः ?
2. कथाख्यायिकयोः भेदविषये प्राचीनमतं संसूच्य दण्डिनः मतं निरूपयत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. गद्यम्।
2. दण्डिनः।
3. आख्यायिका
4. वृत्ते ।

## सूचनाग्रन्थौ (References)


1. दण्डी, काव्यादर्शः, व्याख्या आचार्यः श्रीरामचन्द्रमिश्रः, प्रथमः परिच्छेदः, कारिका 1-39 चौखम्बा विद्याभवनम्, वाराणसी, 1998 पुटं 1-38
2. आचार्यलोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2016, पुटं 66-135

# Unit - 4
# प्रथमपरिच्छेदात् 31- 39 कारिकाः

## उद्देश्यानि(Learning Outcomes)

- काव्याध्ययने रुच्युत्पादनम् ।
- कवेः व्यक्तित्वस्य, काव्यमहत्वस्य च परिचयः।
- काव्यसौन्दर्यानुभूतिः ।
- पद्यगद्यरचनायै प्रेरणादानम् ।
- कल्पनाशक्तेः रचनाशक्तेः च विकासः।

## प्राग्व्यपेक्षाः (Prerequisites)

महाकाव्ये नायकप्रतिनायकवर्णनां प्राचीनमतानुसारं काव्याख्यायिकयोः लक्षणं च वर्णयित्वा दण्डी मिश्रकाव्यानि, चम्पूकाव्यानि, भाषानियमः इत्यादीनि वर्णयति।

## मुख्याशयाः (Key themes)

चम्पूकाव्यम्, चतुर्धा काव्यशास्त्रज्ञाः, गद्यकाव्ये भाषानियमं, लास्यम्, प्राकृतभाषाः, अपभ्रंशः, बृहत्कथा।

## Discussion

**मिश्रकाव्यानि कानि ? किं नाम चम्पूकाव्यम्?**

३१. **मिश्राणि नाटकादीनि तेषामन्यत्र विस्तारः।**
**गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते ॥**

**पदच्छेदः** - काचिच्चम्पूरित्यभिधीयते - काचित् + चम्पूः + इति + अभिधीयते ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| मिश्राणि नाटकादीनि | - | नाटकादीनि दृश्यकाव्यानि गद्यपद्यतया मिश्राकाव्यानि |
| तेषामन्यत्र विस्तारः | - | नाटकादीनां नाट्यशास्त्रादौ प्रतिपादनं वर्तते |
| काचित् गद्यपद्यमयी | - | काचित् गद्यपद्यप्रचुरा |
| चम्पूरित्यभिधीयते | - | चम्पूकाव्यम् इति व्यवह्रियते |

**सारः** - मिश्रकाव्यं नाटकादिः। तेषां प्रतिपादनं नाट्यशास्त्रादौ वर्तते । गद्यपद्यप्रचुरं काव्यं चम्पूकाव्यं भवति।

**वाङ्मयस्य संस्कृतादिचातुर्विध्यं सूचयति ।**

३२. **तदेतद्वाङ्मयं भूयः संस्कृतं प्राकृतं तथा ।**
**अपभ्रंशश्च मिश्रं चेत्याहुरार्याश्चतुर्विधम् ।।**

**पदच्छेदः** - तदेतद्वाङ्मयम् - तत् + एतत् + वाङ्मयम्। अपभ्रंशश्च – अपभ्रंशः + च।
चेत्याहुरार्याश्चतुर्विधम् - च + इति + आहुः + आर्याः + चतुर्विधम् ।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| तत् एतत् वाङ्मयं | - | गद्यपद्यमिश्रात्मकम् एतत् सारस्वतं |
| भूयः | - | पुनरपि |
| संस्कृतं प्राकृतम् अपभ्रंशः मिश्रं च | - | संस्कृत-प्राकृत-अपभ्रंश-मिश्रभेदेन |
| चतुर्विधम् इति | - | चतुर्प्रकारमिति |
| आर्याः आहुः | - | काव्यशास्त्रज्ञाः वदन्ति । |

**सारः** - गद्य-पद्य-मिश्रात्मकं काव्यं पुनः संस्कृतं-प्राकृतम्-अपभ्रंशं-मिश्रम् इति चतुर्धा काव्यशास्त्रज्ञाः विभजन्ति ।

**संस्कृतादिपदं व्युत्पादयति ।**

३३. **संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः ।**
**तद्भवस्तत्समो देशीत्यनेकः प्राकृतक्रमः ।।**

**पदच्छेदः** - वागन्वाख्याता - वाक् + अन्वाख्याता।
तद्भवस्तत्समः -तद्भवः + तत्समः ।
देशीत्यनेकः - देशी + इति + अनेकः। -

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| दैवी महर्षिभिः आख्याता | - | देवव्यवहार्या यास्कादिभिः प्रकृतिप्रत्ययादिदर्शनेन व्यख्याता |
| वाक् संस्कृतं | - | वाणी संस्कृतमिति प्रसिद्धिं प्राप। |
| तद्भवः | - | संस्कृतादुत्पन्नः प्राकृतः |
| तत्समः | - | संस्कृतभिन्नरूपः |
| देशी | - | तत्तद्देशस्था |
| इति अनेकः प्राकृतनियमः | - | इति बहुविधः प्राकृतभाषाप्रपञ्चः अस्ति। |

**सारः** - देवव्यवहार्या यास्कपाणिन्यादिभिः प्रकृतिप्रत्ययादिरूपेण व्याख्याता संस्कृतभाषा वैदिकलौकिकभेदेन द्विधा । संस्कृतादुत्पन्नः प्राकृतः। प्राकृतस्य तद्भवतत्समदेश्यादिरूपाः अनेकविधाः भेदाः।

**महाराष्ट्रप्राकृतस्य प्राधान्यम्।**

३४. **महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः।**
**सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम्।।**

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| महाराष्ट्राश्रयां भाषां | - | महाराष्ट्रदेशवासिभिः व्यवहृतां भारतीं |
| प्रकृष्टं प्राकृतं विदुः | - | सर्वोत्तमं प्राकृतमिति वदन्ति |
| यन्मयं | - | महाराष्ट्रप्राकृतभाषायां निबद्धं |
| सेतुबन्धादि | - | प्रवरसेनस्य सेतुबन्धकाव्यं प्रभृति |
| सूक्तिरत्नानां सागरः | - | चमत्कारपूर्वरत्नानां महार्णवः भवति। |

**सारः** - महाराष्ट्री नामिका प्राकृतभाषा प्राकृतभाषासु श्रेष्ठा। हि प्रवरसेनेन रचितं प्राकृतभाषाकाव्यं सेतुबन्धः चमत्कारपूर्वरचनानां महार्णवः भवति ।

**महाराष्ट्रीसदृशाः अन्याः प्राकृतभाषाः शौरसेन्यादीः वर्णयति ।**

३५. **शौरसेनी च गौडी च लाटी चान्या च तादृशी।**
**याति प्राकृतमित्येष व्यवहारेषु सन्निधिम् ।।**

**पदच्छेदः** - चान्या - च + अन्या। प्राकृतमित्येषः - प्राकृतम् + इति + एषः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| तादृशी | - | महाराष्ट्र्याादिसदृशी |
| शौरसेनी च गौडी च | - | शूरसेनदेशस्था गौडदेशस्था च |
| लाटी चान्या च | - | लाटदेशस्था अन्या मागधदेशस्था च |
| प्राकृतम् इत्येषः | - | प्राकृतम् इति नाम्ना |
| व्यवहारेषु सन्निधिं याति | - | नाट्यशास्त्रादिषु व्यवहारेषु आगता |

**सारः** - महाराष्ट्री इव शूरसेनगौडादिषु देशेषु व्यवहृताः भाषाः शौरसेनी, गौडी, लाटी, मागधी इत्यादिना नाम्ना प्राकृतभाषारूपेण प्रसिद्धिं प्रापुः ।

| | | |
|---|---|---|
| शौरसेनी | - | मथुरासन्निहितदेशस्था प्राकृतभाषा |
| गौडी | - | वङ्गसमीपवर्तिनी प्राकृतभाषा |
| लाटी | - | कर्णाटयुता देशस्था प्राकृतभाषा |
| मागधी | - | मगधदेशस्था (प्राची) प्राकृतभाषा |

**अपभ्रंशविभागं वर्णयति ।**

३६. **आभीरादिगिरः काव्येष्वपभ्रंशः इति स्मृताः।**
**शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम् ।।**

**पदच्छेदः** - काव्येष्वपभ्रंशः - काव्येषु + अपभ्रंशः ।
संस्कृतादन्यदपभ्रंशतयोदितम् - संस्कृतात् + अन्यत् + अपभ्रंशतया + उदितम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| आभीरादिगिरः | - | आभीरादीनां (गोपशाबरादीनां) गिरः वाचः |
| काव्येषु अपभ्रंशः इति स्मृताः | - | काव्येषु अपभ्रंशः इति पदेन उच्यते |
| शास्त्रेषु | - | अलङ्कारशास्त्रेषु |
| संस्कृतादन्यत् अपभ्रंशतया | - | संस्कृतम् अपभ्रंशम् इति भेदद्वयमेव |
| उदितम् | - | सूच्यते |

**सारः** - जात्यानुसारं भाषाप्रयोगे आभीरादयः अपभ्रंशाः भवन्ति। काव्ये एव अपभ्रंशपदवाच्यत्वम्। शास्त्रे तु संस्कृतम् अपभ्रंशः इति विभागद्वयमेव । संस्कृतात् भिन्नः अपभ्रंशः।

**प्रबन्धविषये भाषानियमः।**

३७. **संस्कृतं सर्गबन्धादि प्राकृतं स्कन्धकादि यत्।**
**ओसरादिरपभ्रंशो नाटकादि तु मिश्रकम्।।**

**पदच्छेदः** - ओसरादिरपभ्रंशः - ओसरादिः + अपभ्रंशः ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| सर्गबन्धादि संस्कृतं | - | महाकाव्यादिकं संस्कृते निबन्धनीयम् |
| यत् स्कन्धकादि | - | स्कन्धकः छन्दोविशेषः, तादृशं यत् काव्यं |
| प्राकृतं | - | प्राकृतभाषायां |
| ओसरादिरपभ्रंशः | - | ओसरो नाम छन्दोभेदः, तद् अपभ्रंशभाषायामेव विधातव्यम् |
| नाटकादि तु मिश्रकं | - | नाटकरचना तु नानाभाषाभिः मिश्रितं भवेत्। (पात्रभेदेन भाषाभेदः) |

**सारः** - भाषाभेदेन काव्यलक्षणानि निरुक्तानि। महाकाव्यं संस्कृतमयम्, स्कन्धकं प्राकृतमयम्, ओसरादिः अपभ्रंशमयम्, नाटकादि तु नानाभाषामयमिति ।

**गद्यकाव्ये भाषानियमं सूचयति ।**

३८. **कथा हि सर्वभाषाभिः संस्कृतेन च वर्ध्यते ।**
**भूतभाषामयीं प्राहुरद्भुतार्थीं बृहत्कथाम्।।**

**पदच्छेदः** - प्राहुरद्भुतार्थीम् - प्राहुः + अद्भुतार्थीम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| कथा हि सर्वभाषाभिः | - | कथाचरना हि सर्वविधाभिः प्राकृतभाषाभिः |
| संस्कृतेन च | - | संस्कृतभाषया च विरच्यते (कथायां भाषानियमो नास्ति) |
| भूतभाषामयीं | - | पैशाचभाषया उपनिबद्धाम् |
| अद्भुतार्थीं | - | रमणीयवृत्तघटितां |
| बृहत्कथां प्राहुः | - | बृहत्कथा नाम ग्रन्थमाहुः । |

**सारः** - कथायां भाषानियमो नास्ति। कथा सर्वभाषाभिः प्राकृतभाषाभिः संस्कृतेन च विरच्यते। गुणाढ्येन पैशाचीभाषायां रचिता बृहत्कथा रमणीयवृत्तघटिता भवति।
पैशाचीभाषायां रचिता बृहत्कथा सम्प्रति नोपलभ्यते। तदनुवादभूता बृहत्कथा एव इदानीं लभते।

**लास्यादीन् विशदयति।**

३९. **लास्यच्छलितशम्पादि प्रेक्षार्थम् इतरत् पुनः।**
**श्रव्यमेवेति सैषापि द्वयी गतिरुदाहृता।।**

**पदच्छेदः** - श्रव्यमेवेति - श्रव्यम् + एव + इति। सैषापि - सा + एषा + अपि ।
गतिरुदाहृता - गतिः + उदाहृता ।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| लास्यच्छलितशम्पादि | - | स्त्रीजनकृतं श्रृङ्गाररसप्रधानं नृत्तं लास्यं, पुंनृत्तं, च्छलितं, शम्पा पूर्वरङ्गान्तर्गतः वाद्यविशेषः इत्यादीनि |
| प्रेक्षार्थं | - | अवलोकनार्थं वर्तमानं काव्यमेव श्रव्यानि |

| | | |
|---|---|---|
| इतरत् पुनः श्रव्यमेव | - | नृत्तादिभिन्नं महाकाव्यादीनि श्रव्याणि |
| एषा अपि द्वयी गतिरुदाहृता | - | श्रव्यं दृश्यमिति काव्यस्य द्वैविध्यं प्राचीनैः उदाहृता। |

**सारः** - स्त्रीजनकृतं श्रृङ्गाररसप्रधानं नृत्तं लास्यम्। पुंनृत्तं च्छलितम्। पूर्वाङ्गान्तर्गतः वाद्यविशेषः शम्पा। एतानि दृश्याणि, महाकाव्यादीनि श्रव्याणि । दृश्यं श्रव्यं इति काव्यं द्विधा आचार्याः विभजन्ति।

भो मित्राणि,

पाठ्यक्रमे वर्तमानाः भागः समाप्तः । विस्तृतं विवरणं दत्तम्। स्वयमेव पठितुं शक्यते ।

## पुनरावृत्तिः (Recap)

- नाटकादि मिश्रकाव्यम्। गद्यपद्यमयी चम्पूः।
- गद्यपद्यमिश्रात्मकं वाङ्मयं संस्कृतं, प्राकृतं, अपभ्रंशः, मिश्रं चेति चतुर्था विभक्तम्।
- देवव्यवहार्या यास्कादिभिः प्रकृतिप्रत्ययादिदर्शनेन व्याख्याता वाणी संस्कृतम्।
  संस्कृतादुत्पन्नः प्राकृतः। प्राकृतस्य तद्भवतत्समदेश्यादिरूपाः अनेके भेदाः।
- महाराष्ट्री शौरसेनी गौडी लाटी इत्यादयः प्राकृतभाषाः। तासु महाराष्ट्री नितरां प्रसिद्धा।
- आभीरादिगिरः अपभ्रंशाः। शास्त्रे संस्कृतं अपभ्रंशः इति विभागद्वयमेव ।
- महाकाव्यं संस्कृतमयं, स्कन्धकं प्राकृतमयं, ओसरादिः अपभ्रंशमयं, नाटकादि तु नानाभाषामयमिति ।
- कथायां भाषानियमो नास्ति । कथा सर्वभाषाभिः संस्कृतेन च विरच्यते ।
- पैशाचिकभाषायां रचितः रमणीयवृत्तघटितः ग्रन्थः भवति बृहत्कथा। गुणाढ्यः अस्य कर्ता। पैशाच्यां रचितोऽयं ग्रन्थः इदानीं नोपलभ्यते। संस्कृतानुवादः वर्तते।
- लास्यं नाम स्त्रीजनैः क्रियमाणं श्रृङ्गाररसप्रधनं नृत्तमेव। पुंकृतं नृत्तमेव च्छलितम्। शम्पा पूर्वरङ्गान्तर्गतः वाद्यविशेषः।
- दृश्यं श्रव्यं चेति काव्यं प्राचीनाः द्विधा विभजन्ति ।
- काव्यं तु इष्टार्थव्यवच्छिन्ना पदावलिः। गद्यं पद्यं मिश्रं चेति काव्यं त्रिधा। अपादः पदसन्तानो गद्यम्। पद्यं चतुष्पदी। गद्यपद्योभयं मिश्रम्। गद्यपद्योभयमयं काव्यं चम्पूरित्यभिधीयते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. 'देवी वागन्वाख्याता महर्षिभिः' किम् ?
2. प्रवरसेनेन रचितः ग्रन्थः कः ?
3. बृहत्कथायाः कर्ता कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

1. सर्गबन्धादीनां भाषा का ?
2. किं नाम लास्यम् ?

## एकैकया खण्डिकया उत्तराणि लिखत ।

**(Answer the question in a paragraph)**

1. बृहत्कथायाः प्राधान्यम् ।
2. लास्यं च्छलितं शम्पा च।
3. काव्यभेदाः ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. संस्कृतम्।
2. सेतुबन्धः ।
3. गुणाढ्यः।

## सूचनाग्रन्थौ (References)


1. दण्डी, काव्यादर्शः, व्याख्या आचार्यः श्रीरामचन्द्रमिश्रः, प्रथमः परिच्छेदः, कारिका १-३९ चौखम्बा विद्याभवनम्, वाराणसी, १९९८ पुटं १-३८
2. आचार्यलोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अकादमी, वारणासी, २०१६, पुटं ६६- १६७

BLOCK - 3

# काव्यप्रकाशः-(मम्मटः) प्रथमोल्लासः

SGOU

# Unit - 1
# मङ्गलश्लोकः, काव्यप्रयोजनं, काव्यहेतुश्च।

## उद्देश्यानि (Learning Outcomes)

- साहित्यशास्त्रे सामान्यावबोधाय ।
- अलङ्कारशास्त्रपठने तात्पर्यसम्पादनाय ।
- संस्कृतसाहित्यसिद्धान्तानां परिचयाय ।
- भारतीयालङ्कारिकान्, तेषां योगदानं चाधिकृत्य अवबोधनाय ।
- विविधानामालङ्कारिकाणां काव्यलक्षणविषये मतभेदावगमनाय ।
- काव्यप्रयोजनस्य, काव्यहेतोः च अवबोधाय ।
- काव्यशास्त्रशिक्षणेन छात्राणां मानसिकविकासाय ।

## प्राग्व्यपेक्षाः (Pre requisites)

**अलङ्कारशास्त्रम् ।**

काव्यसौन्दर्यशास्त्रम् अलङ्कारशास्त्रमिति व्यवह्रियते। अलङ्कारशास्त्रमिति नाम अतिप्राचीनम्। प्राचीनकाले अलङ्काराणां प्रयोगबाहुल्यमासीत् इति प्रतीयते। राजशेखरेण तत् स्पष्टमकरोत्। साहित्यविद्या इति नाम्ना अलङ्कारशास्त्रं व्यपदिश्यते। काव्यरचनानैपुण्याय अलङ्कारशास्त्रमावश्यकम्। यथा भाषाव्युत्पत्तेः व्याकरणशास्त्रम् ।

अथ कोऽयमलङ्कार इति चिन्तायां अलङ्क्रियते अनेन इति करणव्युत्पत्या यमकोपमादयः अलङ्काराः। तथापि अलङ्कृतिरलङ्कारः इति भावव्युत्पत्या दोषापगमनेन गुणालङ्कारादानेन च सौन्दर्यपरः एवालङ्कारः इति च। तत्र च प्रमाणं वामनाचार्यस्य 'काव्यं ग्राह्यमलङ्कारात्', 'सौन्दर्यमलङ्कारः', 'स दोषगुणालङ्कारहानादानाभ्याम्' इत्यादि। इदं शास्त्रं दोषगुणादीनामपि प्रतिपादकं भवति। यमकोपमादीनाम् अलङ्काराणां च विषयतया काव्यव्यवहारप्रयोजकतया च शास्त्रे प्रधानत्वेन तत्प्रतिपादकत्वात् अलङ्कारशास्त्रमिति।

**आचार्यमम्मटभट्टः।**

नैके सन्ति आलङ्कारिकाः काव्यविमर्शकाराः। तत्र भरत-भामह-दण्डि-रुद्रट-वामनान्ताः प्राचीनाः अलङ्कारशास्त्रकर्तारः। पुनः कुन्तक-आनन्दवर्धन-अभिनवगुप्त-क्षेमेन्द्र-विश्वनाथ-पण्डितराजजगन्नाथ-महिमभट्ट-मम्मटप्रभृतयः आलङ्कारिकाः अनेके। तेषां कृतयः यथाक्रमं

नाट्यशास्त्रं, काव्यालङ्कारः (भामहः), काव्यादर्शः, काव्यालङ्कारः (रुद्रटः), काव्यालङ्कारसूत्रवृत्तिः, वक्रोक्तिजीवितं, ध्वन्यालोकः, लोचनव्याख्या, औचित्यविचारचर्चा, साहित्यदर्पणः, रसगङ्गाधरः, व्यक्तिविवेकः काव्यप्रकाशः एवमादयः।

आचार्योऽयं मम्मटः काश्मीरनिवासी जैयटपुत्रः आसीत्। वाराणसीमागत्य अधीतशास्त्रः अभवत् सः। ध्वनिविरोधिनां मतं खण्डयित्वायमाचार्यः सुन्दररूपेण ध्वनिनिरूपणं कृतवान्। अयं मुख्यतया वैयाकरणः आसीत्। वैयाकरणसरणेः अनुसारेण सूत्रात्मिका अस्य लेखनशैली। कारिका एव सूत्र इति व्यवह्रियते। अयं हि काव्यप्रकाश इति अलङ्कारशास्त्रग्रन्थस्य कर्ता भवति।

**काव्यप्रकाशः।**

अलङ्कारशास्त्रग्रन्थेषु अन्यतमो भवति काव्यप्रकाशः। तस्य दश उल्लासाः सन्ति। ग्रन्थस्यास्य त्रयो अंशाः। कारिका, वृत्तिः, उदाहरणं चेति। प्रथमोल्लासे मङ्गलाचरणानन्तरं काव्यफलं, काव्यहेतुः, तददोषौ.. …….इत्यादिना काव्यस्वरूपम्, उत्तममध्यमाधमभेदेन काव्यभेदाश्च निरूपिताः। पुनः शब्दार्थौ काव्यम् इत्युक्तत्वात् द्वितीयोल्लासे वाचकलक्षकव्यञ्जकशब्दान् वाच्यलक्ष्यव्यङ्ग्याद्यर्थान्, अभिधालक्षणाव्यञ्जनादिव्यापारान् च प्रतिपादितवान् कविः। तृतीयोल्लासे अर्थस्य व्यञ्जकता। चतुर्थे ध्वनिकाव्यप्रभेदाः रसभावादयः च व्यक्तीकृताः। पञ्चमोल्लासे गुणीभूतव्यङ्ग्यादयः षष्ठोल्लासे शब्दार्थचित्रनिरूपणञ्च कृतम्।

## मुख्यपदानि (Keyterms)

मङ्गलश्लोकः, काव्यप्रयोजनं, काव्यहेतुश्च, नियतिकृतनियमरहितां - शक्तिः, निपुणता, अभ्यासः।

## Discussion

### अथ प्रथमोल्लासः।

### मङ्गलश्लोकः

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति ।

ग्रन्थस्य आदौ बाधानां नाशाय विषयोपयुक्ताम् इष्टदेवतां ग्रन्थकृत् मम्मटाचार्यः संस्मरति।

**नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।**
**नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ।।**

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| नियतिकृतनियमरहितां | - विधिविहितव्यवस्थारहितम् |

| | |
|---|---|
| ह्लादैकमयीम् | - सुखमात्रस्वभावाम् |
| अनन्यपरतन्त्राम् | - न पराधीनाम् |
| नवरसरुचिरां | - श्रृङ्गारादिकाव्यरसमनोहराम् |
| निर्मितिम् | - रचनां |
| आदधती | - समन्तात् दधाना |
| कवेः भारती | - काव्यकर्तुः काव्यमयी सृष्टिः |
| जयति | - सर्वोत्कृष्टतया विलसति |

**सारः** - कवेः भारती नियतिकृतेभ्यो नियमेभ्यो रहितां सुखमात्रस्वरूपां सर्वतन्त्रस्वतन्त्रतया वर्तमानं श्रृङ्गारादिनवरसमनोहरां रचनां दधाति। अतः सर्वोत्कृष्टतया विराजते।

नियतिशक्त्या नियतरूपा सुखदुःखमोहस्वभावा परमाण्वाद्युपादानकर्मादिसहकारिकारणपरतन्त्रा षड्रसा न च हृद्यैव तैः तादृशी ब्रह्मणो निर्मितिः निर्माणम्। एतद्विलक्षणा तु कविवानङ्निर्मितिः अत एव जयति, जयतीत्यर्थेन च नमस्कार आक्षिप्यत इति तां प्रत्यस्मि प्रणत इति लभ्यते।

नियतेः अदृष्टरूपायाः शक्त्या नियतं-नियमितं रूपं यस्याः सा सुखदुःखमोहस्वभावा परमाण्वाद्युपादानकारणा उत्क्षेपणादिकर्मसहकारिकारणाधीना मधुरादि षड्रससहिता, मधुरादिरसैः न हृद्या तैः तादृशी ब्रह्मणः निर्माणम्। किन्तु एतद्विलक्षणा चारुरूपा श्रृङ्गारादिरसान्विता तु कविनिर्मितिः जयति- उत्कर्षश्रियो भवति। जयतीत्यर्थेन नमस्कारः आक्षिप्यते इति च। कविभारतीं प्रति ग्रन्थकर्ता मम्मटः प्रणयोऽस्ति।

## काव्यप्रयोजनम्

इहाभिधेयं सप्रयोजनमित्याह-

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।।**

इह - अस्मिन् ग्रन्थे अभिधेयं तददोषौ शब्दार्थौ इत्यारम्भ्य वक्ष्यमाणं काव्यं सप्रयोजनमिति।

काव्यं, यशसे – कीर्तिलाभाय, अर्थकृते - धनकरणार्थं, व्यवहारविदे – आचारवेदनार्थं, शिवेतरक्षतये - अमङ्गलनाशाय, सद्यः-श्रवणसमनन्तरमेव, परनिर्वृतये - परमानन्दार्थं, कान्तासम्मितं - मनोरमायाः तुल्यं तया उपदेशयुजे सदुपदेशाय च भवति।

कालिदासादीनामिव यशः। श्रीहर्षधावकादीनामिव धनम्। राजादिगतोचिताचारपरिज्ञानम्। आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्। सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्। प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्

पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोति इति सर्वथा तत्र यतनीयम्।

**व्याख्या -**

काव्यं कालिदासादीनामिव यशो-लाभाय। श्रीहर्षधावकादीनामिव धनलाभाय। राज्ञिसचिवगुरुमुन्यादौ यतोचिताचारपरिज्ञानाय पृथिवीपरिपालनादि व्यवहारज्ञानाय। अनर्थस्य पापस्य वा निवारणाय। मयूरकविः कुष्टरोगाक्रान्तः शतश्लोकात्मकं सूर्यस्तुतिरूपं काव्यम् अकार्षीत्। तस्मिन् तृप्तः सूर्यः तस्मै नीरोगां रमणीयां शरीरं दत्तवान् इति जनश्रुतिः । सकलेषु यशः प्रभृतिषु प्रयोजनेषु प्रधानभूतं काव्यश्रवणानन्तरमेव रसास्वादनेन निष्पन्नं ज्ञेयान्तरसम्पर्कशून्यं मोक्षकालिकब्रह्मानन्दसदृशम्। प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः (शब्दस्त्रिधा -प्रभुसम्मितः, सुहृत्सम्मितः, कान्तासम्मितश्चेति) तत्र शब्दप्रधानो वेदस्मृतिरूपः आद्यः। सुहृत्सम्मिताः मित्रतुल्याः अर्थतात्पर्यवन्तो ये पुराणादयः इतिहासाख्यानादयश्च। प्राचीन वृत्तवर्णनानि तेभ्यो विलक्षणम्। वाच्यवाचकयोः गुणभावेन अप्रधानतया रसस्य श्रृङ्गारादेः अङ्गभूतो यो व्यापारः विभावानुभावव्यभिचारिभावानां मेलनं व्यञ्जना तत्प्रवणतया विलक्षणं- विसदृशं यत् काव्यं लोकोत्तरचमत्कारबोधजनिकावर्णनानिपुणस्य कवेः कर्म तत् कान्ता इव रससहितत्वापादनेन अभिमुखीकृत्य रामादिवत् प्रजापालनादिकार्ये प्रवर्तितव्यम्, दुष्टरावणादिवत् परदाराहरणरूपादिकार्ये न प्रवर्तितव्यम् इत्याद्युपदेशं यथायोग्यं कवेः सहृदयस्य च करोति इति । सर्वप्रकारेण तत्र काव्ये उत्पादनाय आस्वादनाय च यत्नः करणीयः इति।

## काव्यहेतुः

एवमस्य प्रयोजनमुक्त्वा कारणमाह –

**शक्तिर्निपुणता लोकशास्त्रकाव्याद्यावेक्षणात् ।**
**काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ।।**

शक्तिः लोकशास्त्रकाव्याद्यावेक्षणात् व्युत्पत्तिः काव्यज्ञशिक्षयाभ्यासः इति त्रितयं काव्यस्य उद्भवहेतुः इति। शक्तिः कवित्वबीजरूपः संस्कारविशेषः। यो विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात्। लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य शास्त्राणां छन्दोव्याकरणाभिधान-कोश-कलाचतुर्वर्गे गजतुरगखड्गादिलक्षणग्रन्थानां काव्यानां च महाकविसम्बन्धिनाम्। आदिग्रहणादितिहासादीनां च विमर्शनात् व्युत्पत्तिः। काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनपुन्येन प्रवृत्तिरिति त्रयः समुदिता न तु व्यस्तास्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुः न तु हेतवः।

**व्याख्या-**

शक्तिः कवित्वबीजरूपः संस्कारविशेषः देवताराधनादिजन्यरसादिविषयकवासनाविषयः। शक्तिं

विना काव्यं न प्रसरेत् न जायेत वा प्रसृतं वा उपसहनीयं दोषवैशिष्ट्यात्। स्थावरः स्वाधीनक्रियाशून्यः। तदितरो जङ्गमः। स्थावरजङ्गमात्मकलोकवृत्तस्य शास्त्राणां - छन्दःशास्त्रं वर्णादिनियमबोधकं शास्त्रम्। व्याकरणं प्रकृतिप्रत्ययविभागपूर्वकशब्दव्युत्पत्याधायकं शास्त्रम्। अभिधानकोशः नाम्नां कोशः। कलाः नृत्यगीतादि चतुःषष्टिकाः। चतुर्वर्गः धर्मार्थकाममोक्षाः। गजतुरगग्रन्थः शालिहोत्रादिः। खड्गः करवालः। आदिपदात् धनुर्बाणादिप्रतिपादकस्य स्त्रीपुरुषलक्षणप्रतिपादकसामुद्रिकादेः आयुर्वेदज्योतिशास्त्रादेश्च ग्रहणम्। महाकवि वाल्मीक्यादयः ।

इतिहासक्षणं यथा -

**धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।**
**पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते ।।**

महाभारतादिः विमर्शनात् पुनः पुनस्तत्तत्पदार्थरसादिगोचरानुसन्धानात् व्युत्पत्तिः। तत्तदर्थरसादिगतो दृढतरसंस्कारः।

पौनपुन्येन प्रवृत्तिरिति त्रयः शक्तिः, निपुणता, अभ्यासः समुदिताः। एवमादिः तस्य हेतुः।

## पुनरावृत्तिः (Recap)

- निर्विघ्नतापूर्वकं ग्रन्थसमाप्त्यै मङ्गलाचरणं कविना कृतम्।
- नियतिकृतनियमरहितां ह्लादैकमयी, अनन्यपरतन्त्रा, नवरसरुचिरा च भवति कवेः भारती।
- काव्यं सहृदयाय ससास्वादनात्मकं परमानन्दं ददाति।
- काव्यं कालिदासादीनामिव यशोलाभाय।
- मयूरकविः कुष्टरोगाक्रान्तः शतश्लोकात्मकं सूर्यशतकं रचितवान्।
- उपदेशविधिः त्रिविधः- प्रभुसम्मितः, सुहृत्सम्मितः, कान्तासम्मितश्च।
- शब्दप्रधानो वेदस्मृतिरूपः प्रभुसम्मितः।
- सुहृत्सम्मिताः अर्थतात्पर्यवन्तो पुराणादयः।
- काव्यं कान्तासम्मितं सरसं भवति।
- काव्यकारणतायां प्रथमं शक्तिः(प्रतिभा) भवति।
- कवित्वबीजरूपः संस्कारविशषः शक्तिः।
- मम्मटमते शक्तिः निपुणता अभ्यासश्च, एतत्त्रयं मिलितं काव्यहेतुः भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. काव्यप्रकाशग्रन्थे मम्मटस्य इष्टदेवता का ?
2. कविभारतीनिर्मितिः कथं रुचिरा ?
3. जयतिपदेन कोऽर्थः प्रतीयते ?

4. पुरुषार्थचतुष्टये कस्य प्राप्तिः काव्यात् भवति ?
5. मयूरकविना रचितः ग्रन्थः कः?
6. काव्यप्रयोजनेषु मुख्यं प्रयोजनं किम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

1. मङ्गलश्लोकस्याशयः कः ?
2. कविसृष्टिः कस्याधीना?

## एकैकया खण्डिकया उत्तराणि लिखत ।

**(Answer the question in a paragraph)**

1. काव्यप्रयोजनानि।
2. काव्यकारणम्।

## निर्दिष्टाभ्यासः (Assignments)

1. काव्यरचनायाः हेतुः।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. वाग्देवी सरस्वती।
2. सुखमात्रस्वभावात् कविभारतीनिर्मितः सर्वेषां रुचिरा भवति।
3. मङ्गलपद्ये 'जयति' पदेन नमस्कारः प्रतीयते।
4. अर्थस्य प्राप्तिः।
5. सूर्यशतकम्।
6. रसास्वादरूपः परमानन्दः।

## सूचनाग्रन्थाः (References)


1. मम्मटाचार्यः, काव्यप्रकाशः, चौखम्बा प्रकाशन्, वाराणसी, 2019
2. विश्वनाथः, साहित्यदर्पणः, चौखम्बा विद्याभवन्, वाराणसी, 1985
3. मम्मटाचार्यः, काव्यप्रकाशः, काव्यस्वरूपनिर्णयः खण्डः-1, राष्ट्रीयसंस्कृतसंस्थान प्रसिदाधीकरणम्, नवदेहली 2014

# Unit - 2
# काव्यस्वरूपं काव्यभेदश्च ।

## उद्देश्यानि (Learning Outcomes)

- काव्यस्वरूपं जानाति।
- काव्यस्वरूपभेदान् सुष्ठु निरूपयितुं समर्थो भवति।
- मम्मटोक्तं काव्यस्वरूपं प्रतिपादयति।
- अनलङ्कृतशब्दार्थयुगलस्य काव्यस्य उदाहरणं जानाति।

## प्राग्व्यपेक्षाः (Pre requisites)

'शब्दार्थौ सहितौ काव्यम्' इति काव्यस्य सामान्यं लक्षणम्। भामह-रुद्रट-राजशेखरादयः एवं वदन्ति। इष्टार्थव्यवच्छिन्ना पदावली काव्यमिति दण्डी। काव्यस्यात्माध्वनिः इति आनन्दवर्धनः। ये पूर्वाचार्याः 'शब्दार्थौ' अथवा 'पदावली' काव्यं वदन्ति, ते काव्यस्य बाह्यस्वरूपं शरीरं लक्षयन्ति। काव्योत्कर्षाधायकाः गुणालङ्काररीतयः। क्षेमेन्द्रः औचित्यं काव्यजीवितमिति उक्तवान्। मम्मटाचार्यः समन्वयवादी काव्यशास्त्री भवति। सः परमतं न दूषयति। स महात्मा सूत्ररूपेण स्वप्रतिपाद्यविषयं प्रकाशयति। अतः सर्वेषां पूर्वाचार्याणां काव्यस्वरूपविषयकं मतं समीक्ष्य मम्मटः वेदादिशास्त्रोपदेशसमानं विधिनिषेधविकल्पात्मकं स्वकीयं काव्यस्वरूपं प्रकाशयति अस्मिन्नेकके।

## मुख्यपदानि (Keyterms)

काव्यस्वरूपं काव्यभेदाश्च, शब्दार्थौ, स्फुटालङ्कारविरहे, कौमारहरः, कदम्बानिलाः, काव्यभेदाः-उत्तम-मध्यम-अधमभेदाः।

## Discussion

एवं काव्यस्य कारणमुक्त्वा स्वरूपमाह -

### तददोषौ शब्दार्थौ सगुणावानलङ्कृती पुनः क्वापि।

शब्दार्थौ तत् काव्यं अदोषौ - काव्यत्वविघटका ये च्युतसंस्कारादयः प्रबलदोषाः तद्रहितौ सगुणौ माधुर्यौजप्रसादाख्या ये गुणाः तत्सहितौ। अनलङ्कृती अत्र नञः अल्पार्थकत्वेन अस्फुटार्थकत्वम्। तदुक्तं सर्वत्र सालङ्कारौ शब्दार्थौ काव्यम्। क्वचित् स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः। दोषगुणालङ्काराः वक्ष्यन्ते क्वापि इत्यनेन एतदाह - यत्सर्वत्र सालङ्कारौ क्वचित्तु

स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः। - यथा

**यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-**
**स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।**
**सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ**
**रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ।।१।।**

| अन्वयः | अव्वयार्थः |
|---|---|
| यः कौमारहरः | - यः प्रियः बाल्यं हतवान् |
| स एव वरः | - सः प्रियः एव पतिः |
| ताः एव चैत्रक्षपाः | - ताः पूर्वमुपभुक्ता एव मधुमासानिशाः च |
| ते एव उन्मीलितमालतीसुरभयः | - पूर्वमास्वादिता एव विकसितमालतीकुसुमशोभनसुगन्धाः |
| प्रौढाः कदम्बानिलाः | - रत्युद्दीपनादिप्रागल्भ्यशालिनः कदम्बवायवः |
| सा च एवमस्मि | - सा चाहमस्मि |
| तथापि तत्र | - उपभुक्तसकलसामग्रीसत्वेऽपि पुर्वोपभुक्ते |
| रेवारोधसि वेतसीतरुतले | - रेवानद्याः तीरे वेतसीवृक्षस्य अधःप्रदेशे |
| सुरतव्यापारलीलाविधौ | - रतिक्रीडाविषये लीलाविलासादौ |
| चेतः समुत्कण्ठते | - मम मनः उत्कण्ठितमस्ति। |

स्वाधीनपतिकायाः सखीं प्रत्युक्तिरियम्। यः कौमारं हतवान् सः कौमारहरः वरः स एव चैत्ररात्रयः ता एवं सन्ति। उन्मीलितमालतीसुरभयः विकसितवासन्तिकायाः शोभनगन्धाः तैः प्रौढाः रत्युद्दीपकाः कदम्बानिलाः कदम्बपुष्पगन्धाः पवनाः ता एव सन्ति। अहं सा एवास्मि। तथापि तत्र सुरतव्यापारलीलाविधौ रेवानद्याः नर्मदायाः रोधसि तटे वेतसीवृक्षतले सुरतव्यापारविधौ चेतः समुत्कण्ठते।

अत्र स्फुटो न कश्चिदलङ्कारः। रसस्य च प्राधान्यान्नालङ्कारता विप्रलम्भश्रृङ्गारस्य अभिव्यक्त्या रसत्वम्।

स्फुटत्वं झटिति प्रतीयमानत्वम्।

तद्भेदान् क्रमेणाह –उत्तम-मध्यम-चित्रभेदात्।

## पुनरावृत्तिः (Recap)

- काव्यस्यात्माध्वनिः इति आनन्दवर्धनः
- मम्मटाचार्यः समत्ववादी काव्यशास्त्री च भवति।
- सर्वेषां पूर्वाचार्याणां काव्यस्वरूपविषयकं मतं समीक्ष्य मम्मटः वेदादिशास्त्रोपदेशसमानं स्वकीयं

काव्यस्वरूपं प्रकाशयति ।

- तद्दोषौ शब्दार्थौ सगुणावनलङ्कृती पुनःक्वापि ।
- क्वचित् स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः।
- यः कौमारहरः इत्यस्मिन् श्लोके न कश्चिदलङ्कारः स्फुटः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. काव्यसमान्यलक्षणं किम्?
2. 'अनलङ्कृती' इति पदस्य कोऽर्थः?
3. यः कौमारहरः इत्यस्य कोऽर्थः?
4. यः कौमारहरः इत्यस्मिन् श्लोके किं प्रधानतया वर्तते?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

### (Answer the following questions in one or two sentences)

1. मम्मटोक्तं काव्यलक्षणं किम्?
2. पूर्वाचार्येषु शब्दार्थौ काव्यमिति केषां काव्यस्वरूपम् ?

## एकैकया खण्डिकया उत्तराणि लिखत ।

### (Answer the question in a paragraph)

1. पूर्वाचार्याणां काव्यलक्षणानि।
2. 'यः कौमारहरः.........' इति श्लोकस्य सारः।

## निर्दिष्टाभ्यासः (Assignments)

1. मम्मटमते काव्यलक्षणं सोदाहरणं स्पष्टयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. शब्दार्थौ सहितौ काव्यम् ।
2. नास्ति स्फुटा अलङ्कृतिः।
3. यः प्रियः बाल्यं हतवान्।
4. विप्रलम्भशृङ्गारस्य अभिव्यक्त्या रसत्वम् ।

## सूचनाग्रन्थाः (References)

1. श्रीरामचन्द्रमिश्रः, संस्कृतसाहित्योतिहासः, चौखम्बाविद्याभवन्, वाराणसी, १९८५।
2. मम्मटाचार्यः, काव्यप्रकाशः, चौखम्बाप्रकाशन, वाराणसी, २०१९।
3. मम्मटाचार्यः, काव्यप्रकाशः, काव्यस्वरूपनिर्णयः, खण्डः १, राष्ट्रिय संस्कृतसंस्थानप्रसिद्धीकरणम्, नवदेहली, २०१७।

SGOU

# Unit - 3
# उत्तमकाव्यं मध्यमकाव्यं च।

## उद्देश्यानि (Learning Outcomes)

- ध्वनिशब्दस्य व्याख्यानानि अवगच्छति।
- कीदृशं काव्यम् उत्तममिति सोदाहरणं जानाति।
- मध्यमकाव्यं सोदाहरणं अवगच्छति।
- उत्तममध्यमकाव्ययोः भेदं गृह्णाति।

## प्राग्व्यपेक्षाः (Pre requisites)

मम्मटाचार्यः स्वग्रन्थे काव्यप्रकाशे काव्यस्य लक्षणं विशदयति। काव्यशरीरभूतस्य शब्दार्थयुगलस्य अदोषत्वं सगुणत्वं अनलङ्कृतित्वं च सूचितम्। काव्यस्य अनेकता अभिव्यक्ता। अलङ्कारः क्वचित् स्फुटः, अन्यत्र अस्फुटः वा भवतु। सहृदयाह्लादकत्वमेव प्रधानम्।

काव्यमनेकरूपेण भिद्यते। काव्यमार्गे शब्दार्थौ समानरूपेण अपेक्षितौ भवतः। यत्र शब्दार्थौ अप्रधानीभूतौ कमपि अर्थविशेषं प्रकाशयतः सः ध्वनिः। मम्मटः यत्र व्यङ्ग्यार्थः प्रधानीभूतः सः ध्वनिरिति, तदेव उत्तमकाव्यम् इति सूचयति। गुणीभूतव्यङ्ग्यकाव्यं मध्यमकाव्यम्। अस्मिन् एकके उत्तममध्यमकाव्ये सोदाहरणं विशदयति।

## मुख्यपदानि (Keyterms)

उत्तमकाव्यम्, मध्यमकाव्यं च।

## Discussion

### उत्तमकाव्यम्

**इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्यात् ध्वनिर्बुधैः कथितः।**

वाच्याद् अभिधावृत्तिप्रतिपाद्यार्थात् व्यङ्ग्ये व्यञ्जनावृत्तिप्रतिपादिते अर्थे अतिशयिनि अतिचमत्कारजनके सति इदमेतत्काव्यं बुधैः उत्तमं काव्यमिति कथितः।

इदमिति काव्यम् बुधैः वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। ततस्तन्मतानुसारिभिः अन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य।

**व्याख्या -**

इदं-काव्यं, वाच्यात् वाच्यार्थात्, व्यङ्ग्ये - व्यङ्ग्यार्थे, अतिशायिनि-अधिकचमत्कारजनके सति उत्तमं-उत्तमं काव्यम् इति बुधैः-पण्डितैः, कथितः - व्यवह्नितः। बुधैः वैयाकरणैः-पण्डितैः पतञ्जलिप्रभृतिभिः-प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य -प्रधानभूतस्य स्फोटकरूपस्य व्यङ्ग्यरूपकस्य वर्णसमुदायरूपस्य पटादिशब्दस्य, ध्वनिरिति व्यवहारः कृतः- ध्वनिरिति संज्ञा कृता। (स्फोटं स्फुटयति प्रकाशयति इति स्फोट:) ततः - तस्मात् , तन्मतानुसारिभिः - वैयाकरणसिद्धान्तानुसारिभिः अन्यैरपि - आनन्दवर्धनाचार्यैरपि न्यग्भवितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य-अप्रधानीकृत-वाच्यार्थ - व्यञ्जनावृत्तिव्यापारस्य प्रधानीभूतध्वननक्षमस्य, शब्दार्थयुगलस्य-वाचकवाच्योभयस्य (ध्वनिः)। अर्थात् यत्र वाच्यार्थं लाक्षणिकार्थं च परित्यज्य व्यञ्जनार्थस्य प्राधान्यं तत्र ध्वनिः। यथा

**निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो**
**नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।**
**मिथ्यावादिनि दूति ! बान्धवजनस्याज्ञातपीडागमे**
**वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ।।**

वैयाकरणैः महाभाष्यकारादिभिः प्रधानभूतो यः स्फोटं स्फुटयति प्रकाशयति अर्थमिति स्फोटः। तद्रूपं व्यङ्ग्यरूपं व्यञ्जकस्य शब्दस्य ध्वनिः। ध्वनति स्फोटं व्यनक्तीति ध्वनिः इति व्यवहारः कृतः वैयाकरणमतामुसारिभिः। अन्यैः ध्वन्यालोककारप्रभृतिभिः आलङ्कारिकैः न्यग्भावितमप्रधानीभूतं वाच्यं मुख्योऽर्थः येन तादृशस्य व्यङ्ग्यस्य व्यञ्जनेन ध्वननक्षमस्य समर्थस्य शब्दार्थयुगलस्य तद्रूपोत्तमकाव्यस्य ध्वनिः इति व्यवहारः कृतः। उदा - निःशेष.... इत्यादि। नायकानयनाय प्रेषितां तममुपभुज्य समागतां दूतीं प्रति स्नानकार्यप्रकाशनद्वारा सम्भोगं प्रकाशयन्त्या विदग्धोत्तमनायिकायाः उक्तिरियम्। अयि मिथ्यावादिनि, असत्यभाषणशीले, बान्धवजनस्य बन्धुजनस्य, सुहृद्जनस्य अज्ञातपीडागमे अनालोचितदुःखागमे हे दूति। सन्देशहरे त्वं इतः मत्सकाशात् वापीं दीर्घिकां स्नातुं गतासि? बहुधापराधकृतस्य तस्य अधमस्य नायकस्यान्तिकं समीपं नैव गतासि? तव स्तनतटं यथा निःशेषेण च्युतं स्खलितं चन्दनं यस्मात् तथाभूतं, एवं तवाधरः निर्मृष्टरागः एवं नेत्रे नयने दूरेऽपि कज्जलरहिते तथा इयं प्रत्यक्षदृश्यमाना तव तनुः शरीरं पुलकिता। अत्र मिथ्यावादिनि इत्यनेन तदन्तिकमगत्वैव मया गत्वा बहुशः प्रसादिताऽपि नागत इति मिथ्यैव वदसि इति व्यज्यते।

काचित् यत्र वाच्यार्थं लाक्षणिकार्थं च परित्यज्य व्यञ्जनार्थस्य प्राधान्यं तत्र ध्वनिः। यथा

काचित् विद्र्ध उत्तमनायिका दूरस्थस्य स्वनायकस्यानयनार्थं दूतीं प्रेषितवती। सा दूती तदानयनस्थाने तं नायकं संभुज्य नायिकापार्श्वे आगत्य उक्तवती 'मया गत्वा बहुधा प्रसादितोऽपि नागतः'। परं विदग्धा

नायिका सा दूत्याः शरीरलक्षणैः सर्वं ज्ञातवती। विदग्धत्वात् उत्तमस्वभावत्वाच्च सा नायिका साक्षात् नोक्त्वा स्नानकार्यप्रकाशनमुखेन तस्याः संभोगवृत्तं व्यञ्जनया प्रकाशयति।

अत्र तदन्तिकमेव रन्तुं गतासीति प्राधान्येनाऽधमपदेन व्यज्यते ।

## मध्यमकाव्यम्

**अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्।**

अतादृशि वाच्यादनतिशयिनि ।

व्यङ्ग्ये व्यङ्ग्यार्थे वाच्यादनतिशयिनि वाच्यापेक्षया अतिशयचमत्काराजनके सति मध्यमं गुणीभूतव्यङ्ग्यं काव्यम्। वाच्यार्थः व्यङ्ग्यापेक्षया अधिकास्वाददायी विद्यते तत्र गुणीभूतव्यङ्ग्यं मध्यमं काव्यम्। यथा-

**ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।**
**पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ।।**

अत्र वञ्जुललतागृहे दत्तसंकेता नागतेति व्यङ्ग्यं गुणीभूतं, तदपेक्षया वाच्यस्यैव चमत्कारित्वात्। स्वयमेव संकेतं कृत्वा गृहकार्यवशेन संकेतस्थानमनागतायाः सङ्केतस्थानगमनं ज्ञापयितुं तत्रत्यवञ्जुलमञ्जरीमादाय उपगतमुपनायकं दृष्ट्वा विषण्णायाः कस्याश्चिदुपनायिकायाः वर्णनमिदं ग्रामतरुण... इति।

नववञ्जुलस्य नूतनाशोकस्य, मञ्जरीसनाथकरं मञ्जरी युक्तकरं ग्रामतरुणं मुहुः भृशं पश्यन्त्या तरुण्याः मुखच्छाया नितराम् अत्यन्तं मलिना भवतीति। (असौ तत्र समये गतः, मया तु गृहकर्मसक्तत्वात् तत्र गमनं विस्मृतमेव)

अत्र ग्रामतरुण इत्यनेन ग्रामे एकः तरुणः तेन ग्रामस्थसकलयुवतिप्रार्थ्यमानतया दुर्लभत्वं व्यज्यते। तरुणं तरुण्या इत्यनेन द्वयोः तरुणत्वेन परस्परानुरागोत्कर्षो व्यज्यते।

### पुनरावृत्तिः (Recap)

- वाच्यात् व्यङ्ग्ये अतिशायिनी उत्तमं काव्यम्।
- वाच्यार्थः व्यङ्ग्यापेक्षया अधिकास्वाददायी चेत् मध्यमं काव्यम्।
- काव्यस्य अनेकता अभिव्यक्ता।
- यत्र शब्दार्थौ अप्रधानीभूतौ कमपि अर्थविशेषं प्रकाशयतः सः ध्वनिः।
- 'निशेषच्युतचन्दनम्' इत्ययं श्लोकः उत्तमकाव्यस्योदाहरणम्।
- 'निशेषच्युतचन्दनम्' इत्यस्मिन् श्लोके वर्तमाना नायिका उत्तमनायिका भवति।
- नायकं संभुज्य प्रत्यागता दूती 'मया गत्वा बहुधा प्रसादितोऽपि नागतः' इत्युवाच।

- वाच्यादनतिशायिनि व्यङ्ग्ये मध्यमकाव्यम्।
- ग्रामतरुणं तरुण्या इत्ययं श्लेकः मध्यमकाव्यस्योदाहरणम्।
- सङ्केतस्थानात् निवृत्य आगच्छन्तं स्वप्रियं ग्रामतरुणं वीक्ष्य तरुण्याः मुखकान्तिः मलिना जाता।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. काव्यप्रकाशस्य कर्ता कः?
2. काव्यमार्गे कौ समानरूपेण अपेक्षितौ भवतः ?
3. का नामध्वनिः?
4. उत्तमं काव्यं किम्?
5. पतञ्जलिः कः?
6. न्यग्भावितवाच्यार्थः इत्यस्य कोऽर्थः ?
7. 'निःशेषच्युतचन्दनम्' इत्ययं श्लोकः कीदृशस्य काव्यस्योदाहरणं भवति?
8. 'मिथ्यावादिनी' इत्यस्य कोऽर्थः ?
9. किं नाम मध्यमं काव्यम्?
10. 'ग्रामतरुणं तरुण्या' इत्ययं श्लोकः कस्योदाहरणं भवति ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
### (Answer the following questions in one or two sentences)

1. मम्मटमते काव्यलक्षणं किम्?
2. 'ग्रामतरुणं तरुण्या' इत्यस्मिन् श्लोके व्यङ्ग्यं किम् ?

## निर्दिष्टाभ्यासः (Assignments)

1. उत्तममध्यमकाव्ययोः लक्षणं संसूच्य सोदाहरणं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. मम्मटः।
2. शब्दार्थौ।
3. वाच्यार्थापेक्षया व्यग्यार्थस्य प्राधान्ये ध्वनिः।
4. वाच्यार्थस्य अतिशायिनी व्यङ्ग्ये बुधैः ध्वनिः कथितः, तदेव उत्तमकाव्यम्।
5. कश्चन वैयाकरणाचार्यः।
6. अप्रधानीकृतवाच्यार्थः।
7. उत्तमकाव्यस्य

8. असत्यभाषणशीला।
9. व्यङ्ग्ये अतादृशि गुणीभूतव्यङ्ग्यं मध्यमम्।
10. मध्यमकाव्यम्

## सूचनाग्रन्थाः (References)


1. मम्मटाचार्यः, काव्यप्रकाशः, चौखम्बाप्रकाशन्, वाराणसी, २०१९
2. विश्वनाथः, साहित्यदर्पणः, चौखम्बा विद्याभवन्, वाराणसी
3. मम्मटाचार्यः, काव्यप्रकाशः, काव्यस्वरूपनिर्णयः, खण्डः १, राष्ट्रियसंस्कृतसंस्थानप्रसिद्धीकरणम्, नवदेहली, २०१७

# Unit - 4
# अवरकाव्यम् (चित्रकाव्यम्)

## उद्देश्यानि (Learning Outcomes)

- काव्यस्वरूपं जानाति ।
- काव्यस्वरूपभेदान् सुष्ठु निरूपयितुं समर्थो भवति।
- चित्रकाव्यमधिकृत्य ज्ञानं सम्पादयति ।
- अलङ्कारशास्त्रपरिचयं लभते।

## मुख्यपदानि (Keyterms)

शब्दचित्रम्, अव्यङ्ग्यं, स्वच्छन्दोच्छलत्, विनिर्गतम्, अमरावती।

## Discussion

### अवरकाव्यम् (चित्रकाव्यम्)

शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्।
चित्रमिति गुणालङ्कारयुक्तम्। अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम्। अवरमधमम् ।

**व्याख्या -**

अव्यङ्ग्यम् काव्यं अवरं अधमं स्मृतम्। तदेव अधमं काव्यं चित्रमिति बुधैः कथितम्। शब्दचित्रं, वाच्यचित्रं चेति।

चित्रकाव्यं द्विविधम्। शब्दवैचित्र्यस्य प्राधान्यात् शब्दचित्रम्। अर्थ वैचित्र्यस्य प्राधान्यात् अर्थचित्रमिति। वस्तुतः शब्दार्थौ सहितौ काव्यमिति सिद्धान्तात् शब्दचित्रेऽपि अर्थचित्रम्, अर्थचित्रेऽपि शब्दचित्रम्, तथापि गुणप्रधानभावात् तथाव्यपदेशः।

**शब्दचित्रं यथा -**

**स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-**
**मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः।**
**भिद्यादुद्यदुदारदर्दुरदरी दीर्घादरिद्रद्रुम -**
**द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ।।**

मन्दाकिनी गंगा वः युष्माकं मन्दतां अज्ञानं पापं वा अहनाय झटिति भिद्यात् अपनयतात्। कीदृशी? स्वच्छन्दं स्ववशं यथा स्यात्तथा उच्छलत् उद्गच्छत् अच्छे निर्मलं कच्छस्य तटप्रदेशस्य कुहरे तरङ्गकृतबिले छातं दुर्बलं छातेतरं बलवद् यदम्बुजलं तस्य च्छटा परम्परा तया मूर्च्छन् विनश्यन् मोहो अज्ञानं तैः महर्षिभिः हर्षेण सन्तोषेण विहिते कृते स्नानं च आह्निकं च स्नानाह्निके यस्याः तादृशी उद्यतः प्रकाशमाना उदारा महन्तो दुर्दुरा भेकाः यासु एवं विधा दर्यः कन्दरा यस्यान्तथाभूता तथा दीर्घा आयता अदरिद्राः शाखादिबाहुल्येन अकृशा ये द्रुमाः तेषां द्रोहः पातनं तेनोद्रेक ऊर्ध्वप्रसरणं महोर्मयः बृहत्तरङ्गाः तैः मेदुरः निबिडः मदो गर्वो यस्याः तथाभृता। भगवतीं गङ्गामत्र वर्णयति। सा गङ्गा। स्वच्छन्दं चलन्ती जटायुक्ता भवति। प्रतिदिनं महर्षयः तस्यां स्नानं कुर्वन्ति। तस्याः तटगुहासु विशालाः, मण्डकाः निवसन्ति। गङ्गायाः तरङ्गाः। तटविशालवृक्षादपि अधिकोन्नतिं गच्छन्ति। सा गङ्गा सर्वेषाम् अज्ञानरूपं पापं दूरीकरोतु। अत्र हकारस्य महर्षिहर्षेत्यस्य आह्निकाह्नायेत्यस्य दकारस्य मन्दमन्देत्यस्य च अनुप्रासः शब्दालङ्कारः। यद्यपि मन्दाकिनीविषयो रत्याख्यो भावतीर्थान्तराधिक्यवर्णनाद् व्यतिरेकालङ्कारः च व्यङ्ग्योऽस्ति। अर्थचित्रं यथा -

**विनिर्गतं मानदमात्ममन्दिराद्भवत्युपश्रुत्या यदृच्छयापि यम्।**
**ससंभ्रमेन्द्रद्रुतपतितार्गलानिमीलिताक्षीव भियामरावती ।।**

स्वगृहात् स्वेच्छयामि निःसृतं यं प्रभावशालिनं हयग्रीवम् असुरं श्रुत्वा भयेन इन्द्रद्वारा अमरावती तथापिहितकपाटयुगला संजाता। सा अमरावतीनगरी अबला इव स्वगतभयकारणात् मुकुलितनयना बभूवेति मन्ये ।

मानदं यं (मानं द्यति खण्डयति इति तं मानदम्) हयग्रीवम् आत्मनः मन्दिरात् निजगृहात् यदृच्छया स्वेच्छया अपि विनिर्गतं उपश्रुत्य कर्णेपकर्णिकया श्रुत्वा ससम्भ्रमेण सभयेन इन्द्रेण द्रुतं शीघ्रं पातिता यथाकथञ्चिन्निक्षिप्ता अर्गला कीलकं यस्याः सा अमरावती इन्द्रनगरी भिया भयेन निमीलिताक्षीव सङ्कुचिताक्षीव भवतीत्यर्थः। द्वारस्य नेत्रस्थानापन्नत्वात् सम्प्राते भये नेत्रनिमीलनं स्त्रीणां स्वभावः । अत्र निमीलिताक्षीव इत्युत्प्रेक्षालङ्कारः। उत्प्रेक्षायां कवेः तात्पर्यात् सन्तोऽपि वीररसादयः व्यङ्ग्याः तिरोधीयन्ते इति अव्यङ्ग्यमिदं काव्यम्।

इति प्रथमोल्लासः।

## पुनरावृत्तिः (Recap)

- मम्मटाचार्यः स्वकीयग्रन्थस्य काव्यप्रकाशस्य काव्यस्य लक्षणं विशदयति ।
- यत्र शब्दार्थौ अप्रधानीभूतौ कमपि अर्थविशेषं प्रकाशयतः सः ध्वनिः भवति।
- अव्यङ्ग्यं काव्यं चित्रकाव्यम्।
- चित्रकाव्यम द्विविधं- शब्दचित्रं, अर्थचित्रं च।

- शब्दार्थौ सहितौ काव्यमिति सिद्धान्तात् शब्दचित्रेऽपि अर्थचित्रम्, अर्थचित्रेऽपि शब्दचित्रम्, गुणप्रधानभावात् तथाव्यपदेशः।
- स्वच्छन्दोच्छलत् इत्यस्मिन् श्लोके गङ्गां वर्णयति। अयं श्लोकः शब्दचित्रस्योदाहरणं भवति।
- अत्र अनुप्रासः नाम शब्दालङ्कारः।
- 'विनिर्गतं' इत्ययं श्लोकः अर्थचित्रस्योदाहरणम्।
- अमरावती भयेन निमीलिताक्षीव संजाता इत्युत्प्रेक्षालङ्कारात् अर्थचित्रम्।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. चित्रकाव्यस्य अपरं नाम किम्?
2. चित्रकाव्यं कतिविधम्?
3. महर्षयः कुत्र स्नानं कुर्वन्ति?
4. के वृक्षादप्यधिकोन्नतिं प्राप्ताः भवन्ति?
5. अर्थचित्रस्य उदाहरणश्लोकः कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
**(Answer the following questions in one or two sentences)**

1. चित्रकाव्यस्य कति भेदाः?
2. 'स्वच्छन्दोच्छलदत्' इति श्लोकस्य आशयः कः?
3. अर्थचित्रस्य उदाहरणं किम्?

## एकैकया खण्डिकया उत्तराणि लिखत ।
**(Answer the question in a paragraph)**

1. मध्यमकाव्यस्य लक्षणं किम् ?
2. शब्दचित्रं, वाक्यचित्रं च विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1. चित्रकाव्यस्वरूपं निरूपयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. अवरकाव्यम्।
2. द्विविधम्।
3. गङ्गायाम्
4. गङ्गायाः तरङ्गाः।
5. 'विनिर्गतम्' इत्यारभ्यमाणः श्लोकः।

## सूचनाग्रन्थाः (References)


1. मम्मटाचार्यः, काव्यप्रकाशः - (नागेश्वरीटीकासहितः) Reprint - 2019 चौखम्बाप्रकाशन् पोस्ट् बोक्स् नं -११५० के ३७/११६, गोपालमन्दिर लेन वाराणसी – २२१००१
2. साहित्यदर्पणः – विश्वनाथः (लक्ष्मीव्याख्यासहितः) printed & Published 1985 चौखम्बा विद्याभवन् वाराणसी - २२१००१
3. आचार्यः श्रीरामचन्द्रमिश्रः। संस्कृतसाहित्येतिहासः - Printed & published - 1985 चौखम्बा विद्याभवन् वाराणसी – २२१००१
4. औचित्यविचारचर्चा - महाकवि क्षेमेन्द्रः (प्रभाव्याख्या) Published - 1982 चौखम्बा विद्याभवन् वाराणसी – २२१००१
5. लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वारणासी, २०१६
6. ध्वन्यालोकः- आनन्दवर्धनाचार्यः Malayalam- व्याख्या ई-वि.दामोदरः Published -1973 NBS Kottayam

BLOCK - 4

# काव्यप्रकाशः।
# (मम्मटः)
# द्वितीयोल्लासः।

SGOU

# Unit -1
## कारिका: 6 - 8
(स्याद्वाचको लाक्षणिक इत्यारभ्य व्यापारोऽस्याभिधोच्यते इति पर्यन्तम्)

**उद्देश्यानि(Learning Outcomes)**

- शब्दार्थस्वरूपं जानाति
- प्रधानसङ्केतानि-शब्दार्थस्वरूपः, शब्दत्रैविध्यम्, वाचकलक्षकव्यञ्जकाः, अर्थत्रैविध्यम्, वाच्यलक्ष्यव्यङ्ग्याः, तात्पर्यार्थः, अभिधालक्षणाव्यञ्जनाः च गृह्णाति।

**प्राग्व्यपेक्षाः (Pre requisites)**

काव्यप्रकाशे प्रथमोल्लासे मङ्गलाचरणानन्तरं काव्यप्रयोजनं, काव्यहेतुं, काव्यस्वरूपं, काव्यभेदान् च निरूपयति मम्मटाचार्यः। ततः द्वितीयोल्लासमारभते। तत्रादौ शब्दार्थस्वरूपं प्रतिपादयति। क्रमेण शब्दार्थयोः स्वरुपमाह –

**मुख्यपदानि (Keyterms)** - शब्दः, अर्थाः, शब्दव्यापारः, सङ्केतितः, अभिधा, लक्षणा, व्यञ्जना, वाच्यः, लक्ष्यः, व्यङ्ग्यः, तात्पर्यार्थः, अभिहितान्वयवादिनः, अन्विताभिधानवादिनः।

**Discussion**

**५. स्वाद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।**

काव्ये वाचकः, लाक्षणिकः, व्यञ्जकः चेति शब्दः त्रिविधः। एषां स्वरूपं वक्ष्यते। अर्थाः अपि –

**६. वाच्यादयस्तदर्थाः स्युः।**

वाच्यः, लक्ष्यः, व्यङ्ग्यः चेति अर्थाः त्रिविधाः।

**७. तात्पर्यार्थोऽपि केषुचित्।**

आकांक्षा-योग्यता-सन्निधिवशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीत्यभिहितान्वयवादिनां मतम्। वाच्य एव वाक्यार्थी इत्यन्विताभिधानवादिनः ।

**व्याख्या-**

क्रमेण-क्रमशः, शब्दार्थयोः- शब्दस्य अर्थस्य च, स्वरूपं- विभागम्, आह - ग्रन्थकारःब्रूते।

अत्र- काव्ये, वाचकः- अभिधाशक्तियुक्तः, लाक्षणिकः- लक्षणाशक्तियुक्तः, व्यञ्जकः- व्यञ्जनाशक्तियुक्तः, शब्दः त्रिविधः।

अत्र वाचकादीनां स्वरूपं वक्ष्यते।

वाच्यादयः वाच्यः लक्ष्यः व्यङ्ग्यः च तदर्थाः (वाचकलाक्षणिकव्यञ्जकानां शब्दानामर्थाः) स्युः।

शब्दाः - वाचकः, लाक्षणिकः, व्यञ्जकः चेति।

अर्थाः - वाच्यः, लक्ष्यः, व्यङ्ग्यः चेति।

तात्पर्याख्यवृत्तिप्रतिपाद्यः अपि केषुचित् इति अभिहितान्वयवादिनां मते। आकांक्षादिवशात् वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थः। सः अर्थः विशेषवपुरपदार्थोऽपि - वाच्याद्यर्थविलक्षणशरीरः अपि प्रत्येकपदवृत्यविषयः अपि वाक्यार्थः समुल्लसति - अनुभवविषयो भवतीति अभिहितान्वयवादिनः।

आकांक्षा तु पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वम्। आकांक्षादिरहितं वाक्यमप्रमाणम्। यथा - गौरश्वः पुरुषः हस्तीत्यादि न प्रमाणम्। आकांक्षाविरहात्।

अर्थाबाधो योग्यता। यथा वह्निना सिञ्चति इति न प्रमाणम्। यतः योग्यताविरहात्। वह्नेः सेचनत्वं न दाहकत्वमेव।

पदानामविलम्बेनोच्चारणं सन्निधिः। सन्निधिरहितं वाक्यमप्रमाणम्। प्रहरे प्रहरे सहोच्चारितानि गामानय इत्यादि पदानि न प्रमाणम्। सन्निध्यभावात् ।

## ८. सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते।

वाच्यलक्ष्यव्यङ्ग्यार्थानां प्रायशः व्यञ्जकत्वम् इष्यत इति।

तत्र वाच्यस्य यथा - उपनायकसंगमार्थिन्याः कस्याश्चित् अन्नेन्धनाद्यानयनव्याजेन बहिर्गन्तुं मातरं प्रत्युक्तिरियम्।

**मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया।**
**तद्भण किं करणीयमेवमेव न वासरः स्थायी ।।६।।**

हे मातः! गृहसम्बन्धि उपकरणमन्नेन्धनशाकादिकम् अद्य खलु निश्चितं नास्तीति त्वया साधितं- प्रतिपादितम्। तत् - तस्मात् भण - वद अन्नेन्धनादिसम्पादनार्थ बहिर्गमनमाज्ञापय इति यावत्। किं करणीयमत्र। किञ्च वासरः दिवसः न स्थायी स्थिरः।

अत्र स्वैरविहारार्थिनीति व्यज्यते। इति वक्तृवैश्ष्ट्यात् वाच्यार्थस्य व्यञ्जकत्वमुदाहरति।

लक्ष्यस्य यथा - बोद्धव्यवैशिष्ट्यात् लक्ष्यार्थस्य व्यञ्जकत्वमुदाहरति। प्रियानुनयार्थ प्रेषितां तमुपभुज्यागतां दूतीं प्रति नायिकायाः उक्तिः।

**साधयन्ती सखि सुभगं क्षणे दूनासि मत्कृते ।**
**सद्भावस्नेहकरणीयसदृशकं तावद्विरचितं त्वया ।।७।।**

हे सखि, मत्कृते - मदर्थं सुभगं - सुन्दरं तन्नायकं साधयन्ती - अनुनयन्ती त्वं क्षणे - क्षणे - प्रतिक्षणं दूनासि खिन्नासि। त्वया तावत् सद्भावः साधुत्वं स्नेहः वात्सल्यं तयोः करणीयं कार्यं सदृशं - उचितं विरचितं - कृतम्।

अत्र मत्प्रियं रमन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यम्। तेन च कामुकविषयं सापराधप्रकाशनं व्यङ्ग्यम् ।

व्यङ्ग्यस्य यथा -

**पश्य निश्चलनिस्पन्दा बिसिनीपत्रे राजते बलाका।**
**निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ।।८।।**

पश्य – पश्यतु, बिसिनीपत्रे – कमलिनीदले, बलाकाः - बकपङ्क्तिः निश्चलनिस्पन्दा सती, निर्मलमरकतभाजन परिस्थिता - स्वच्छमरकतमणेः पात्रे विद्यमाना शङ्खशुक्तिः इव शङ्खनिर्मितं शुक्त्याकारम् इव राजते - शोभते।

अत्र निस्पन्दत्वेन आश्वस्तत्वं तेन च जनरहितत्वम्। अतः सङ्केतस्थानमेतदिति कयाचित् कश्चित् प्रत्युच्यते। अथवा मिथ्या वदसि, न त्वमग्रतोऽभूरिति व्यज्यते ।

अथ वाचकादीनां क्रमेण स्वरूपमाह -

**९. साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः ।**

इहागृहीतसङ्केतस्य शब्दस्यार्थप्रतीतेरभावात्सङ्केतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतो गृह्यते स तस्य वाचकः।

वाचकः, लाक्षणिकः, व्यञ्जकः चेति शब्दाः। यः शब्दः साक्षात् संकेतितं अव्यवधानेन गृहीतसंकेतितमर्थं अभिधीयते - प्रतिपादयति, स शब्दः वाचकः । इह लोकव्यवहारे अगृहीतसङ्केतस्य शब्दस्य अर्थप्रतीतेरभावात् संकेतसहाय एव शब्दो अर्थविशेषं प्रतिपादयति इति यस्य यत्राव्यवधानेन संकेतो गृह्यते स तस्य वाचक इति ।

**१०. सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा।**

यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव, तथाप्यानन्त्यात् व्यभिचाराच्च तत्र संकेतः कर्तुं न युज्यत इति गौः शुक्लश्चलो डित्य इत्यादीनां विषयविभागो न प्राप्नोति इति च तदुपाधावेव संकेतः।

**व्याख्या -**

संकेतग्रहविषयः चतुर्विधः। जात्यादिः - जातिः, गुणः, क्रिया, यदृच्छारूपः इति। जातिरेव वा इति मीमांसकमतम्।

अर्थाय - प्रयोजनाय या क्रिया गोरानयनादिरूपा तत्कारितया - तन्निर्वाहकत्वेन प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव जात्याद्याश्रयः, न तु जात्यादिः। तथापि आनन्त्यात् व्यभिचाराच्च सङ्केतो न। तदुपाधावेव – व्यक्तेरुपाधौ जात्यादौ एवं सङ्केतः कर्तुं युज्येत। किञ्च गोत्वजातिमान्, शुक्लत्वरूपगुणवान्, चलनरूपक्रियावान्, डित्थनामायम् इत्यादि विषयविभागो न प्राप्नोति।

उपाधिश्च द्विविधः - वस्तुधर्मा वक्तृयदृच्छासन्निवेशितश्च।

वस्तुधर्माऽपि द्विविधः - सिद्धः साध्यश्च। सिद्धोऽपि द्विविधः - पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च। तत्राद्यो जातिः। उक्तं हि वाक्यपदीये 'न हि गौः स्वरूपेण गौः नाप्यगौः गोत्वाभिसम्बन्धात्तु गौरिति' । द्वितीयो गुणः शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते।

**व्याख्या -**

सिद्धः अपि द्विविधः। पदार्थस्य प्राणप्रदः, विशेषाधानहेतुः च। तत्राद्यः जातिः। पदार्थस्य गवादेः प्राणप्रदः। प्राणो व्यवहारयोग्यता तत्प्रदः तन्निर्वाहकः सकलव्यक्तिवृत्तिः जातिः। उक्तं हि वाक्यपदीये न गौः गोव्यक्तिः स्वरूपेण - जातिरहितव्यक्तिमात्रेण, न गौः गौरिति व्यवहारविषयो न, किन्तु गोत्वभिसम्बन्धात् गोत्वसमवायात् गौः इति व्यवहारविषयः। नित्यमेकमनेकानुगतमिति जातिलक्षणात्।

द्वितीयो विशेषाधानहेतुः गुणः शुक्लादिना लब्धसत्ताकं वस्तु विशिष्यते। लब्धसत्ताकं - जात्या प्राप्तव्यवहारयोग्यताकं वस्तु व्यक्तिः, शुक्लादिगुणेन विशिष्यते - सजातीयेभ्यो व्यावर्त्यते।

साध्यः पूर्वापरीभूतावयवः क्रियारूपः।

डित्थादिशब्दानां अन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन सन्निवेश्यते इति सोऽयं संज्ञारूपो यदृच्छात्मक इति।

गौः शुक्लश्चलो डित्य इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारः। परमाण्वादीनान्तु गुणमध्यपाठात् पारिभाषिकं गुणत्वम्। गुणक्रियायदृच्छानां वस्तुत एकरूपाणामप्याश्रयभेदाद् भेद इव लक्ष्यते, यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालम्बनभादात्।

**व्याख्या -**

डित्थादिसंज्ञाशब्दानां अन्त्यो यो वर्णः तद् बुद्ध्या निःशेषतो ग्राह्यं, संहृतक्रमं - वर्णक्रमशून्यं स्वरूपम्। स्फोटाख्यशब्दस्वरूपं वक्त्रा स्वेच्छया उपाधित्वेन विशेषणतया सन्निवेश्यते - स्थाप्यते, कल्प्यते यो यदृच्छाकल्पितत्वात् यदृच्छाशब्द इति व्यवह्रियते। शब्दानां प्रवृत्तिः प्रवृत्तिनिमित्तं

चतुर्विधम्। तथा प्रवृत्तिनिमित्तस्य चातुर्विध्यात् शब्दस्यापि जातिशब्दो गुणशब्दः क्रियाशब्दः यदृच्छाशब्दः चेति चातुर्विध्यम्।

हिमपयःशङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्याद्यभिन्नाभिधानप्रत्ययोत्पत्तिः तच्छुक्लत्वादि सामान्यं, गुडतण्डुलादिपाकादिष्वेवमेव पाकत्वादि, बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये। तद्वान् अपोहो वा शब्दार्थः कैश्चिदुक्त इति ग्रन्थगौरवभयात् प्रकृतानुपयोगाच्च न दर्शितम्।

**व्याख्या -**

हिमपयःशङ्खाद्याश्रयेषु - तुषार-क्षीर-कम्बु-जलाश्रयेषु, परमार्थतः - वस्तुतः, भिन्नेषु- शुक्लं-शुक्लतरमित्यादिप्रतीत्या असमानेषु, शुक्लादिषु- श्वेतादिगुणेषु, यद्वशेन -यत्प्रभावेण, शुक्लः शुक्लः इत्यादि- शुक्लं हिमं, शङ्खः शुक्लः इत्यादि, अभिन्नाभिधानप्रत्ययोत्पत्तिः- एकाकारशब्दव्यवहारोपलब्धिः, तत्-तस्मात्कारणात्, शुक्लत्वादि सामान्यं- श्वेतत्वादिजातिः। एवमेव- तेनैव रूपेण, गुडतण्डुलादिपाकेषु- इक्षुसारधान्यशाकपाकादिषु क्रियाशब्देषु पाचनत्वं जातिः। एवञ्च बालवृद्धशुकाद्युदीरितेषु - शिशु - स्थविर- कीरसारिकाद्यैः भिन्नभिन्नतया उच्चारितेषु, डित्थादिशब्देषु च यदृच्छात्मकवाचकेषु च, प्रतिक्षिणं भिद्यत्मानेषु - क्षणे क्षणे परिवर्तनशीलेषु, डित्थाद्यर्थेषु- डित्थप्रभृतिवाच्यवस्तुषु, वा - अथवा, डित्थत्वादि- डित्थसंज्ञादिः, अस्तीति- सिद्ध्यतीति, सर्वेषां शब्दानां - समेषां वाचकानां, जातिरेव- सामान्यमेव, प्रवृत्तिनिमित्तमिति - सङ्केतविषय इति, अन्ये- पूर्वमीमांसकाः प्रतिपादयन्ति।

अर्थात् जातिरेव संकेतविषयः इति पूर्वमीमांसकाः। महाभाष्यकारः पतञ्जलिः, उपाधिषु जात्यादिषु संकेतत्त्वमङ्गीकरोति। व्यक्तिं विना जातिः न, जातिं विना व्यक्तिरपि न। जातिव्यङ्क्तयोः अविनाभावसंबन्धः। जातिमान् जातिरिति नव्यनैयायिकाः। तद्भिन्नभिन्नः संकेतविषयः इति बौद्धाः।

## ११. स मुख्योऽर्थस्तत्र मुख्यो व्यापारस्तस्याभिधोच्यते।

स इति साक्षात्सङ्केतितः। अस्येति शब्दस्य। स साक्षात् संकेतितः अर्थः मुख्योऽर्थः। मुखमिव प्रधानत्वात् मुख्यः। तत्र साक्षात् संकेतितेऽर्थे अस्य शब्दस्य यो मुख्यः प्रधानः व्यापारः अभिधावृत्तिः। अत एव शक्त्यपरपर्यायसंकेतितार्थबोधजनको व्यापारो अभिधा इति। संकेतः च शक्तिग्राहकः समयः। स च अस्माच्छब्दादयमर्थो बोध्यव्य इत्याकारक इत्युक्तः सङ्गच्छते।

## पुनरावृत्तिः (Recap)

- मम्मटाचार्य: काव्यप्रकाशे काव्यालक्षणं काव्यभेदान् च विशदयति।
- वाचकः, लाक्षणिकः व्यञ्जकः चेति शब्दः त्रिविधः।
- पदार्थानां समन्वये तात्पर्यार्थोऽपि वर्तते।
- व्यञ्जनाशक्तियुक्तः व्यञ्जकः।
- शब्दार्थाः वाच्यः लक्ष्यः व्यङ्ग्यः चेति त्रिधा।
- आकांक्षाविरहात् गौरश्वःपुरुषोहस्त्यादि न प्रमाणम्।
- सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते।
- वाच्यस्य व्यञ्जकत्वद्योतकः श्लोकः भवति 'मातार्गृहोपकरणाय…' इति।
- बोद्धव्यवैशिष्ट्यात् लक्ष्यार्थस्य व्यञ्जकत्वमुदाहरति 'साधयन्ती सखी..' इत्ययं श्लोकः।
- व्यङ्ग्यस्य व्यञ्जकत्वमुदाहरति 'पश्य निश्चलनिस्पन्दा' इत्ययं श्लोकः ।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. किं नाम वाचकः?
2. संकेतग्रहविषयः कतिविधः?
3. गोजातौ सङ्केतत्वं कथं क्रियते?
4. सिद्धः कतिविधः?
5. किं नाम साध्यः?
6. शब्दानां प्रवृत्तिः कतिविधा?
7. पूर्वमीमांसकानां मते जातिः किम्?
8. एकरूपमपि वस्तु भिन्नरूपं कथं लक्ष्यते?
9. शुक्लतायाः आश्रयः लोके के पदार्थाः?
10. पाकभिन्नतायाः किमुदाहरणम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

1. डित्थादिशब्दोच्चारणे कथं भेदस्थितिः?

2. कोऽर्थः मुख्यः कथ्यते?
3. को मुख्यः शब्दव्यापारः?

## एकैकया खण्डिकया उत्तराणि लिखत ।
**(Answer the question in a paragraph)**

1. काव्ये कतिविधः शब्दः? के च ते?
2. कस्य कस्य अर्थस्य व्यञ्जकत्वं संभवति?
3. पश्य निश्चलनिष्पन्देति पद्ये किं व्यज्यते?

## निर्दिष्टाभ्यासः (Assignments)

1. सङ्केतग्रहविषयमाश्रित्य एकं निबन्धं लिखतु-

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. साक्षात्संकेतितं योऽर्थमभिधीयते सः वाचकः ।
2. चतुर्विधः
3. गोत्वजातिमान्, शुक्लत्वरूपगुणवान्, चलनरूपक्रियावान्, डित्थनामायं इति।
4. द्विविधः
5. साध्यःपूर्वापरीभूतावयवः क्रियारूपः
6. चतुष्टयी
7. सङ्केतविषयः
8. आश्रयभेदात् एकरूपमपि वस्तु भिन्नरूपं लक्ष्यते।
9. हिमपयःशङ्खाद्याः पदार्थाः
10. गुडपाकतण्डुलपाकशाकपाकादिः।

## सूचनाग्रन्थाः (References)


1. मम्मटाचार्यः, काव्यप्रकाशः, चौखंबा प्रकाशन्, वाराणसी २०१५
2. श्रीरामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन्, वाराणसी १९८५
3. मम्मटाचार्यः, काव्यप्रकाशः,शब्दार्थस्वरूपनिर्णयः, खण्डः२, राष्ट्रीयसंस्कृतसंस्थानप्रसिद्धीकरणं, नवदेहली, २९१७
4. विश्वनाथः, साहित्यदर्पणः, अध्यायः १, चौखम्बा संस्कृतसीरीस् , वाराणसी १९६७

5. भर्तृहरिः,वाक्यपदीयम्, अध्यायः १
6. पतञ्जलिः, महाभाष्यम्, आह्निकं १

SGOU

# Unit - 2
# कारिका: 9 - 12

**(मुख्यार्थबाधे तद्योगे इत्यारभ्यलक्षणा तेन षड्विधा इति पर्यन्तम्)**

## उद्देश्यानि(Learning Outcomes)

- लक्षणायाः स्वरूपं प्रतिपादयितुं जानाति।
- लक्षणा आरोपिता क्रिया- का भवति इत्याशयमवगच्छति।
- लक्षणायाः भेदान् गृह्णाति।
- अलङ्कारशास्त्रेण सह परिचयः सिद्ध्यति।

## प्राग्व्यपेक्षाः (Pre requisites)

शब्दः त्रिविधः- वाचकः, लाक्षणिकः, व्यञ्जकः चेति। अर्थाः अपि त्रयः- वाच्यः, लक्ष्यः, व्यङ्ग्यश्च। तिस्रः शब्दशक्तयः - अभिधा, लक्षणा, व्यञ्जना चेति। स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधयोऽच्यते। सङ्केतितार्थगोचरः शब्दव्यापारोऽभिधा। द्वितीयः शब्दव्यापारः लक्षणा। लक्षणाव्यापारे त्रयः हेतवः सन्ति। ते मुख्यार्थबाधः, मुख्यार्थयोगः, रूढिप्रयोजनयोः अन्यतरः च। अस्मिन्नेकके लक्षणासंबन्धि कारिकात्रयस्य विस्तारपूर्वकं पठनं तथा रूढिविषये विश्वनाथाचार्यस्य आक्षेपस्य समाधानं च चिन्तयामः।

## मुख्यपदानि (Keyterms)

लक्षणा, लक्षणायाः भेदाः, कर्मणि कुशलः, अपादानलक्षणा, प्रविश पिण्डं, कुन्ताः प्रविशन्ति, पीनो देवदत्तः दीवा न भुङ्क्ते, सारोपा, साध्यवसानिका।

## Discussion:

### लक्षणा -

१२. **मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।**
**अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।।**

'कर्मणि कुशलः' इत्यादौ दर्भग्रहणाद्ययोगात् 'गङ्गायां घोषः' इत्यादौ च गङ्गादीनां घोषाद्याधारत्वासम्भवात्, मुख्यार्थस्य बाधे विवेचकत्वादौ सामीप्ये च सम्बन्धे, रूढितः प्रसिद्धेः तथा गङ्गातटे घोष इत्यादेः प्रयोगात् येषां न तथा प्रतिपत्तिः तेषां पावनत्वादीनां धर्माणां तथा

प्रतिपादनात्मनः प्रयोजनत्वाच्च मुख्येनामुख्यो लक्ष्यते यत्। स सारोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा।

**व्याख्या -**

मुख्यार्थस्य अथवा वाच्यार्थस्य बाधे, तस्यार्थस्य योगे सति रूढितः - प्रसिद्धेः प्रयोजनाद्वा यः अन्यः अर्थः वाच्यभिन्नः अर्थः लक्ष्यते - प्रतिपाद्यते सा वृत्तिः लक्षणा। सा लक्षणा आरोपिता शब्दे कल्पिता साक्षात्संबन्धेन मुख्यार्थनिष्ठा परम्परासंबन्धेन तु शब्दनिष्ठा क्रियाव्यापाररूपा च ।

कर्मणि कुशलः इत्यादौ कुशान् लाति इति कुशलः इति व्युत्पत्या कुशलपदं कुशग्राहिणि शक्तम्। तं बाधित्वा कर्मणि इत्यस्य चित्रकर्मणि कुशलः समर्थः इति च रूढ्या लक्ष्योऽर्थः। दर्भग्रहणाद्यर्थस्यायोग्यत्वात् ।

गङ्गायां घोषः इत्यत्र गङ्गादीनां प्रवाहत्वात् घोषाद्याधारत्वासम्भवात् मुख्यार्थस्य बाधः। ततः तस्य सामीप्यसम्बन्धेन गङ्गातटे घोष इति अर्थकल्पनम्। ततः शैत्यपावनत्वादिप्रतिपादनरूपात् प्रयोजनात् मुख्येन उपलक्षितः अमुख्योऽर्थः लक्ष्यते। स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा।

**लक्षणायाः भेदाः -**

**१३. स्वसिद्धये पराक्षेपः परार्थ स्वसमर्पणम्।**
**उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ।।**

स्वस्य शक्यार्थस्य सिद्धये - अन्वयसिद्धये परस्याशक्यार्थस्य आक्षेपः उपादानम् उपादानलक्षणा। परार्थं परस्याशक्यस्यावयवबोधार्थं स्वसमर्पणं - स्वस्य शक्यार्थस्य समर्पणं त्यागः लक्षणलक्षणम्। इत्यमुभाभ्यामुपादानलक्षणरूपाभ्यामुपाधिभ्यां द्विविधा सा लक्षणा शुद्धा एव उक्ता।

कुन्ताः प्रविशन्ति इत्यादौ कुन्तादिभिः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते, तत उपादानेयं लक्षणा। **गौरनुबन्ध्य** इत्यादौ श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते न तु शब्देनोच्यते। विशेष्यं नाभिधा गच्छेद् क्षीणशक्तिर्विशेषणे इति न्यायादित्युपादानलक्षणा तु नोदाहर्तव्या, नह्यत्र प्रयोजनमस्ति न वा रूढिरियम्। व्यक्त्यविनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते, यथा क्रियतामित्यत्र कर्ता कुर्वतीत्यत्र कर्म, प्रविश पिण्डमित्यादौ गृहं भक्षयेत्यादि च। पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र च रात्रिभोजनं न लक्ष्यते। श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य विषयत्वात् गङ्गायां घोष इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गाशब्दः स्वार्थमर्पयति इत्येवमादौ लक्षणेनैषा लक्षणा। उभयरूपा चेयं शुद्धा उपचारेणामिश्रितत्वात्। अनयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यं तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसम्प्रत्ययः गङ्गासम्बन्धमात्रप्रतीतौ तु गङ्गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः।

अर्थात् कुन्ताः प्रविशन्ति इत्यत्र अचेतनस्य कुन्तादेः प्रवेशनक्रियायामन्वयासम्भवः इति मुख्यार्थबाधः। स्वसंयोगिनः कुन्तादयः इत्यादिना मुख्यार्थप्रयोगः दर्शितः। कुन्तसंयोगिनः पुरुषाः आक्षिप्यन्ते - लक्षणया बोध्यन्ते। अतः हेतोः उपादानेन स्वार्थपरित्यागपूर्वकपरार्थग्रहणेन इयं लक्षणा उपादानलक्षणा। कुन्तास्त्रगततैक्ष्ण्यस्य पुरुषेषु प्रतीतिः प्रयोजनम्।

गौरनुबन्ध्य इत्यादौ श्रुतिविहितानुबन्धनक्रिया कथं मम स्यात्। जातिपदार्थवादे गोत्वजातेरनुबन्धनासम्भवादिति हेतोः गोत्वरूपया जात्या उपादानलक्षणया व्यक्तिः बोध्यते। यतः अभिधाशक्तिः विशेष्यं व्यक्तिरूपधर्मिणं न गच्छेत् यतः विशेषणे जातिरूपे क्षीणशक्तिः।
व्यक्तिं विना जातेरभावात् जात्या व्यक्तिरनुमीयते। अविनाभावेनाक्षेपे उदा - पीनो देवदत्तः दिवा न भुङ्क्ते इति वाक्ये उपादानलक्षणया रात्रिभोजनवानिति लक्ष्यते।

पीन इति कुतो न लक्षणा इत्याशङ्क्य भट्टमते श्रुतार्थापत्या दिवाभोजनाभाववतः पुरुषस्य पीनत्वं रात्रिभोजनं विना अनुपपन्नमित्यनुपपत्या रात्रौ भुङ्क्ते इति शब्दः कल्प्यते इति आशयेन समाधत्ते श्रुतार्थेति। यत्रानुपपद्यमानः शब्दः शब्दान्तरं कल्पयति सा श्रुतार्थापत्तिः। इयमेव अर्थाध्याहार इति। यत्र च दृष्टः श्रुतो वाऽर्थोऽनुपपन्नोऽर्थान्तरं कल्पयति सा अर्थापत्तिः। इयमेव शब्दाध्यहार इत्युच्यते। गङ्गायां घोष इत्यत्र गङ्गाशब्दः प्रवाहरूपं स्वार्थं समर्पयति त्यजति लक्षणेन स्वार्थसमर्पणेन तटस्य घोषाद्याधिकरणत्वं सिद्ध्यति। इति लक्षणालक्षणा। उभयरूपा एषा लक्षणा सादृश्यख्यासम्बन्धेन प्रवृत्तिरूपोपचारः तेन अमिश्रितत्वात् - असम्बन्धात् तेन उपचारामिश्रिता शुद्धा उपचारामिश्रिता गौणी इत्युक्तिः सङ्गच्छते।

## १४. सारोपाऽन्या तु यत्रोक्तौ विषयी विषयस्तथा।

आरोप्यमाणः आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्यते, सा लक्षणा सारोपा।

गौर्वाहीकः - विषयी आरोप्यमाणो गवादिः, विषयः आरोपस्याश्रयो वाहीकादिः यत्र यादृशलक्षणास्थले तथा तेनैव गोत्ववाहीकत्वरूपधर्मप्रकारेण उक्तौ सामानाधिकरण्येन शब्दप्रतिपाद्यौ भवतः सा अन्या शुद्धा गौणी च सारोपा।

आरोपेण समं वर्तते इति सारोपा। लक्षणार्थेन समं तादात्म्यप्रतीतिकृत् अभेदबोधकृल्लक्षणा सारोपा इति।

## १५. विषय्यन्तःकृतेऽन्यस्मिन् सा स्यात्साध्यवसानिका।

विषयिणाऽरोप्यमाणेनान्तःकृते निगीर्णे अन्यस्मिन्नरोपविषये सति साध्यवसाना स्यात्। अन्यस्मिन्नारोपाश्रये वाहीकादौ विषय्यन्तःकृते विषयिणा आरोप्यमाणेन गवादिना अन्तःकृते निगीर्णे सति - विषयवाचकवाहीकादि पदेनानुक्ते सति सा साध्यवसानिका।

**१६. भेदाविमौ च सादृश्यात्सम्बन्धान्तरतस्तथा। गौणौ शुद्धौ च विज्ञेयौ।**

इमावारोपाध्यवसानरूपौ सादृश्यहेतूभेदौ गौर्वाहीक इत्यत्र गौरयमित्यत्र च। अत्र हि स्वार्थसहचारिणो जाड्यमान्द्यादयो लक्ष्यमाणगोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्ति इति केचित्। स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते, न तु परार्थोऽभिधीयत इत्यन्ये। साधारणगुणाश्रयत्वेन परार्थे एव लक्ष्यत इत्यपरे।

सारोप-साध्यवसानरूपौ भेदौ विशेषौ सादृश्यात् - सादृश्याख्यसम्बन्धात् गौणौ गौणशब्दवाच्यौ। तथा सम्बन्धान्तरतः सादृश्येतरसम्बन्धात् शुद्धौ विज्ञेयौ। एवं मुख्यार्थबाधादित्रयहेतुत्वात् गौण्या लक्षणायामन्तर्भावान्न पृथक् वृत्तित्वम्। मुख्यार्थलक्ष्यार्थयोश्च सजातीयगुणत्वं संबम्धः।

सारोपासाध्यवसानौ गौणीभेदौ सादृश्यहेतूसादृश्याख्यसंबन्धहेतुकौ। अत्र गौणसारोपायाः उदाहरणम् - गौर्वाहीकः। बहिर्भवः वाहीकः। शास्त्रीयाचाराद्बहिर्भूतः गवाभिन्नः वाहीकः इति बोधः। गौणसाध्यवसानायाः उदाहरणं गौरयम्।

स्वार्थसहचारिणः स्वस्य गोशब्दस्य अर्थो गोत्वं तस्य सहचारिणः समानाधिकरणाः लक्ष्यमाणा गोशब्देन लक्षणया बोध्यमानाः। परार्थस्य वाहीकरूपस्य अभिधाने अभिधया बोधिते प्रवृत्तिनिमित्तत्वं उपयान्ति प्राप्नुवन्ति। गोशब्दात् प्रथमं लक्षणया जाड्याद्युपस्थितिः ततो अभिधायाः वाहीकस्य बोधः। वाहीकसमानाधिकरणो गोशब्दो बाधितमुख्यार्थः सन् स्वार्थसहचारित्वसंबन्धेन जाड्यादिगुणान् लक्षयित्वा तानेव प्रवृत्तिनिमित्तीकृत्य वाहिकमभिधया बोधयति। गुणाभेदेन गुणसाजात्येन गुणा एवेति न तु गुणी तस्याक्षेपेण वाहीकशब्दादेव लाभात् तेनान्यलभ्यत्वेन नाभिधा इत्यत आह - न तु परार्थेऽभिधीयते - गो शब्देन। परार्थो वाहीको नाभिधीयते - नाभिधया प्रतिपाद्यते। तथा च एतन्मते गोगतजाड्यसजातीयजाड्यवान् वाहीक इति बोधः। साधारणाः सजातीया गुणाः जाड्यादयस्तदाश्रयत्वेन परार्थ एव वाहीक एव लक्ष्यते।

**उक्तं चान्यत्र –**

**अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते।**
**लक्ष्यमाणगुणैर्योगात् वृत्तेरिष्टा तु गौणता ।।**

अविनाभावोऽत्र सम्बन्धमात्रम् न तु नान्तरीयकत्वम्। तत्त्वे हि मञ्चाः क्रोशन्तीत्यादौ न लक्षणा स्यात्। अविनाभावे चाक्षेपेणैव सिद्धेः लक्षणायाः नोपयोग इत्युक्तम्।

मुख्यार्थस्य परिग्रहे - स्वीकारे मानान्तरेण - प्रत्यक्षादिना विरुद्धे सति या अभिधेयेन वाच्येन अविनाभूतं - संबन्धं तटादि तस्य प्रतीतिः लक्षणेत्युच्यते। लक्ष्यमाणा - लक्ष्यार्थविशेषतया ये गुणाः जाड्यादयः तैर्योगात् - सम्बन्धात् या वृत्तिः गोशब्दस्य वाहीकार्थोपस्थापकता तस्या गौणता इष्टा।

आयुर्घृतम् आयुरेवेदमित्यादौ च सादृश्यादन्यत्कार्यकारणभावादि संबन्धान्तरम्। एवमादौ च कार्यकारणभावादिलक्षणपूर्वे आरोपाध्यवसाने। अत्र गौणभेदयोः भेदेऽपि ताद्रूप्यप्रतीतिः

सर्वथैवाभेदावगमश्च प्रयोजनम्। शुद्धभेदयोः तु अन्यवैलक्षण्येनाव्यभिचारेण च कार्यकारित्वादि। क्वचित् तादर्थ्यादुपचारः यथा - इन्द्रार्था स्थूणः इन्द्रः। क्वचित् स्वस्वामिभावात् यथा - राजकीयपुरुषो राजा। क्वचिदवयवावयविभावात् यथा - अग्रहस्त इत्यत्र अग्रमात्रेऽवयवे हस्तः। क्वचित् तत्कर्त्यात् यथा - अतक्षा तक्षा।

सादृश्येतरसंबन्धयोः शुद्धयोः सारोपा-साध्यवसानयोरुदाहरणम् - आयुर्घृतम् इति। अत्रायुर्जनकत्वात् घृतम् आयुः शब्देन लक्ष्यते घृतं जनकम् आयुः जन्यम्। तेन जन्यजनकभावः सम्बन्धः। तयोश्च लक्षणया अभेदः आयुः अभिन्नं घृतम् इति बोधः।

शुद्धसाध्यवसानायाः आयुरेवेदम् इत्युदाहरणम्। अत्र इदं शब्देन घृतादेरुपस्थितिः एवमायुः पीयते इत्युदाहरणम्। इत्यादौ सादृश्यात् अन्यत् कार्यकारणाभावादि। आदिना इन्द्रार्था स्थूणा इन्द्र इति। कार्यकारणाभावादिलक्षणं स्वरूपं यस्य तथाभूतः सादृश्यातिरिक्तः सम्बन्धः पूर्वी हेतुभूतो ययो ते। अत्र गौणभेदयोः गौर्वाहीको गोरयमित्यनयोः मध्ये गौर्वाहीक इत्यत्र भेदेऽपि वाहीकपदप्रयोगवैधर्ये भासमानेऽपि ताद्रूप्यप्रतीतिः गौरयमिति। अत्र गोत्ववाहीकयोः भेदप्रतीतिं विनैव अभेदागमः प्रयोजनं व्यङ्क्तं भवति। एवमादिः।

## १७. लक्षणा तेन षड् विधा।

शुद्धा-गौणी-सारोपा-साध्यवसानोपादानलक्षणैः षट् भेदेन लक्षणा इति।

शुद्धागौणीभेदेन प्रथमतः लक्षणा द्विविधा, ततः उपादानलक्षणा, लक्षणलक्षणा, सारोपा साध्यवसानेतिभेदेन शुद्धा चतुर्था, गौणी सारोपा साध्यवसानेति द्विविधा। एवं लक्षणा षट् विधा।

| | |
|---|---|
| उपादानलक्षणायाः उदा | - कुन्ताः पुरुषाः प्रविशन्ति । |
| उपादानसाध्यवसानायाः उदा | - कुन्ताः प्रविशन्ति। |
| लक्षणसारोपायाः उदा | - आयुर्घृतमिति । |
| लक्षणसाध्यवसानायाः उदा | - आयुरेवेदम् । |
| | गङ्गायां घोषः। |
| गौणसारोपायाः उदा | - गौर्वाहीकः । |
| गौणसाध्यवसानायाः उदा | - गौरयम्। |

## पुनरावृत्तिः (Recap)

- शब्दः त्रिविधः- वाचकः, लाक्षणिकः, व्यञ्जकः चेति
- सङ्केतितार्थगोचरः शब्दव्यापारोऽभिधा।
- वाच्यार्थस्य बाधे, तस्यार्थस्य योगे सति रूढेः प्रयोजनाद्वा वाच्यभिन्नः अर्थः प्रतिपाद्यते सा वृत्तिः लक्षणा।
- लक्षणाव्यापारे त्रयः हेतवः सन्ति।

- प्रथमं लक्षणा द्विधा-शुद्धा गौणी चेति।
- यत्र अन्यार्थसिद्धये स्वार्थसमर्पणं करोति तत्र लक्षणलक्षणा। अस्याः अपरं नाम जगत्स्वार्था। यथा गङ्गायां घोषः
- यत्र आरोपस्य विषयः शब्दः नोक्तः, किन्तु उपमानेन आरोप्यमाणेन निगीर्यते चेत् सा गौणी साध्यवसाना लक्षणा। यथा 'गौरयम्'।
- मीमांसकमते अभिधेयाविनाभूतप्रतीतिः लक्षणा। अविनाभावस्य समानार्थकं पदं भवति 'नान्तरीयकत्वम्'।
- यत्र विषयिविषययोः स्पष्टतः उल्लेखः, सादृश्यसंबन्धश्च भवति तत्र गौणी सोरोपलक्षणा।
- यत्र विषयस्य शब्दतः कथनं न भवति, अपि तु आरोप्यमाणस्य कथनं सा साध्यवसाना लक्षणा। यथा आयुरेवेदम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. 'कर्मणि कुशलः' इत्यत्र कीदृशी लक्षणा?
2. लक्षणायाः लक्षणं किम्?
3. 'आयुर्धृतं' इत्यत्र कीदृशी लक्षणा?
4. 'कुन्ताः प्रविशन्ति' इत्यत्र कस्य बाधः?
5. किं नाम उपादानलक्षणा?
6. गौणसाध्यवसानलक्षणायाः उदाहरणं किम्?
7. लक्षणलक्षणा कति विधा?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

1. उपादानलक्षणायाः लक्षणं किम्?
2. साध्यवसानिकालक्षणायाः स्वरूपं सोदाहरणं लिखत।
3. 'गौर्वाहीकः' - कस्येदमुदाहरणम्?

## निर्दिष्टाभ्यासः (Assignments)

1. लक्षणायाः स्वरूपं लिखत। कतिविधा लक्षणा? सोदाहरणं लिखत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. लक्षणलक्षणा
2. वाच्यार्थस्य बाधे तस्यार्थस्य योगे सति प्रसिद्धेः प्रयोजनाद्वा यः वाच्यभिन्नः अर्थः प्रतिपाद्यते सा लक्षणा।
3. शुद्धा सारोपलक्षणा।
4. मुख्यार्थस्य बाधः
5. स्वार्थस्य सिद्ध्यर्थं पराक्षेपः यत्र तत्र उपादानलक्षणा।
6. गौरयम्।
7. द्विविधा।

## सूचनाग्रन्थाः (References)


1. मम्मटाचार्यः, काव्यप्रकाशः, चौखंबा प्रकाशन्, वाराणसी २०१५
2. श्रीरामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन्, वाराणसी १९८५
3. मम्मटाचार्यः, काव्यप्रकाशः,शब्दार्थस्वरूपनिर्णयः, खण्डः२, राष्ट्रीयसंस्कृतसंस्थानप्रसिद्धीकरणं, नवदेहली, २९१७
4. विश्वनाथः, साहित्यदर्पणः, अध्यायः २, चौखम्बा संस्कृतसीरीस् , वाराणसी १९६७
5. काव्यप्रकाशः काव्यप्रकाशः, बालबोधिनी टीका, भण्डारकर् ओरीयण्टल रिसर्च इन्स्टिट्यूट्, पूना १९८३
6. काव्यप्रकाशः, संपादकः श्रीनिवासशास्त्री, साहित्यभण्डारमेरठः।

# Unit - 3

# कारिका: 13 - 16

**(व्यङ्ग्येन रहिता रूढौ इत्यारभ्य न च शब्दः स्खलद्गतिः इति पर्यन्तम्।)**

## उद्देश्यानि(Learning Outcomes)

- व्यञ्जनां परिचिनोति।
- व्यञ्जनायाः स्वरूपं भेदम् उदाहरणं च जानाति।
- व्यञ्जनैकगम्यत्वे लक्षणाप्रयोजनस्य हेतुं गृह्णाति।
- काव्यप्रकाशकारिकाः जानाति।

## प्राग्व्यपेक्षाः (Pre requisites)

शब्दाः त्रिविधाः भवन्ति। वाचक-लाक्षणिक-व्यञ्जकाः च। अर्थाः अपि त्रिविधाः - वाच्य-लक्ष्य-व्यङ्ग्यभेदात्। शब्दशक्तयः तिस्रः। अभिधा, लक्षणा, व्यञ्जना चेति। शब्दस्य आद्या शक्तिरभिधा। अपरा लक्षणा। तृतीया व्यञ्जना। यत्र लक्षणया अभीष्टार्थः न प्राप्यते तत्र प्रयोजनाय व्यञ्जनाव्यापारः प्रवर्तते। प्रयोजनं व्यञ्जनाव्यापारगम्यम्। व्यञ्जनादृष्ट्या लक्षणायाः द्वैविध्यं सूचयति। रूढिवशात् जायमाना लक्षणा अव्यङ्ग्या। सप्रयोजकलक्षणा सव्यङ्ग्या भवति। अस्मिन् एकके व्यञ्जनायाः स्वरूपादिकं विशदयति।

## मुख्यपदानि (Keyterms)

व्यङ्ग्येन रहिता- गूढम् अगूढं-लाक्षणिकः- नाभिधा- स्खलद्गति।

## Discussion:

### १८. व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने।

**प्रयोजनं हि व्यञ्जनाव्यापारगम्यमेव।** सा लक्षणा रूढौ - प्रसिद्धौ व्यङ्ग्यार्थेन रहिता भवति। प्रयोजने सति व्यङ्ग्यार्थेन सहिता भवति ।

### १९. तच्च गूढमगूढं वा। तच्चेति व्यङ्ग्यम्।

तत्र सहृदयमात्रवेद्यं गूढम्। तदितरैः वेद्यमगूढम्। काव्यवासनापरिपक्वबुद्धिः सहृदयः। एवं च अव्यङ्ग्या, गूढव्यङ्ग्या, अगूढव्यङ्ग्येति त्रिविधा।

गूढम् उदाहरति।

**मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं**
**समुच्छालितविभ्रमा गतिरपास्तसंस्था मतिः।**
**उरो मुकुलितस्तनं जघनमसंबन्धोदुरं**
**बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ।।**

श्लोकस्य अन्वयः

इन्दुवन्दना तनौ तरुणिमोद्गमो मोदते। मुखं विकसितस्मितं वशितावक्रिमप्रेक्षितं गतिः समुच्छलितविभ्रमा गतिः अपास्तसंस्था, उरः मुकुलितस्तनं जघनं असंबन्धोद्धुरं बत।

कश्चन पुरुषः काञ्चित् युवतीमालोक्य आह। इन्दुवदनायाः चन्द्रमुख्याः, तनौ - शरीरे तरुणिमोद्गमः - तारुण्यस्याविर्भावः मोदते - स्फीतो भवति। बत हर्षः। विकसितं स्मितं मुखं वशितवक्रिमप्रेक्षितं - स्वायत्तीकृततिर्यग्गामित्वं येन तथाभूतावलोकनं समुच्छलितविभ्रमा-निरन्तरमतिशयेन प्रादुर्भूता विभ्रमा यस्या तादृशी, गति - गमनम्, अपास्ता - त्यक्ता संस्थामतिः - नियतविषयवर्तित्वं यया तथाभूता बुद्धिः, मुकुलितस्तनं - मुकुलितौ ईषदुन्नतौ मुकुलाकारौ वा स्तनौ यत्र तादृशं उरो - वक्षःस्थलम् अंसम्बन्धोदुरं - अवयवानां दृढबन्धेन उद्धरं, विलक्षणरतियोग्यं जघनं ऊरुमूलभागः।

अत्र स्मिते पुष्पधर्मस्य विकासस्य बाधित्वात् प्रसृते सातिशयत्वे च लक्षणासौरभादि व्यङ्ग्यम्। प्रेक्षिते चेतनधर्मस्य वशीकरणस्य बाधितत्वात् स्वाधीनत्वे लक्षणा युक्तानुरागित्वं व्यङ्ग्यम्। स्तनयोः पुष्पधर्मस्य मुकुलितत्वस्य बाधितत्वात् काठिन्यं लक्ष्यते। आलिङ्गनयोग्यं व्यङ्ग्यम्। एवमादि। यौवनोद्गमे चेतनधर्मस्य मोदस्य बाधितत्वात् उत्कर्षो लक्ष्यते। स्पृहिणीयत्वं व्यङ्ग्यमिति। सहृदयैरेव ज्ञायमानानि इति गूढव्यङ्ग्यमिदं काव्यम्।

अगूढं यथा –

**श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम्।**
**उपदिशति कामिनीनां यौवनमद एव ललितानि ।।**

श्लोकस्य अन्वयः

जडाः अपि श्रीपरिचयात् विदग्धचरितानाम् अभिज्ञाः भवन्ति। यौवनमदः एवं कामिनीनां ललितानि उपदिशति।

जडा अनभिज्ञा अपि श्रियः लक्ष्म्याः परिचयात् - संबन्धात् विदग्धानि चतुराणि यानि चरितानि- चरित्राणि तेषामभिज्ञः ज्ञातारः भवन्ति। यौवनस्य तारुण्यस्य मदो भर एव कामिनीनां ललितानि अङ्गानां विन्यासान् उपदिशति।

अत्र उपदिशति इति पदमगूढव्यङ्ग्यम्। यौवनमदे चेतनधर्मस्य उपदेशकर्तृकत्वस्य बाधितत्वात् आविष्कारमात्रं लक्ष्यम्। अनायासेन ललितज्ञानं व्यङ्ग्यम्। तच्च इतरैरपि वेद्यमिति अगूढव्यङ्ग्यमिदं काव्यम्।

**२०. तदेषा कथिता त्रिधा ।**

एवं तदेषा लक्षणा अव्यङ्ग्या, गूढव्यङ्ग्या, अगूढव्यङ्ग्या चेति त्रिधा।

**२१. तद्भूर्लाक्षणिकः।**

लाक्षणिकः शब्दः - यः शब्दो यदर्थविषयकलक्षणाश्रयः स तल्लाक्षणिक इत्युच्यते।

**२२. तत्र व्यापारो व्यञ्जनात्मकः।**

लक्षाणिके शब्दे व्यापारो व्यङ्ग्यार्थप्रकाशानुकूलो व्यञ्जनात्मक इत्यर्थः।

**२३. यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।**
**फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया।।**

प्रयोजनरप्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतीतिः अपि तु तस्मादेव शब्दात्। न चात्र व्यञ्जनादृतेऽन्यो व्यापारः।

यस्य शैत्यपावनत्वादि फलस्य प्रतीतिमाधातुं - अनुभवं जनयितुं लक्षणा - लाक्षणिकशब्दः समुपास्यते - वाचकशब्दं विहायाद्रियते शब्दैकगम्ये - लाक्षणिकशब्दमात्रबोध्ये अत्र फले शैत्यादि प्रयोजनविषये व्यञ्जनात् - व्यञ्जनं विहाय, अपरा क्रिया - अन्यो व्यापार: नास्ति।

**२४. नाभिधा समयाभावात् ।**

गङ्गायां घोष इत्यादौ ये पावनत्वादयो धर्माः तटादौ प्रतीयन्ते न तत्र गङ्गादिशब्दाः संकेतिताः। न तु पावनत्वादिप्रतिपादने अभिधादिरेव व्यापारोऽस्तु किं व्यञ्जनया इत्यत आह। नाभिधेति - न शक्तिः प्रयोजनप्रतिपादनसमर्था समयाभात्। गङ्गादिपदस्य शैत्यादौ संकेताभावात् पावनत्वादिकं प्रयोजनं न गङ्गापदाभिधाप्रतिपाद्यं गङ्गापदनिष्ठसंकेताविषयत्वात् इत्यर्थः।

**२५. हेत्वाभावान्न लक्षणा।**

मुख्यार्थबाधादित्रयं हेतुः।

ननु तीरादौ लाक्षणिकस्य पुनः शैत्यादौ लक्षणैवास्तु, किं व्यञ्जना इति मतं निराकरोति हेत्वाभावान्न इत्यादिना। मुख्यार्थबाधः, मुख्यार्थयोगः, रूढिप्रयोजनान्यतरत् इति त्रयः लक्षणाहेतुः। तस्याभावान्न पुनः लक्षणायाः सम्भवः। पावनत्वादिकं न गङ्गापदलक्षणाप्रतिपाद्यम्। प्रकृतपदलक्षणाजन्य-ज्ञानसामग्रीरहितत्वात्। तथा च।

**२६. लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो।**
**न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः ।।**

यथा गङ्गाशब्दः स्रोतसि सबाध इति तटं लक्षयति, यदि तद्वत् तटेऽपि सबाधः स्यात् तत् प्रयोजनं लक्षयेत् न च तटं मुख्योऽर्थः, नाप्यत्र बाधः। न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः सम्बन्धः, नापि प्रयोजने लक्ष्ये किञ्चित् प्रयोजनं, नापि गङ्गाशब्दः तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः।

लक्ष्यं तीरादिकं न मुख्यं, अत्र लक्ष्ये बाधः - घोषाधिकरणत्वासम्भवोऽपि न, फलेन - पावनत्वादिना प्रयोजनेन, योगः - तीरस्य साक्षात्संबन्धः, न, एतास्मिन् प्रयोजने प्रयोजनम् - अन्यत्प्रयोजनं न। न च शब्दः -लाक्षणिकः शब्दः, स्खलत्गतिः - प्रच्युतागतिः प्रयोजने बोधकतारूपसामर्थ्यं यस्य तादृशः न, गङ्गाशब्दात् एव प्रयोजनप्रतिपादनात् इति। यथा गङ्गाशब्दो मुख्यार्थबाधितं विना तटं प्रतिपादयितुम् असमर्थः तथा पावनत्वादिप्रयोजनप्रतिपादने असमर्थो नेति।

## पुनरावृत्तिः (Recap)

- वाचक- लाक्षणिक- व्यञ्जकभेदेन शब्दाः त्रिविधाः।
- यत्र लक्षणया अभीष्टार्थः न प्राप्यते तत्र प्रयोजनाय व्यञ्जनाव्यापरः प्रवर्तते।
- शब्दार्थेषु अन्यतमः भवति लक्षणा।
- व्यङ्ग्यं त्रिविधं- अव्यङ्ग्या- गूढव्यङ्ग्या-अगूढव्यङ्ग्या चेति।
- प्रयोजनरहिता व्यङ्ग्या अव्यङ्ग्या।
- सहृदयमात्रवेद्यं गूढव्यङ्ग्यम्।
- साधारणजनैरपि अनायासेन व्यङ्ग्यज्ञाने अगूढव्यङ्ग्यम्।
- 'गङ्गायां घोषः' इत्यत्र गङ्गाशब्दः स्वमुख्ये स्रोतसि रूपे अर्थे सबाधः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. व्यङ्ग्यार्थस्य मुख्यं कार्यं किम्?
2. किं नाम अगूढव्यङ्ग्या?
3. 'श्रीपरिचयाज्जडा अपि' इत्ययं श्लोकः कस्योदाहरणं भवति?
4. सव्यङ्ग्यालक्षणायाः भेदौ कौ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

(Answer the following questions in one or two sentences)

1. गूढव्यङ्ग्यस्य उदाहरणश्लोकस्य आशयं लिखत।
2. किं नाम गूढव्यङ्ग्यलक्षणा?
3. 'तदेषा कथिता त्रिधा' -कथम्?
4. 'गङ्गायां घोषः' इति लक्षणायाः प्रयोजनं किम्?

## एकैकया खण्डिकया उत्तराणि लिखत।

(Answer the question in a paragraph)

1. 'तदेषा कथिता त्रिधा' - विशदायत।
2. गूढव्यङ्ग्य- अगूढव्यङ्ग्योः कः भेदः?

## निर्दिष्टाभ्यासः (Assignments)

1. व्यञ्जनायाः स्वरूपं भेदम् उदाहरणं च विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. प्रयोजनप्रतीतिः।
2. साधारणजनैरपि अनायासेन व्यङ्ग्यज्ञाने अगूढव्यङ्ग्यम्।
3. अगूढव्यङ्ग्यस्य।
4. गूढव्यङ्ग्यम् अगूढव्यङ्ग्यं च।

## सूचनाग्रन्थाः (References)


1. मम्मटाचार्यः, काव्यप्रकाशः, चौखंबा प्रकाशन्, वाराणसी, २०१९

2. श्रीरामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन्, वाराणसी १९८५
3. मम्मटाचार्यः, काव्यप्रकाशः, शब्दार्थस्वरूपनिर्णयः, खण्डः१, राष्ट्रीयसंस्कृतसंस्थानप्रसिद्धीकरणं', नवदेहली २०१७
4. विश्वनाथः, साहित्यदर्पणः, अध्यायः ३, चौखंबा संस्कृतसीरीस्, वाराणसी १९३७
5. मम्मटाचार्यः, काव्यप्रकाशः, बालबोधिनी टीका, भण्डारकर् ओरीयण्टल् रिसर्च इन्स्टिट्यूट्,पूना
6. मम्मटाचार्यः, काव्यप्रकाशः, संपादकः श्रीनिवासशास्त्री, साहित्यभण्डारः, मेरठः।

# Unit - 4

# कारिका: 17 - 20

**(एवमप्यनवस्था स्यात् इत्यारभ्य उल्लाससमाप्तिपर्यन्तम्)**

## उद्देश्यानि(Learning Outcomes)

- व्यञ्जनां परिचाययति।
- ज्ञानस्य विषयफलयोः भिन्नत्वमवगच्छति।
- लक्षणामूलव्यञ्जकं अभिधामूलं व्यञ्जनां च जानाति।
- वाचकत्वनियामकानां संयोगादीनां उदाहरणानि गृह्णाति।

## प्राग्व्यपेक्षाः (Pre requisites)

तिस्रः शब्दवृत्तयः। अभिधा- लक्षणा- व्यञ्जना चेति। संकेतितार्थगोचरः शब्दव्यापारो अभिधा। न केवलम् अभिधाद्वारा एव शब्दः अर्थं बोधयति, अपि तु मुख्यार्थबाधे सति लक्षणया अर्थबोधः। यत्र लक्षणया अभीष्टार्थः न प्राप्यते तत्र प्रयोजनसिद्धये व्यञ्जनाव्यापारः भवति। वक्तुः लाक्षणिकप्रयोगे प्रयोजनं निश्चितं भवति। तद्बोधने व्यञ्जनाव्यापारः एव सक्षमः भवति। 'गङ्गायां घोषः' इत्यत्र शैत्यपावनत्वादि प्रयोजनरूपमर्थप्रतिपादनाय व्यञ्जनवृत्तिः स्वीकर्तव्या। एतादृशं कार्यमस्मिन् एकके विशदयति। अपि च ज्ञानविषययोः भेदत्वं व्यञ्जनायाः विशदीकरणं च सुष्ठु प्रतिपादयति।

## मुख्यपदानि (Keyterms)

विशिष्टे लक्षणा- प्रत्यक्षस्य विषयफलयोः भिन्नत्वं- लक्षणामूलं व्यञ्जकं- अभिधामूलां- व्यञ्जनां- संयोगः विप्रयोगः भद्रात्मनो दुरधिरोहतनोः- व्यञ्जकः।

## Discussion:

### २७. एवमप्यनवस्था स्यात् या मूलक्षयकारिणी।

एवमपि प्रयोजनं चेत् लक्ष्यते तत् प्रयोजनान्तरेण तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृद् अनवस्था भवेत्।

ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते, गङ्गायाः तटे घोष इत्यतो अधिकस्यार्थस्य प्रतीतिश्च प्रयोजनमिति विशिष्टे लक्षणा। तत्किं व्यञ्जनया इत्याह।

ननु प्रयोजनसहितमेव तटादिकं लक्ष्यते न केवलं प्रयोजनमित्याशङ्क्य उत्तरसूत्रमवतारयति। विशिष्टस्य लक्ष्यत्वे प्रयोजनविरह इत्यत आह - गङ्गायाः तट इत्यादि। गङ्गायाः तटे घोष इति प्रयोगापेक्षया अधिकस्य पावनत्वादिवैशिष्ट्यरूपस्य प्रयोजनं विशिष्टे पावनत्वादियुक्ते तटे। तत् किं व्यञ्जनया इति आह –

**२८. प्रयोजनेन सहितं लक्षणीयं न युज्यते।**

लक्षणाजन्यज्ञानविषयं प्रयोजनेन - प्रयोजनीभूतज्ञानविषयपावनत्वादिना सहितं न युज्यते। कुत इत्याह –

**२९. ज्ञानस्य विषयो ह्यन्यः, फलमन्यदुदाहृतम्।**
**प्रत्यक्षादेर्नीलादिविषयः, फलं च प्रकटता संवित्तिर्वा ।**

यथा ज्ञानस्य विषयो ज्ञानादन्यो भवति तथा ज्ञानस्य फलमपि ज्ञानादन्यत् भवति। तथा च यथा प्रत्यक्षस्य विषयफलयोः प्रत्यक्षाभिन्नत्वं प्रसिद्धं तथा लक्षणाजन्यज्ञानात् तत्फलस्य पावनत्वादिज्ञानस्य अन्यत्वम् अवश्यमेषितव्यमिति कारिकार्थः। प्रत्यक्षादेः - इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। आदिना अनुमानादिर्गृह्यते। प्रकटतेति मीमांसकमते घटज्ञानानन्तरं ज्ञातो घटः इति प्रत्ययात् तज्ज्ञानेन तस्मिन् घटे ज्ञातारूपा प्रकटता जायते, तथा च ज्ञेयधर्मः प्रकटता प्रत्यक्षादिज्ञानस्य फलमिति सिद्धम्। नैयायिकमते घटज्ञाने सति घटमहं जानामि इति अनुव्यवसायरूपा संवित्तिः घटज्ञानाज्जायते। तथा च ज्ञातृधर्मः संवित्तिः प्रत्यक्षादिज्ञानस्य फलमिति सिद्धम्।

**३०. विशिष्टे लक्षणा नैवम्।**

विशिष्टे पावनत्वादियुक्ते तटे एवं लक्षणा नेति व्याख्यातम्।

**३१ . विशेषाः स्युस्तु लक्षिते।**

लक्षिते - लक्षणाबोधतटादौ ये विशेषाः पावनत्वादयः ते च अभिधा-तात्पर्य-लक्षणाभ्यो व्यापारान्तरेण गम्याः। तच्च व्यञ्जनध्वननद्योतनादि शब्दवाच्यमवश्यमेषितव्यम्।
एवं लक्षणामूलं व्यञ्जकत्वमुक्तम्। अभिधामूलां व्यञ्जनामाह ।

**३२. अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।**
**संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ।।**

अनेकार्थस्य - अनेके अर्थाः यस्य तस्य - अनेकत्र गृहीतशक्तिकस्य शब्दस्य वाचकत्वे अभिधायां संयोगाद्यैः नियन्त्रिते - एकत्र नियमिते अवाच्यार्थस्य - अभिधया प्रतिपादयितुमशक्यस्य धीकृत् - प्रतीतिहेतुः या व्यापृतिः - या व्यापारः सा अञ्जनम् व्यञ्जनमित्यर्थः।

अभिधया बोधयितुमशक्यार्थस्य बोधने समर्था वृत्तिः व्यञ्जना इति । इयम् अभिधा मूला शाब्दी व्यञ्जना।

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ।।**
**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ।।**

संयोगः - प्रसिद्धसंबन्धः। उदा - सशङ्खचक्रो हरिः। अत्र यमानिलइन्द्रविष्णु इत्याद्यनेकार्थस्य हरिशब्दस्य वाचकता शंखादिसंयोगेन विष्णौ नियम्यते।

विप्रयोगः - प्रसिद्धसंबन्धविभागः। अशङ्खचक्रहरिरित्युच्यते। हरिशब्दस्य नानार्थकत्वेऽपि विष्णोऽन्यत्र शंखादिविभागभावात् वाचकता विप्रयोगेन अच्युते नियम्यते।

साहचर्यम् - एकस्मिन् कार्ये मिथः सापेक्षत्वं सादृश्यं वा। यथा - रामलक्ष्मणौ इति दाशरथी। अत्र रामशब्दो अनेकार्थकः लक्ष्मणशब्दस्य साहचर्यात् रामः दाशरथिः इति।

अत्र रामशब्दो अनेकार्थकः लक्ष्मणशब्दस्य साहचर्यात् रामः दाशरथिः इति।

विरोधिता - वध्यघातकत्वं सहानवस्थानं च।

यथा - रामार्जुनौ - रामार्जुनगतिः तयोः भार्गवकार्तवीर्ययोः। अर्जुनकार्तवीर्यार्जुनविरोधित्वात् रामः जामदग्न्य इति।

अर्थः अनन्यथासाध्यं फलम्। स्थाणुं भज भवच्छिदे इति हरे। स्थाणुः भवच्छिदे संस्कारच्छेदाय। स्थाणुर्वा न ध्रुवः शंकुः स्थाणू रुद्र उमापतिः इति अनेकार्थस्य स्थाणुशब्दस्य भवच्छेदरूपेण फलेन शिवे नियम्यते।

प्रकरणं वक्तृश्रोतृबुद्धिस्थता। सर्वं जानाति देव इति युष्मदर्थे। अत्र नानार्थकदेवशब्दस्य वाचकता प्रकरणेन युष्मदर्थे राजनि नियम्यते। लिङ्गं संयोगातिरिक्तसंबन्धेन परपक्षव्यावर्तको धर्मः। कुपितो मकरध्वज इति कामम्। अत्र मकरः नक्रः जन्तुविशेषस्तदाकारः स एव वा ध्वजो यस्येति विग्रहे नानार्थकस्य मकरध्वजशब्दस्य वाचकता मकराकारध्वजसमुद्राभ्यां व्यावृत्तेन समवायसम्बन्धवता कोपरूपलिङ्गेन - मन्मथे नियम्यते।

शब्दस्यान्यस्य सन्निधिः समासाद्यनधीन समानार्थताकशब्दान्तरसमभिव्याहारः। देवस्य पुरोरातेरिति शम्भौ। अन्यादि राजादिशब्दस्य पुराराततित्वासम्भवेन तत्समभिव्यवहारेण अनेकार्थस्य देवशब्दस्य वाचकता शम्भौ नियम्यते।

सामर्थ्यं कारणता। मधुना मत्तः कोकिल इति वसन्ते इत्यत्र मधुशब्दस्य पुष्परसे, मद्ये, वसन्ते इत्यादि नानार्थस्य मधुशब्दस्य कोकिलमादनसामर्थ्येन वसन्ते नियम्यते।

औचिती योग्यता। पातु वो दयितामुखम् इति सम्मुख्ये। मुखम् इत्यस्य वक्त्रे प्रारम्भ इत्यादि नानार्थकस्य वाचकता उत्कण्ठितमनोरथसाधनौचित्येन साम्मुख्ये आनुकूल्ये नियम्यते। दयितामुखं वो - युष्माकं सम्मुखीभवतु इति अर्थ तात्पर्यम्।

देशविशेषे यथा - भात्यत्र परमेश्वर इति राजधानीरूपात् देशात् राजनि। अत्र परमेश्वशब्दस्य विष्णु शिव राजादौ शक्ततया नानार्थकत्वेन तस्य वाचकता राजधानीरूपदेशेन राजनि नियम्यते।

कालो यथा चित्रभानुर्विभाति इति। चित्रा भानवः - किरणाः यस्य इति विग्रहे नानार्थकस्य चित्रभानुशब्दस्य वाचकता दिने सूर्ये रात्रौ प्रयोगे वह्नौ च नियम्यते।

व्यक्तिः पुंस्त्वादि लिङ्गम्। मित्रं भाति इति सुहृदि। नानार्थकस्य मित्रशब्दस्य वाचकता नपुंसकव्यक्त्या सुहृदि नियम्यते। मित्रो भवति रवौ पुल्लिङ्गव्यक्त्या सूर्ये नियम्यते।

स्वरादयः उदात्तादि। इन्द्रशत्रुः इत्यादौ वेदे एव, न काव्ये स्वरो विशेषप्रतीतिकृत्। इन्द्रशत्रुर्विवर्धस्व इति वेदे इन्द्रः शत्रुः शातयिता यस्येति। आद्युदात्त्वेन इन्द्रस्य शालनकर्तृत्वागमः। न तु इन्द्रस्य शत्रुः इन्द्रशत्रुः इति षष्ठी तत्पुरुषे अन्त्योदात्तत्वेन इन्द्रस्य शासनकर्तृत्वावगमः इति। इति नानार्थकस्य वाचकता स्वरेण नियम्यते।

स्वरादयः इत्यत्र आदि पदेन अनियममुदाहरति।

एतावन्मात्रस्तनिका एतावन्मात्रभ्यामक्षिपत्राभ्याम्।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः।।

चिरप्रवासिनि नायके नायिकायाः अवस्थां निरूपयन्त्याः कस्याश्चित् उक्तिरियम्। एतावन्मात्रौ आमलकादिरूपौ परिमाणौ स्तनौ यस्याः सा तथाभूता।

एतावन्मात्रे ताभ्यामक्षिपत्राभ्यां - नयनदलाभ्यामुपलक्षिता तथाविधैः दिवसैः एतावन्मात्रावस्था स्वरूपं यस्याः सा इत्यर्थः।

अत्र बुद्धिस्थ तत्तदर्थशक्तस्य नानार्थस्य एतत् शब्दस्य वाचकता अभिनयेन स्तनप्रदर्शने आमलकमुकुलाद्याकार रूपेण अक्षिप्रदर्शने उन्नतापुष्प्यादिप्रदर्शकरूपेण दिवसप्रदर्शने अङ्गुल्यग्रधारणादिरूपेण स्तनादिगतपरिमाणविशेषरूपे अर्थ नियम्यते।

इत्थं संयोगादिभिः अर्थान्तराभिधायकत्वे निवारितेऽपि अनेकार्थस्य शब्दस्य यत्क्वचित् अर्थान्तरप्रतिपादनं तत्र नाभिधा नियमनास्तस्याः। मुख्यार्थबाधाद्यभावात् न च लक्षणा। अपि तु अञ्जनं व्यञ्जनमेव व्यापारः।

यथा - भद्रात्मनो दुरधिरोहतनोर्विशाल-वंशोन्नतेः कृतशिलीमुखसंग्रहस्य।
यस्यानुप्लवगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् ।।

कस्यचित् राज्ञः वर्णनमिदम्। यस्य राज्ञः करः सततं निरन्तरं दानस्य यदम्बुविरतणस्य यद् जलं तस्य सेकेन - सेचनेन सुभगः - शोभनः अभूत्। कीदृशस्य? भद्रात्मनः - शोभनात्मनः दुरधिरोहतनोः परैः अनभिभवनीयशरीरस्य, तथा विशाले वंशे - महनीये कुले उन्नतिः - ख्यातिः यस्य तस्य कृतशिलीमुखसंग्रहस्य - विहितबाणाभ्यासस्य अनुपप्लुतगतेः - अबाधितज्ञानस्य तथा परवारणस्य-शत्रुनिवारणस्य च राज्ञः इति। प्राकरणिकार्थः।

अप्राकरणिके गजपक्षे तु यस्य परवारणस्य - परस्य उत्कृष्टस्य - गजस्य करः – शुण्डा दानाम्बुसेकसुभगः - मदजलसेकसुन्दरोऽभूत्। कीदृशस्य ? भद्रात्मनः महाजातीयस्य तथा दुराधिरोहतनोः- दुःखाधिरोहशरीरस्य तथा विशालवंशस्य उन्नतेः पृष्ठदण्डोन्नतिरुच्चता यस्य तस्य तथा कृतशिलीमुखसंग्रहस्य स्वमदसुगन्धिना कृतभ्रमरसंग्रहस्य तथा अनुपप्लुतगतेः अनुद्धतगमनस्य इत्यर्थः। अत्र या द्वितीयार्थप्रतीतिः तत्राभिधायाः, प्रकृतार्थबोधनविरामात् लक्षणायाश्च मुख्यार्थबाधादित्रयहेतोः अभावात् व्यञ्जनाख्या वृत्तिः।

**३३. तद्युक्तो व्यञ्जकः शब्दः।**

व्यञ्जनायुक्तः शब्दः व्यञ्जक इत्युच्यते।

**३४. यत्सोऽर्थान्तरयुक् तथा।**

अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः।।

ननु भद्रात्मन इत्याद्युदाहरणे शब्दमात्रस्य व्यञ्जकत्वेऽपि शब्दार्थयुगलरूपकाव्यस्य व्यञ्जकत्वाभावात्कथं ध्वनित्वमित्याशङ्क्य सहकारिकतया अर्थस्य व्यञ्जकत्वमस्तीत्याह - यत्सोऽर्थो ... इति।

स शब्दः यत् यस्मात् कारणात् अर्थस्य स्वशक्यप्रकृतार्थस्य अन्तरेण - व्यवधानेन युक् - युक्तः तथा व्यञ्जको भवति। अतः तत्र काव्ये अर्थोऽपि स्वशक्यप्रकृतार्थोऽपि सहकारितया - अप्रधानतया व्यञ्जकः मतः - सम्मतः। व्यङ्ग्यार्थबोधादर्थस्य सहकारित्वम्।

इति काव्यप्रकाशे द्वितीयोल्लासः।

## पुनरावृत्तिः (Recap)

- काव्यप्रकाशे द्वितीयोल्लासे शब्दार्थयोः स्वरूपं निरूपयति ग्रन्थकारः।
- तत्र शब्दत्रैविध्यं वाचक- लक्षक-व्यञ्जकशब्दाः।
- अर्थाः -वाच्य-लक्ष्य-व्यङ्ग्याः अर्थाः। पुनः तात्पर्यार्थः च।
- ततः शब्दव्यापाराः अभिधा लक्षणा व्यञ्जनादिकमपि निरूपितम्।

- साक्षात्साङ्केतितं योऽर्थमभिधत्ते स वाचकः।
- यः शब्दः साक्षात्साङ्केतितमव्यवधानेन गृहितसङ्केतमर्थं जात्यादिरूपं अभिधत्ते सः शब्दः वाचक इति।
- सङ्केतग्रहणविषयो अर्थः चतुर्विधः। जातिः-गुण-क्रिया-यदृच्छारूपः इति।
- पुनः व्यापारः - स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्यभिधोच्यते।
- तत्र सङ्केतितेऽर्थे अस्य शब्दस्य यो मुख्यः व्यापारः अभिधा।
- शब्दः वाचकः लक्षकः व्यञ्जकश्चेति त्रिविधः। अर्थाः अपि वाच्यलक्ष्यव्यङ्ग्यभेदेन त्रिविधः। अर्थद्योतकशक्तयः अपि त्रिविधः। तत्रादौ अभिधा शक्तिः।
- स मुख्याऽर्थस्तत्र मुख्यो व्यापारऽस्यामभिधोच्यते। मुख्यार्थस्य अथवा संकेतितार्थस्य बोधजनको व्यापारः अभिधा इति।
- लक्षणा - मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
  अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया ॥
- उपादानलक्षणस्य लक्षणम्- स्वसिद्धये पराक्षेपः।
- लक्षणा षट् विधा।
- उपाधिः द्विविधः - वस्तुधर्मो वक्तृयदृच्छासन्निवेशितश्च।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. व्यञ्जनाव्यापारः कुत्र प्रवर्त्तते?
2. किं नाम व्यञ्जना?
3. विप्रयोगेन अर्थसंसिद्धेरुदाहरणं किम्?
4. शब्दस्यान्यस्य सन्निधौ वाचकत्वनियामस्य उदाहरणं किम्?
5. अभिधामूलव्यञ्जकस्य उदाहरणश्लोकः कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

1. लक्षणाप्रयोजनस्य बोधने कः समर्थः ?
2. व्यञ्जना कतिविधा ?
3. शब्दीव्यञ्जनायाःकति भेदाः?
4. मित्रं भातीति सुहृदि, मित्रो भातीति रवौ इति कस्य उदाहरणम् ?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the question in a paragraph)**

1. शब्दवृत्तयः।
2. व्यञ्जनायाः लक्षणं किम् ?
3. व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने - व्याख्यात।

## निर्दिष्टाभ्यासः (Assignments)

1. अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
2. संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ।। - व्याख्यात ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. यत्र अभिधया लक्षणया वा अभीष्टार्थो न लक्ष्यते तत्र व्यञ्जनाव्यापारः।
2. अभिधया बोधयितुं अशक्यार्थस्य बोधने समर्था वृत्तिः व्यञ्जना।
3. 'अशङ्खचक्रो हरिः' इति।
4. देवस्य पुरोरातेरिति।
5. 'भद्रासानो दुरधिरोह …' इत्ययं श्लोकः।

## सूचनाग्रन्थाः (References)


1. काव्यप्रकाशः - मम्मटाचार्यः (नागेश्वरीटीकासहितः) Reprint - 2019 चौखम्बाप्रकाशन् पोस्ट् बोक्स् नं -११५० के ३७/११६, गोपालमन्दिर लेन् वाराणसी - २२१००१
2. संस्कृतसाहित्येतिहासः - आचार्यः श्रीरामचन्द्रमिश्रः। Printed & published - 1985 चौखम्बा विद्याभवन् वाराणसी – २२१००१
3. साहित्यदर्पणः - विश्वनाथः (लक्ष्मीव्याख्यासहितः) Printed & published – 1967 चौखम्बा संस्कृतसीरीस् वाराणसी -२
4. औचित्यविचारचर्चा - महाकवि क्षेमेन्द्रः (प्रभाव्याख्या) Published - 1982 चौखम्बा विद्याभवन् वाराणसी – २२१००१
5. ध्वन्यालोकः - आनन्दवर्धनाचार्यः Malayalam - व्याख्या ई.वि. दामोदरः Published - 1973 NBS Kottayam.

BLOCK - 5

# काव्यालङ्कारसूत्रवृत्तिः- वामनः।

# तत्र प्रथमं शारीराधिकरणम्।

# प्रथमद्वितीयाध्यायौ।

SGOU

# Unit -1
## प्रथमः अध्यायः(पञ्चसूत्राणि)

### उद्देश्यानि(Learning Outcomes)

- भारतीयनिरुपणशास्त्रस्य ज्ञानं लभते ।
- साहित्यनिरुपणशास्त्रे रीतिं परिचिनोति।
- वामनाचार्यस्य काव्यालङ्कारसूत्रवृत्तिं नाम काव्यशास्त्रग्रन्थस्य महत्वं जानाति ।
- वामनाचार्यस्य काव्यलक्षणं, अलङ्कारलक्षणं, काव्यप्रयोजनं च गृह्णाति।
- सूत्रपठने नूतनपदावलीपरिचयः।

### प्राग्व्यपेक्षाः (Pre requisites)

भारतीयसाहित्यनिरुपणशास्त्रस्य साहित्यशास्त्रं, काव्यशास्त्रं, काव्यमीमांसा, साहित्यमीमांसा, अलङ्कारशास्त्रं इति संज्ञान्तराणि भवन्ति। साहित्यनिरुपणशास्त्रस्य अष्टौ सम्प्रदायाः अथवा पद्धतयः सन्ति। तासां नामानि रसपद्धतिः, अलङ्कारपद्धतिः, गुणपद्धतिः, रीतिपद्धतिः, ध्वनिपद्धतिः, औचित्यपद्धतिः, वक्रोक्तिपद्धतिः, अनुमानपद्धतिः इति। आसु पद्धतिषु रीतिपद्धतेः उपज्ञाता भवति वामनाचार्यः। वामनाचार्यः दण्डिनः पश्चाज्जातः ध्वन्यालोककारस्य आनन्दवर्धनस्य पूर्वजः च आसीत्। वामनाचार्यः काश्मीरर्देशी आसीत्।

सूत्ररूपेण रचितः प्रथमालङ्कारग्रन्थः भवति वामनाचार्यस्य काव्यालंकारसूत्रवृत्तिः। सूत्रं नाम मितं च सारं च वचनम्। मितैः शब्दैः तत्वनिरूपणं सूत्रमाध्यमेव क्रियते। वामनेन काव्यालङ्कारसूत्रं विहितं अथैव तस्य अर्थस्य स्पष्टीकरणानि तेन वृत्तिः अपि निर्मिता। काव्यालङ्कारसूत्रे पञ्चाधिकरणानि, द्वादश अध्यायाः च सन्ति। काव्यशरीरं, दोषं, गुणं, अलङ्कारं शब्दबुद्धिः इत्यादयः सन्ति। अधिकरणे अध्यायाः सन्ति। काव्यालंकारसूत्रवृत्तेः प्रथमे अधिकरणे(शरीरे) प्रथमोऽध्याये काव्यलक्षणं, काव्यशब्दं, सौन्दर्यमलङ्कारः, काव्यकारणं, काव्यप्रयोजनं इत्यादयः अस्मिन्नेकके विशदयति।

## मुख्यपदानि (Keyterms)

ग्राह्यमुपादेयं, करणव्युत्पत्या, हानाद्, आदानाद्, शास्त्रतस्ते, सदृष्टादृष्टार्थ, प्रीतिकीर्तिहेतुत्वात्।

## Discussion

### अथ प्रथमे अधिकरणे प्रथमोऽध्यायः

प्रणम्य परं ज्योतिर्वामनेन कविप्रिया।
काव्यालङ्कारसूत्राणां स्वेषां वृत्तिर्विधीयते।।

**काव्यं ग्राह्यं अलङ्कारात् ।।१।।**

काव्यं खलु ग्राह्यमुपादेयं भवति। अलङ्कारात्। काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः वर्तते। भक्त्या तु शब्दार्थमात्रवचनोऽत्र गृह्यते ।।

**व्याख्या-**

गुणालङ्कारसंस्कृतयोरिति - गुणैः - ओजः प्रमुखैः अलङ्कारैः, यमकोपमादिभिश्चसंस्कृतयोः अलङ्कृतियोरित्यर्थः। रीतिसम्प्रदायस्य उपज्ञाता वामनः स्वस्य काव्यालङ्कारसूत्रवृत्तिः नाम ग्रन्थे काव्यं ग्राह्यमलङ्कारात् इति सूत्रेण अलङ्कारात् एव काव्यं उपादेयं भवति इति वदति। गुणालङ्कार संस्कृतशब्दार्थरूपकाव्यस्य स्वीकार्यत्वम् अलङ्कारदेव भवतीत्याशयः।

विविधैः आलङ्कारिकैः काव्यस्य विविधानि लक्षणानि उक्तवन्तः। तेषु प्रमुखस्य वामनाचार्यस्य काव्यलक्षणं भवति 'काव्यं ग्राह्यं अलङ्कारात्' इति। वामनाचार्यः स्वस्य ग्रन्थे काव्यलक्षणं विशदयति। अलङ्कारत्वात् काव्यं उपादेयं भवति। वामनः काव्यशब्दं एव विशदयति। काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः वर्तते। भक्त्या तु शब्दार्थमात्रवचनोऽत्र गृह्यते। गुणालङ्कारसहितौ शब्दार्थौ काव्यमित्यर्थः। लक्षणया केवलं शब्दार्थौ काव्यमिति सिद्ध्यति।

अलङ्कारशब्दोऽयं किं भावसाधनः, उत करणसाधन इति सन्देहात् पृच्छति-

कोऽसावलङ्कार इत्यत आह-

**सौन्दर्यमलङ्कारः ।।२।।**

अलङ्कृतिरलङ्कारः। करणव्युत्पत्या पुनरलङ्कारशब्दोऽयम् उपमादिषु वर्तते।

**व्याख्या-**

**पदार्थः** – अलङ्कृतिः – अलङ्करणमिति।

लक्ष्यति - निरूपयति ।

द्वितीयेन सूत्रेण अलङ्कारं लक्ष्यति वामनः- सौन्दर्यमलङ्कारः इति। अत्र व्युत्पत्तिः द्विविधा उच्यते- भावव्युत्पत्तिः, करणव्युत्पतिः च। अलङ्क्रियते इति अलङ्कारः इति भावव्युत्पत्तिः। तथा च अलङ्कारशब्दस्य अलङ्कृतिः – अलङ्करणं इत्यर्थः सिद्ध्यति। अलङ्क्रियते अनेन इति अलङ्कारः इति करणव्युत्पत्तिः। करणव्युत्पत्तिस्वीकारेण यमकानुप्रासादयः शब्दालङ्कारः उपमोत्प्रेक्षादयः अर्थालङ्कारश्च अलङ्कारशब्देन गृह्यन्ते।

इत्थं अलङ्कारपदार्थं समर्थ्य तस्य कारणं वक्तुमुत्तरसूत्रमुपक्षिपति-

**स दोषगुणालङ्कारहानादानाभ्याम् ।।३।।**

स खल्वलङ्कारो दोषहानाद् गुणालङ्कारादानाच्च संपाद्यः कवेः।

**व्याख्या -**

**पदच्छेदः** – खल्वलङ्कारः = खलु + अलङ्कारः ।

गुणालङ्कारादानाच्च = गुणालङ्कारादानात् + च ।

**पदार्थः** – हानात् – त्यागात्।

आदानात् - स्वीकारात् ।

सौन्दर्यरूपः अलङ्कारः कथं सम्पाध्यः इति स दोषगुणालङ्कारहानादानाभ्याम् इति सूत्रेण वामनः प्रतिपादितवान्। सः अलङ्कारः दोषस्य हानात् –त्यागात् गुणालङ्कारयोः आदानात् स्वीकारात् च सम्पाध्यः इति वामनस्य मतम्।

**शास्त्रतस्ते ।।४।।**

ते दोषगुणालङ्कारहानादाने। शास्त्रादस्मात्। शास्त्रतो हि ज्ञात्वा दोषाञ्जह्याद् गुणालङ्कारांश्चाददीत्।

कथं दोषस्य हानं, गुणालङ्कारयोः आदानं च कर्तव्ये इति "शास्त्रतस्ते" इति सूत्रेण वामनेन प्रतिपाद्यते। ।

शास्त्रतः ते इति पदच्छेदः। ते इत्यस्य दोषस्य हानं, गुणालङ्कारयोःआदानं च अर्थः। शास्त्रतः इत्यस्य शास्त्रात् काव्यालङ्कारनाम्नः अस्माद् ग्रन्थाद् इत्यर्थः। दोषस्य गुणालङ्कारयोः आदानं च अर्थः। दोषस्य गुणालङ्कारयोश्च लक्षणं स्वरूपं च अस्माद् ग्रन्थाद् विज्ञाय हानादाने कर्तव्ये इत्याशयः।

किं पुनः फलम् अलङ्करवता काव्येन ? येनैतदर्थोऽयमित्याह-

**काव्यं सद् दृष्टाऽदृष्टार्थं प्रीतिकीर्तिहेतुत्वात् ।।५।।**

काव्यं सत् - चारु दृष्टप्रयोजनं, प्रीतिहेतुत्वात् । अदृष्टप्रयोजनं कीर्तिहेतुत्वात्। अत्र श्लोकाः -

"प्रतिष्ठां काव्यबन्धस्य यशसः सरणिं विदुः।
अकीर्तिवर्तिनीं त्वेव कुकवित्वविडम्बनाम् ।।१।।
कीर्तिं स्वर्गफलामाहुरासंसारं विपश्चितः।
अकीर्तिं तु निरालोकनरकोद्देशदूतिकाम् ।।२।।
तस्मात् कीर्तिमुपादातुमकीर्तिं च निवर्हितुम् ।
काव्यालङ्कारसूत्रार्थः प्रसाद्यः कविपुङ्गवैः"।।३।।

**व्याख्या-**

काव्यप्रयोजनं द्विविधम् । दृष्टं अदृष्टं च इति। दृष्टप्रयोजनं प्रीतिः आनन्दप्राप्तिः। अदृष्टप्रयोजनं कीर्तिः यशप्राप्तिः। "प्रतिष्ठां .........प्रसाद्यः कविपुङ्गवैः" इमे श्लेकाः काव्यप्रयोजनं वदन्ति। काव्यं यशसः मार्गो भवति इति पण्डिताः वदन्ति। कीर्तिः स्वर्गप्राप्तेः हेतुः। अकीर्तिस्तु नरकं प्रापयति। अतः कीर्तिं सम्पादितुं अकीर्तिं अपाकर्तुं च सत्काव्यं प्रयोजकी भवति। सत्काव्यरचनार्थं च काव्यालङ्कारः पठनीयः।

शारीरे प्रथमेऽधिकरणे प्रथमोऽध्यायः समाप्तः।

## पुनरावृत्तिः (Recap)

- अलङ्कारत्वात् काव्यं उपादेयं भवति ।
- काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः वर्तते।
- काव्यं ग्राह्यमलङ्कारात्।
- अलङ्करोति इति अलङ्कारः।
- व्युपत्तिः द्विधा।
- सौन्दर्यरूपः अलङ्कारः।
- दोषस्य हानम्।
- गुणालङ्कारयोः आदानम्।
- काव्यप्रयोजनम् – दृष्टम् अदृष्टमं च।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. काव्यालङ्कारसूत्रवृत्तिः नाम ग्रन्थस्य कर्ता कः ?
2. वामनाचार्यस्य पद्धतिः का ?
3. काव्यं ग्राह्यमलङ्कारात् - कस्येदं वचनम् ?
4. अलङ्कारशास्त्रस्य समस्तसिद्धान्तानां सूत्रात्मकः ग्रन्थः कः?
5. कस्मात्काव्यं उपादेयं भवति ?
6. किं अलङ्कारः ?
7. शास्त्रतस्ते इति सूत्रस्य पदच्छेदः कः?
8. शास्त्रातः इत्यस्य अर्थः कः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

1. वामनाचार्यमतानुसारं काव्यलक्षणम्।
2. काव्यं विशदयत।
3. सौन्दर्यरूपः अलङ्कारः कथं सम्पाध्यः?

## निर्दिष्टाभ्यासः (Assignments)

1. 'सौन्दर्यमलङ्कारः' ।
2. काव्यप्रयोजनम् ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. वामनाचार्यः ।
2. रीतिपद्धतिः ।
3. वामनाचार्यस्य ।
4. काव्यालङ्कारसूत्रवृत्तिः ।
5. अलङ्कारात् ।
6. सौन्दर्यम् ।
7. शास्त्रतः + ते।
8. शास्त्रात्।

## सूचनाग्रन्थाः (References)


1. श्रीमद्वामनाचार्यविरचिता काव्यालङ्कारसूत्रवृत्तिः (कामधेनुविध्याधरीव्याख्योपेतम्) चौखम्बा कृष्णदास् अक्कादमी वारणासि,२०१४ ।
2. काव्यालङ्कारः। श्री भामहाचार्येण विरचितः चौखम्बा संस्कृतभवन् वारणासि ।
3. Kavyalankarasutra Vritti, Kamadenu, Sriranam, Sri vani Vilas press, 1909

# Unit - 2
# द्वितीयेऽध्याये (1 - 5 सूत्राणि)

## उद्देश्यानि (Learning Outcomes)

- काव्यशास्त्रेऽवगाहः।
- वामनाचार्यस्य काव्यालङ्कारसूत्रवृत्तिं नाम काव्यशास्त्रग्रन्थस्य महत्वं जानाति।
- अलङ्कारलक्षणम्, अधिकारिनिर्णयः कवयः कतिविधः इत्यादीनि पठन्ति।

## प्राग्व्यपेक्षाः (Pre requisites)

अलङ्कारशास्त्रप्रस्थाने नैके आचार्याः तेषां योगदानैः विराजमानाः दृश्यन्ते। तत्र भरत-भामह-दण्डि-वामन -आनन्दवर्धन -अभिनवगुप्त- उद्भट –रुद्रट –कुन्तक –क्षेमेन्द्र –विश्वनाथ –मम्मट –जगन्नाथ -विश्वनाथ- भोजराजप्रभृतयः भूयांसः विद्वांसः सन्ति । भरतमुनेः रससम्प्रदायः, भामहोद्भटरुद्रटादीनां अलङ्कारसम्प्रदायः, दण्डिवामनयोः रीतिसम्प्रदायः, कुन्तकस्य वक्रोक्तिः, आनन्दवर्धनाभिनवगुप्तयोः ध्वनिपद्धतिः, क्षेमेन्द्रस्य औचित्यसम्प्रदायः अपि साहित्यमण्डले देदीप्यमाना एव।

वामनाचार्यस्य काव्यालङ्कारसूत्रवृत्तौ आत्मतत्वम् आविष्करोति। काव्यस्य आत्मतत्वाविष्करणं कृत्वा सः आचार्यः वामनः द्वितीये अध्याये प्रथमं प्रयोजनसम्बन्धं अधिकारिणं विशदयति। वामनमते द्विप्रकाराः कवयः। कवीनां स्भावमस्मिन्नेकके वर्णयति।

## मुख्यपदानि (Keyterms)

अधिकारी, अरोचकिनः, सतृणाभ्यवहारिणः, शासनीयः, विपर्ययात्, कतकम्, अद्रव्येषु पङ्कप्रसादनाय।

**Discussion:**

### प्रथमेऽधिकरणे द्वितीयोऽध्यायः

अधिकारिनिरूपणार्थमाह-

**अरोचकिनः सतृणाभ्यवहारिणश्च कवयः।।१।।**

इह खलु द्वये कवयः संभवन्ति । अरोचकिनः सतृणाभ्यवहारिणश्चेति । अरोचकिसतृणाभ्यवहारिशब्दौ गौणार्थौ। कोऽसावर्थः । विवेकित्वमविवेकित्वचेति ।

**व्याख्या-**

**पदच्छेदः-** सतृणाभ्यवहारिणश्च = सतृणाभ्यवहारिणः + च ।
कोऽसावर्थः = कः + असौ + अर्थः ।
विवेकित्वमविवेकित्वं = विवेकित्वम् + अविवेकित्वम् ।

**पदार्थः -** अरोचकिनः – विवेकिनः ।
सतृणाभ्यवहारिणः – अविवेकिनः ।

काव्यालङ्कारसूत्रवृत्तेः प्रथमाधिकरणे द्वितीयाध्याये अधिकारिनिरूपणप्रसङ्गे अरोचकिनः सतृणाभ्यवहारिणः इति कवयः द्विधा इत्युक्तम्। अरोचकिनः विवेकशीलनः, सतृणाभ्यवहारिणस्तु अविवेकिनश्च भवन्ति।

एषु सतृणाभ्यवहारिणः अथवा अविवेकिनः न शिष्यः शासनीया भवन्ति। तेषु विषये शास्त्रं न उपयोगी स्यात्। अविवेकिषु शास्त्रोपदेशः निष्फलः स्यात्।

**पूर्वे शिष्याः विवेकित्वात् ।।२।।**

पूर्वे खल्वरोचकिनः, शिष्याः शासनीयाः। विवेकित्वात् विवेचनशीलत्वात्।

**व्याख्या -**

**पदच्छेदः -** खल्वरोचकिनः = खलु + अरोचिकनः ।

**नेतरे तद्विपर्ययात् ।।३।।**

इतरे सतृणाभ्यवहारिणो न शिष्यः। तद्विपर्ययात्। अविवेचनशीलत्वात् । न च शीलमपाकर्तुं शक्यम्।

**व्याख्या-**

**पदच्छेदः** – नेतरे = न + इतरे ।

**पदार्थः** - अपाकर्तुम् – परिवर्तयितुम् । नेतरे इत्यनेन अविवेकिनः इत्यर्थः। ते शासनाय अनर्हाः।

नन्वेवं न शास्त्रं सर्वानुग्राहिस्यात्, को वा मन्यते? तदाह-

**न शास्त्रमद्रव्येष्वर्थवत् ।।४।।**

न खलु शास्त्रमद्रव्येष्वविवेकिष्वर्थवत् ।

व्याख्या-

**पदच्छेदः** - शास्त्रमद्रव्येषु + अर्थवत्- शास्त्रमद्रव्येष्वर्थवत्

शास्त्रं न अद्रव्येषु अर्थवत् । शास्त्रोपदेशद्वारा यत्र सद्भिः विधायमानाः गुणाः संक्रामान्ति तद् द्रव्यमिव विवक्षितम्। तद्विपरीतानि अद्रव्याणि। गुणहीनाः अविवेकिनः इत्यर्थः।

**न कतकं पङ्कप्रसादनाय ।।५।।**

न हि कतकं पयस इव पङ्कप्रसादनाय भवति।

व्याख्या-

अविवेकिषु शास्त्रोपदेशः निष्फलः स्यात्। आशयस्यास्य स्थापनार्थं सूत्रं उच्यते - "न कतकं पङ्कप्रसादनाय" इति। कतकं पङ्कप्रसादनाय न भवतीत्याशयः। कतकं जलशुद्धीकरणार्थं उपयुज्यमानं वस्तु । कतकेन जलं मालिन्यमुक्तं भवति। पङ्कं जलगतं मृण्मयं मालिन्यम्। कतकेन पङ्कं निर्माजयितुं न शक्यते। पङ्कस्य प्रसादनं पङ्कप्रसादनं, तस्मै पङ्कप्रसादनाय इति विग्रहः। यथा जलात् पङ्कं निर्माजयितुं कतकं न पर्याप्तं (शक्यं) भवति, तथा अविवेकिनाम् अविवेकं नाशयितुं शास्त्रोपदेशस्य शक्तिः न अस्ति इति समन्वयः। अत एव सतृणाभ्यवहारिणः अविवेकिनः शासयितुं अशक्याः इत्युक्तम्।

## पुनरावृत्तिः (Recap)

- अरोचकिनः सतृणाभ्यव्यवहारिणः च कवयः। अरोचकिनः शिष्याः।
- अविवेकिनः शिष्याः, शासनीयाः न भवन्ति ।
- अविवेकिषु शास्त्रोपदेशः निष्फलः भवति।
- कतकं जलशुद्धीकरणार्थं उपयुज्यमानं भवति ।
- अविवेकिनां अविवेकं नाशयितुं शास्त्रोपदेशस्य शक्तिः न अस्ति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. सतृणाभ्यवहारिणः के?
2. केषु शास्त्रोपदेशः निष्फलः भवति ?

3. केन जलं मालिन्यमुक्तं भवति ?
4. अधिकारी कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. के शासनीयाः न भवन्ति ?
2. कतकं किमर्थं उपयुज्यते ?
3. किं नाशयितुं शास्त्रोपदेशस्य शक्तिः नास्ति ?
4. वामनमते कवयः कतिविधाः? के च ते ?

## निर्दिष्टाभ्यासः (Assignments)

1. "न कतकं पङ्कप्रसादनाय" इति सूत्रं विशदयता।

## उत्तराणि (Answer to Objective type questions)

1. अविवेकिनः।
2. अविवेकिषु।
3. कतकेन।
4. कविः।

## सूचनाग्रन्थाः (References)

1. श्रीमद्वामनाचार्यविरचिता काव्यालङ्कारसूत्रवृत्तिः (कामधेनुविध्याधरीव्याख्योपेतम्) चौखम्बा कृष्णदास् अक्कादमी वाराणसि २०१४
2. काव्यालङ्कारः। श्री भामहाचार्येण विरचितः चौखम्बा संस्कृतभवन् वाराणसि ।
3. Kavyalankarasutra Vritti, Kamadenu, Sriranam, Sri vani Vilas press, 1909

BLOCK - 6

# काव्यालङ्कारसूत्रवृत्तिः- वामनः।
# तत्र प्रथमं शारीराधिकरणम्। द्वितीयाध्यायस्य शिष्टभागः।

# Unit -1
# द्वितीयेऽध्याये रीतिविनिश्चयः (6 - 13 सूत्राणि)

## उद्देश्यानि (Learning Outcomes)

- साहित्यनिरुपणशास्त्रस्य अष्टौ सम्प्रदायानां ज्ञानं लभते ।
- रीतिसम्प्रदायस्य महत्त्वं जानाति ।
- रीतिलक्षणं, रीतिविभागश्च पठति।
- वामनमतानुसारं रीतिः काव्यस्यात्मा भवति इति ज्ञानमार्जयति।
- नूतनपदावलीपरिचयः।

## प्राग्व्यपेक्षाः (Prerequisites)

काव्यसौन्दर्यस्य विधायकानां सम्पूर्णतत्वानां विवेचनशास्त्रमेव अलङ्कारशास्त्रम्। अलङ्कारः काव्यस्य महत्वपूर्णमार्गं वर्तते। अलङ्कृतिरलङ्कारः। गुण-रस-रीतिविषयाः अलङ्कारे अन्तर्गताः मन्यन्ते। वामनाचार्यप्रणीतः काव्यालङ्कारसूत्रवृत्तिः एव रीतिपद्धतेः प्रामाण्यप्रख्यापको ग्रन्थः। रीतिरात्माकाव्यस्य इति काव्यात्मनिर्वचनः क्रियते।

## मुख्यपदानि (Key words)

रीतारात्मा, विशिष्टा पदरचना, गुणात्मा, रीतिस्त्रिधा, वैदर्भी, गौडिया, गुणैरुपेता, माधुर्यसौकुमार्योपपन्ना, गणसूत्रवान्, समासबहुला।

**Discussion:**

अधिकरणो निरूप्य रीतिनिश्चयार्थमाह-

**रीतिरात्माकाव्यस्य ।६।।**

रीतिर्नामियमात्मा काव्यस्य । शरीरस्येवेति वाक्यशेषः।

रीतिः काव्यस्य आत्मा । यथा काव्यस्य शरीरं इव।

**व्याख्या -**

**पदच्छेदः-** शरीरस्येवेति = शरीरस्य + इव + इति।

**पदार्थः** - रीतिः - आत्मत्वम्। शरीरम् - शब्दार्थम्।

रीतिसम्प्रदायस्य उपज्ञाता वामनः। रीतिः काव्यस्यात्मानमङ्गीकरोति "रीतिरात्मा काव्यस्य" इति सूत्रम्। रीणन्ति-गच्छन्ति अस्यां गुणाः इति, रीयते क्षरति अस्यां वाङ्मधुधारा इति वा रीतिशब्दस्य व्युत्पत्तिः वक्तुं शक्यते। रीङ् धातोः अधिकरणार्थे क्तिन् प्रत्यये रीतिशब्दः सिद्ध्यति।

किं पुनरियं रीतित्याह-

**विशिष्टा पदरचना रीतिः ।।७।।**

विशेषवती पदानां रचना रीतिः ।

**व्याख्या-**

**पदार्थः**- विशिष्टा – विशेषवती।

"विशिष्टा पदरचना रीतिः" इति सूत्रेण रीतिः लक्ष्यते। विशिष्टा नाम विशेषवती इत्यर्थः।

कोऽसौ विशेष इत्याह-

**विशेषो गुणात्मा ।।८।।**

वक्ष्यमाणगुणरूपो विशेषः ।

**व्याख्या-**

विशेषः च गुणाः एव। इदमेव "विशेषो गुणात्मा" इत्युक्त्वा वामनः काव्ये गुणानां महत्वं प्रतिपादितवान्। तथा च काव्यगुणवती पदानां रचना रीतिः इति वक्तुं शक्यते।

श्लेषप्रसादः समतामाधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजः कान्तिरसमाधयः।।

इति आचार्यः दण्डी गुणविभागान् उक्तवान्।

आचार्यभरतो 'गुणस्तु दोषाभावः' इत्यमन्यत।

वामनस्तु-

ओजः प्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्यो-
दारताऽर्थव्यक्तिकान्तयो बन्धगुणाः।।

इति सूत्रेण गुणान् निर्दिष्टवान्। वामनमते गुणाः दश । शब्दगुणाः दश, अर्थगुणाः दश। एतैः दशर्गुणैः सहिता विशिष्टा पदरचना रीतिः इति वामनमतम्।

**सा त्रेधा वैदर्भी गौडीया पाञ्चाली चेति ।।९।।**

सा चेयं रीतिः त्रिधाभिध्यते - वैदर्भी, गौडीया, पाञ्चाली चेति ।

**व्याख्या-**

रीतिलक्षणमुक्त्वा रीतेः भेदान् वदति- वैदर्भी, गौडीया, पाञ्चाली इति तिस्रः रीतयः भवन्ति।

किं पुनर्देशवशाद् द्रव्यगुणोत्पत्तिः काव्यानां, येनाऽयं देश-विशेषव्यपदेशः। नैवं यदाह-

**विदर्भादिषु दृष्टत्वात् तत्समाख्या ।।१०।।**

विदर्भगौडपाञ्चालेषु तत्रत्यैः कविभिर्यथास्वरूपमुपलब्धत्वात् तत्समाख्या। न पुनर्देशैः किञ्चिद्रुपक्रियते काव्यानाम्।

**व्याख्या-**

तासु वैदर्भी रीतिः स्वरूपमुपपाद्यते। तत्तद्देशेषु दृष्टत्वात् वैदर्भी, गौडीया, पाञ्चाली इति संज्ञा गुणभेदादेव रीतीनां विभागः इति वामनः।

तासां गुणभेदात् भेदमाह-

**समग्रगुणा वैदर्भी ।।११।।**

समग्रैरोजःप्रसादप्रमुखैर्गुणैरुपेतावैदर्भी नाम रीतिः।

**पदार्थः** - उपेता - संयुक्ता।

**समग्रगुणा वैदर्भी इति सूत्रेण वैदर्भी रीतेः स्वरूपं उच्यते। ओजः प्रसादादिभिः दशगुणैः सहिता वैदर्भी रीतिः।** तस्याः स्वरूपं अनेन श्लोकेन प्रतिपाद्यते।

अत्रश्लोकौ-

अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्भिता ।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते ।।१।।

**पदार्थः** - अस्पृष्टा - असम्बद्धा।
विपञ्ची - वीणा।
गुम्भिता - योजिता।

असाधुत्वादि काव्यदोषाणां लेशैरपि अस्पृष्टा(असहिता) सर्वैरपि ओजः प्रसादादिभिः काव्यगुणैः सम्पन्ना वीणायाः स्वरसंयोगः इव श्रोतॄणां मनोरञ्जिका भवति वैदर्भी रीतिः। इमां वैदर्भीरीतिं कवयः एवं स्तुवन्ति।

तामेतामेवं कवयः स्तुवन्ति -

सति वक्तरि सत्यर्थे सति शब्दानुशासने।

अस्ति तन्न विना परिस्रवति वाङ्मधु ।।२।।

अस्तु भावनासम्पन्नः महान् कविः। अस्तु च महान् अर्थः। अस्तु च कवेः महद् व्याकरणपाण्डित्यं, तथापि काव्यं वैदर्भीरीतिनिबद्धं न चेत् कविवाक्यात् वाङ्मधु न परिस्रवेत्, काव्यस्य हृदयरञ्जकत्वं माधुर्यं च न स्यात्।

**उदाहरणम् –**

अभिज्ञानशाकुन्तले शकुन्तलां दृष्ट्वा प्रणयवंशवदस्य मृगयायाः विरन्तुं इच्छोः दुष्यन्तस्य वचनभूतम्।

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं

छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।।

विश्रब्धं कुरुतां वराहवितितिर्मुस्ताक्षतिं पल्वले

विश्रान्तिं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ।।३।।

**व्याख्या-**

**पदार्थः -** निपानसलिलं – तडागः, शुद्धजलम्।
महिषाः - महिष्याः च महिषाः च ।

इति श्लोकः वैदर्भीरीतेः उत्तममुदाहरणं भवति। श्लोकेऽस्मिन् सर्वेऽपि काव्यगुणाः सम्मिलिताः भवन्ति । अत्र ओजप्रसादयो गुणाः पुरां प्रतिष्टां लभन्ते। "छायाबद्धकदम्बकम्" "शिथिलज्याबन्धम्" बन्धस्य गाढत्वदोजः। "छायाबद्धकदम्बकं मृगकुलम्" इत्यत्र बन्धस्य गाढत्वशैथिल्ययोः संप्लवात् प्रसादः। "महिषा निपानसलिलं" इत्यत्र मसृणत्वाच्छलेषः। "गाहन्ताम्" इत्यारभ्य येनैव मार्गेण प्रक्रमुस्तेनैव मार्गेणोपसंहार इति मार्गाभेदात् समता। "गाहन्ताम्" इत्यत्रारोहः "महिषाः" इत्यत्रावरोहः। एवं अन्यत्र अपि आरोहावरोहक्रमस्फुरणात् समाधिः। "शृङ्गैर्मुहुस्ताडितम्" इति पृथक् पदत्वान्माधुर्यम्। "रोमन्थमभ्यस्यतु" इत्यादौ बन्धस्याऽजरठत्वात् सौकुमार्यम्। "शिथिलज्याबन्धमस्मद्धनुः" इत्यत्र बन्धस्य विकटत्वादुदारता। पदानामुज्ज्वलत्वात् कान्तिः। अर्थाभिव्यक्ति- हेतुत्वात् अर्थव्यक्तिरिति अत्र वैदर्भीरीति।

क्रमप्राप्तां गौडीयामाह-

**ओजः कान्तिमती गौडीया ।।१२।।**

ओजः कान्तिश्च विद्यते यस्यां सा ओजः कान्तिमती। गौडीया नाम रीतिः। माधुर्यसौकुमार्ययोरभावात् समासबहुला अत्युल्बणपदा च।

अत्र श्लोकः -

समस्तात्युद्भटपदामोजः कान्तिगुणान्विताम्।

गौडीयामिति गायन्ति रीतिं रीतिविचक्षणाः ।।४।।

**उदाहरणम्-**

दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-

ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः।

द्राक्पर्यस्तकपालसंपुटमितब्रह्माण्डभाण्डोदर-

भ्राम्यत्पिण्डियचण्डिमा कथमहो नाऽद्यापि विश्राम्यति ।।५।।

**व्याख्या -**

श्रीरामेण भार्गवरामस्य खण्डपरशोः खण्डनं दृष्ट्वा लक्ष्मणस्य वचनमिदम् – दोर्दण्डाञ्चित ........ इत्ययं श्लोकः। महावीरचरिते वर्णनमिदम्।

अहो आश्चर्यम्, धनुर्धरधुरन्धरेण श्रीरामेण गाढकर्षणात् खण्डिते परशुरामस्य कोदण्डभङ्गजानेन भयानकेन टङ्कारध्वनिः अग्रजस्य बालचरितस्य प्रस्तावना भवति। अपि च तत्क्षणे कम्पितस्य ब्रह्माण्डभाण्डस्य उदरात् जाता चण्डिमा इदानीमपि न विश्राम्यति। अत्र बन्धस्य गाढोज्ज्वलयोः उत्कटत्वात् ओजकान्तिगुणौ। समासयुक्तत्वात् अत्युग्रपदयुक्तत्वाच्च गौडीरीतिः।

अथ पाञ्चालीं प्रपञ्चयति।

**माधुर्यसौकुमार्योपपन्ना पाञ्चाली ।।१३।।**

माधुर्येण सौकुमार्येण च गुणेनोपपन्ना पाञ्चाली नाम रीतिः । ओजःकान्त्यभावादनुल्वणपदा विच्छाया च।

वामनेन 'पाञ्चाली'ति तृतीया रीतिरपि प्रकल्पिता।

तथा च श्लोकः-

आश्लिष्टश्लथभौवां तां पूराणच्छायया श्रिताम्।

मधुरां सुकुमारां च पाञ्चालीं कवयो बिदुः ।।६।।

यथा-

ग्रामेऽस्मिन् पथिकाय नैव वसतिः पान्थाऽधुना दीयते
रात्रावत्र विहारमण्डपतले पान्थः प्रसुप्तो युवा ।
तेनोत्थाय खलेन गर्जति घने स्मृत्वा प्रियां तत् कृतं
येनाऽद्यापि करङ्कदण्डपतनाशङ्की जनस्तिष्ठति ।।७।।

हे पथिक, अस्मिन् ग्रामे पथिकाय वसतिः नैव दीयते। केन कारणेन इति श्रृणु। एकदा रात्रौ अस्मिन् विहारमण्डतले युवा कश्चन पथिकः प्रसुप्तो आसीत्। तस्मिन् समये भयानकेन मेघगर्जनेन उत्थाय सः स्वप्रियां स्मृत्वा यत्कृतं तत् (मरणं) संजातम्। तेन अद्यापि शवदण्डपतनशङ्कया जनः वर्तते। एत्र माधुर्यसौकुमार्ययोः गुणयोः सूचनात् पाञ्चालिरीतिः।

वामनाचार्यः रीतिसम्प्रदायस्य प्रतिष्ठापकः। शब्दार्थशरीरस्य काव्यस्य आत्मा रीतिः इति वामनाचार्यस्य मतम्। 'रीतिरात्मा काव्यस्य' इति सूत्रम्। सा रीतिः केति जिज्ञासायां 'विशिष्टा पदरचना रीतिः' इति लक्षणं प्रतिपादितम् । इयं रीतिरेव शैलीत्युच्यते । रचनायां इयं विशिष्टता गुणानां अवस्थित्या उत्पन्न भवति। अत एव गुणोपरि रीतिरवलम्बिता तिष्ठति।

रीतयश्च वैदर्भी, गौडीया, पाञ्चाली चेति त्रिधा भवति । 'समग्रगुणा वैदर्भी', 'ओजः कान्तिमती गौडीया', 'माधुर्यसौकुमार्योपपन्ना पाञ्चाली' इति रीतयः। एतासु तिसृु रीतिषु रेखामिव चित्रं काव्यं प्रतिष्ठितमिति।

## पुनरावृत्तिः (Recap)

- काव्यस्य आत्मा रीतिः।
- रीतिशब्दस्य व्युत्पत्तिः -रीणन्ति गच्छन्त्यस्यां गुणाः इति, रीयते क्षरत्यस्यां वाङ्मधुधारेति वा रीतिः।
- रीङ्धातोः अधिकरणार्थे क्तिन् प्रत्यये कृते रीतिशब्दस्य सिद्धिः ।
- दशगुणैः सहिता विशिष्टा पदरचना रीतिः ।
- वैदर्भी, गौडीया, पाञ्चाली इति तिस्रः रीतयः भवन्ति ।
- एकैकस्याः अपि रीतेः प्रत्येकं विशेषः अस्ति ।
- एतादृशी रीतिः काव्यस्य आत्मा भवति इति वामनमतम् ।
- काव्यशरीरं तु शब्दार्थौ एव ।

## वस्तुनिष्ठप्रश्नाः (Objective typeQuestions)

1. रीतिसम्प्रदायस्य उपज्ञाता कः ?
2. वामनमतानुसारं काव्यस्य आत्मा का ?
3. रीतिशब्दस्य धातुः कः?
4. रीतिलक्षणं सूत्रं किम् ?
5. विशिष्टा इति पदस्य अर्थः कः ?
6. कति गुणान् वामनः अङ्गीकरोति ?

## एकवाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. रीतिशब्दस्य व्युत्पत्तिः ।
2. रीतिलक्षणम् ।
3. रीतेः भेदान् लिखत ।

## निर्दिष्टाभ्यासाः (Assignments)

1. "रीतिरात्मा काव्यस्य" विशदयत।
2. साहित्यनिरूपणशास्त्रस्य अष्टौ सम्प्रदायाः अथवा पद्धतयः अवलोकयत।
3. रीतिलक्षणमुक्त्वा वैदर्भीरीतिं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to objective type Questions)

1. वामनाचार्यः
2. रीतिः।
3. रीङ्।
4. "विशिष्टा पदरचना रीतिः"।
5. विशेषवती।
6. दशगुणाः।

## सूचनाग्रन्थाः (References)

1. श्रीमद्वामनाचार्यविरचिता काव्यालङ्कारसूत्रवृत्तिः श्री गोपेन्द्रत्रिपुर भुपालविरचित कामधेनु व्याख्योसहित विद्याधरी हिन्दीव्याख्योपेतम्, चौखम्बा कृष्णदास् अक्कादमी वारणासि ।
2. काव्यालङ्कारः। श्री भामहाचार्येण विरचितः चौखम्बा संस्कृतभवन् वारणासि ।
3. Kavyalankarasutra Vritti, Kamadenu, Sriranam, Sri vani Vilas press, 1909

# Unit -2
# द्वितीयेऽध्याये वैदर्भ्याः ग्राह्यत्वम्(14 - 22 सूत्राणि)

## उद्देश्यानि ( Learning Outcomes)

- काव्यशास्त्रेऽवगाहः ।
- संस्कृतसाहित्यसिद्धान्तानां परिचयः ।
- काव्यविभागपरिज्ञानम् ।
- काव्यरूपेषु रीतिसिद्धान्तानां प्रयोगपरिज्ञानम् ।
- वैदर्भीरीतेः वैशिष्टपरिज्ञानम् ।
- वैदर्भीरीतेः ग्राह्यत्वं जानाति ।

## प्राग्व्यपेक्षाः (Prerequisites)

वामनाचार्येण रचितमलङ्कारशास्त्रग्रन्थं भवति काव्यालङ्कारसूत्रवृत्तिः। तस्मिन् पञ्चाधिकरणानि सन्ति। प्रथमाधिकरणस्य द्वितीयाध्याये रीतीनां लक्षणं विधाय अन्ते वैदर्भीरीतेः ग्राह्यत्वं वर्णयति। इयं वैदर्भीरीति कथं ग्राह्या भवति इत्यस्य हेतुः अपि तेन प्रदर्शयते। वैदर्भीरीतिः कविभिः सहृदयश्च ग्राह्या इत्युक्त्वा द्वितीयस्य अध्यायस्य समापनं करोति ।

## मुख्यपदानि (Key words)

ग्राह्या, आरोहणार्थं, साकल्यात्, स्तोकगुणत्वात् इतरभ्यासः, तत्त्वं, अतत्त्वं, शणसूत्रवान्, त्रसरं, वैचित्र्यं, कुविन्दः, गुणसंपत्, सहृदयहृदयानां रञ्जकः।

## Discussion:

नन्वेतास्तिस्रो वृत्तयः समशीर्षकतया किं कविभिरुपादेयाः? नेत्याह-

**तासां पूर्वा ग्राह्या गुणसाकल्यात् ।।१४।।**

तासां तिसृणां रीतीनां पूर्वा वैदर्भी ग्राह्या। गुणानां साकल्यात्।

**पदार्थः** - ग्राह्या- स्वीकार्या

**न पुनरितरे स्तोकगुणत्वात् ।।१५।।**

इतरे गौडीयपाञ्चालौ न ग्राह्यो। स्तोकगुणत्वात्।।

**पदार्थः** - स्तोकः- न्यून, किञ्चित्, अल्पः

**तदारोहणार्थमितराभ्यास इत्येके ।।१६।।**

तस्या वैदर्भ्या एवारोहणार्थमितरयोरपि रीत्योरभ्यास इत्येके मन्यन्ते ।

**पदच्छेदः** - इत्येके = इति + एके

**तच्च न, अतत्त्वशीलस्य तत्वानिष्पत्तेः ।।१७।।**

न ह्यतत्वं शीलयतस्तत्वं निष्पद्यते।

**पदच्छेदः** – तच्च = तत् + च

ह्यतत्त्वं = हि + अतत्त्वं ।

शीलयतस्तत्वं = शीलयतः + तत्त्वं ।

निदर्शनार्थमाह-

**न शणसूत्रवानाभ्यासे त्रसरसूत्रवानवैचित्र्यलाभः ।।१८।।**

न हि शणसूत्रवानमध्यस्यन् कुविन्दस्त्रसरसूत्रवानवैचित्र्यं लभते।

**व्याख्या –**

**न तथा कस्यचिदपि कुविन्दस्य सूक्ष्मतन्तुवानकौशलसिद्धये गोणीवानाभ्यासो दृष्टः। तयोर्वैसादृश्येनोपयोगाभावात्। अतो वैदर्भीसन्दर्भलाभाय गौडीयपाञ्चालरीत्योरभ्यास इति मतमनादरणीयम्।**

**साऽपि समासाभावे शुद्धवैदर्भी ।।१९।।**

साऽपि वैदर्भी रीतिःशुद्धवैदर्भी भण्यते। यदि समासवत् पदं न भवति।

**पदच्छेदः** – साऽपि = सा + अपि

**तस्यामर्थगुणसंपदास्वाद्या ।।२०।।**

तस्यां वैदर्भामर्थगुणसम्पदास्वाद्या भवति ।

वैदर्भरीत्यवष्टम्भात् अर्थे अपि आरोपिता गुणसम्पदास्वादनीया इत्यर्थः।

अमुमेवार्थे कैमुतिकन्यायेन समर्थयते-

**तदुपारोहादर्थगुणलेशोऽपि ।।२१।।**

**पदार्थः** - स्वदते – आस्वाद्यते।

तदुपधानतः खल्वर्थलेशोऽपि स्वदते । किमङ्गः! पुनरर्थगुणसम्पत्। तथा चाहुः। किन्त्वस्ति काचिदपरेव पदानुपूर्वी यस्यां न किञ्चिदपि किञ्चिदिवावभाति । "आनन्दयत्यर्थ च कर्णपथं प्रयाता चेतः सताममृतवृष्टिरिव प्रविष्टा"। वचसि यमधिगम्य स्पन्दते वाचकश्रीर्वितथमवितथत्वं यत्र वस्तु प्रयाति। उदयति हि स तादृक्क्वापि वैदर्भरीतौ सहृदयहृदयानां रञ्जकः कोऽपि पाकः"।।

वैदर्भीनिष्ठत्वादर्थगुणसम्पदि वैदर्भीति व्यवहारोऽप्युपचर्यत इत्याह-

**साऽपि वैदर्भी तात्स्थ्यात् ।।२२।।**

साऽपीयमर्थगुणसंपद् वैदर्भी इत्युक्त्वा तात्सथ्यादित्युपचारतो व्यवहारं दर्शयति।

**पदार्थः** - तात्सथ्यात् – तस्मिन् तिष्टतीति तत्स्थः।

रीतिः तिस्रः वैदर्भी, गौडीया, पाञ्चाली चेति। तासां तिसृणां रीतीनां पूर्वा वैदर्भ्यां ग्राह्या। वैदर्भी गुणानां साकल्यात्। शेषे द्वे कथं न ग्राह्ये इत्यस्य कारणं सूचयति। गौडीपाञ्चालौ न ग्राह्ये स्तोकगुणत्वात्। तस्यां वैदर्थ्यां एव आरोहरणार्थमितरयोरपि रीतयोः अभ्यास इत्येके मन्यन्ते। न हि अतत्त्वशीलयतः तत्त्वं निष्पद्यते। तथा अत्रापि वैदर्भीरीति ज्ञात्वा अवगन्तुं शक्यते। हि शणसूत्रवानमध्यस्यन्कुविन्दः त्रसरसूत्रवानवैचित्र्यं न लभते। तदनन्तरं वैदर्भ्या वैशिष्ट्यं प्रतिपादयति। साऽपि वैदर्भी शुद्धवैदर्भी भण्यते। यदि समासवत्पदं न भवति। अतः परं वैदर्भ्याः वैशिष्ट्यं प्रतिपादयति। तस्यां वैदर्भ्याः अर्थगुणसम्पत् आस्वाद्या भवति। अर्थगुणरूपाया सम्पत्सातस्यां वैदर्भ्या स्वत एवास्वादगम्या भवति। तदुपघानतः खलु अर्थगुणलेशोऽपि स्वदते। तस्य वैदर्थ्यां अर्थगुणसम्पत् आस्वाद्या। साऽपि अयं अर्थगुणसम्पत्वैदर्भी इति उक्ता। तात्स्थ्यात् इत्युपचारतो व्यवहारं दर्शयति।

## पुनरावृत्तिः (Recap)

- प्रथमारीतिः वैदर्भी।
- वैदर्भीरीतिः ग्राह्या, गुणानां साकल्यात्।
- गौडीयापाञ्चालीरीती न ग्राह्ये स्तोकगुणत्वात्।
- वैदर्भी यदि समासवत्पदं न भवति सा रीतिः शुद्धवैदर्भी इति भण्यते।
- वैदर्भीरीतौ शब्दार्थगुणाः तस्मिन्नेव तिष्टन्ति इत्यतः सा रीतिः नितरां आस्वाद्या भवति ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. तिसृषु रीतिसु प्रथमा रीतिः का ?
2. स्तोकगुणयुक्ता रीती के ?
3. का रीतिः स्वीकर्तव्या?
4. वैदर्भीरीतिः कथं आस्वाद्या भवति ?

## एकवाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

1. शुद्धवैदर्भी का?
2. वैदर्भीरीतेः गुणाः के ?
3. वैदर्भीरीतिः किमर्थं अत्यधिकं आस्वाद्या भवति ?

## निर्दिष्टाभ्यासाः (Assignments)

1. विदर्भीरीतेः ग्राह्यत्वं विशदयत।
2. वैदर्भीवैशिष्ट्यं प्रतिपादयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to objective type Questions)

1. वैदर्भी।
2. गौडीया पाञ्चाली चेति।
3. वैदर्भी।
4. अर्थगुणसंपदा समग्रगुणोपेता च भवतीति कारणात्।

## सूचनाग्रन्थाः (References)


1. श्रीमद्वामनाचार्यविरचिता काव्यालङ्कारसूत्रवृत्तिः श्री गोपेन्द्रत्रिपुर भूपालविरचित कामधेनु व्याख्योसहित। विद्याधरी हिन्दीव्याख्योपेतम्, चौखम्बा कृष्णदास् अक्कादमी वाराणसी ।
2. काव्यालङ्कारः। श्री भामहाचार्येण विरचितः चौखम्बा संस्कृतभवन् वाराणसी ।
3. Kavyalankarasutra Vritti, Kamadenu, Sriranam, Sri vani Vilas press, 1909

**Model Question Paper**

**Set – 01**

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………  Reg. No : ………...............
Name : ………………...

FOURTH SEMESTER B.A. SANSKRIT EXAMINATION
DISCIPLINE CORE COURSE - B21SN04DC - SAMSKRUTHAKAVYASASTRAM
(CBCS - UG)
2022-23 - Admission Onwards

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः। संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या।**

**SECTION A**

**(प्रथमो भागः)**

**I.एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10x1=10)**
**(Answer any ten Questions in a word or Sentence)**

1. अयं पञ्चमो वेदः – कः? तस्य कर्ता कः?
2. उपमानोपमेयस्य गुणलेशतः साम्यम् उपमा - कस्येदं लक्षणम् ?
3. अविवक्षितवाच्यध्वनेः अपरं नाम किमस्ति ?
4. का नाम अभिधा ?
5. अस्मिन् लोके कतिविधाः वाचः उपलभ्यन्ते ?
6. महाकाव्यस्य इतिवृत्तं किम् ?
7. मयूरकविना रचितः ग्रन्थः कः?
8. 'अनलङ्कृती' इति पदस्य कोऽर्थः?
9. किं नाम वाचकः?
10. शब्दानां प्रवृत्तिः कतिविधा?
11. को मुख्यः शब्दव्यापारः?
12. काव्यालङ्कारसूत्रवृत्तिः नाम ग्रन्थस्य कर्ता कः ?
13. अधिकारी कः?

14. रीतिसम्प्रदायस्य उपज्ञाता कः ?

15. स्तोकगुणयुक्ता रीती के ?

**SECTION -B**

**(द्वितीयो भागः)**

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** **(5x2=10)**

**(Answer any five Questions in one or two sentences)**

16. ध्वनेः द्वौ मुख्यभेदौ कौ स्तः ?

17. किं नाम दोषः?

18. इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् – कदा ?

19. काव्यभेदान् लिखत ।

20. मम्मटोक्तं काव्यलक्षणं किम्?

21. को मुख्यः शब्दव्यापारः?

22. उपादानलक्षणायाः लक्षणं किम्?

23. गौर्वाहीकः' - कस्येदमुदाहरणम्?

24. सौन्दर्यरूपः अलङ्कारः कथं सम्पाध्यः?

25. रीतेः भेदान् लिखत ।

**SECTION - C**

**(तृतीयो भागः)**

**III.केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत।** **(6x5=30)**

**(Answer any six Questions)**

26. भरतमुनिः- टिप्पणीं लिखत।

27. वीररसपोषणौ सङ्गीतरसौ कौ ? विशदयत।

28. दशकुमारचरितम् ।

29. काव्यस्य प्राणाः रसः इति कुन्दकः- विचारयत।

30. बृहत्कथायाः प्राधान्यं प्रतिपादयत।

31. मम्मटोक्तरीत्या काव्यप्रयोजनानि विशदयत।

32. 'यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते..........चेतः समुत्कण्ठते'। अस्य श्लोकस्य सारं लिखत।

33. मध्यमकाव्यस्य लक्षणं किम् ? खण्डिकया निरूपयत।

34. काव्ये कतिविधः शब्दः? के च ते?

35. कस्य कस्य अर्थस्य व्यञ्जकत्वं संभवति?

36. 'तदेषा कथिता त्रिधा' - विशदायत।

37. गूढव्यङ्ग्य- अगूढव्यङ्ग्योः कः भेदः?

**SECTION– D**

**(चतुर्थो भागः)**

IV.**केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x10=20)**

**(Write an essay on any two of the following)**

38. अलङ्कारशास्त्रे भामहस्य स्थानं विशदयत।

39. महाकाव्ये वर्तमानाः प्रतिपाद्यविषयाः के ?

40. उत्तममध्यमकाव्ययोः लक्षणं संसूच्य सोदाहरणं विशदयत।

41. "रीतिरात्मा काव्यस्य" विशदयत।

## Model Question Paper

## Set – 02

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………

Reg. No : ……….................
Name : ………………...

FOURTH SEMESTER B.A. SANSKRIT EXAMINATION
DISCIPLINE CORE COURSE- B21SN04DC- SAMSKRUTHAKAVYASASTRAM
(CBCS - UG)
2022-23 - Admission Onwards

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः। संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या।**

**SECTION - A**

**(प्रथमो भागः)**

**I.एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10x1=10)**
**(Answer any ten Questions in a word or Sentence)**

1. नाट्यशास्त्रे कति अध्यायाः सन्ति?
2. ध्वनिसिद्धान्तस्य प्रवर्तकः कः ?
3. देवीशतकस्य कर्ता कः ?
4. विश्वनाथेन रचितः अलङ्कारशास्त्रग्रन्थः कः ?
5. अपादः पदसन्तानः - किम् ?
6. बृहत्कथायाः कर्ता कः?
7. काव्यप्रकाशस्य कर्ता कः?
8. चित्रकाव्यस्य अपरं नाम किम्?
9. लक्षणायाः लक्षणं किम्?
10. व्यङ्ग्यार्थस्य मुख्यं कार्यं किम्?
11. किं नाम व्यञ्जना?
12. काव्यं ग्राह्यमलङ्कारात् - कस्येदं वचनम् ?
13. सतृणाभ्यवहारिणः के?

14. 'विशिष्टा' इति पदस्य अर्थः कः ?

15. का रीतिः स्वीकर्तव्या?

## SECTION - B
**(द्वितीयो भागः)**

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत। (5x2=10)**
**(Answer any five Questions in one or two sentences)**

16. वर्णविन्यासवक्रता का ?

17. कविशिक्षामधिकृत्य कः सविस्तरं प्रतिपादितवान् ?

18. एषः मार्गः प्रकृतिसुन्दरः - कः मार्गः ?

19. किं नाम लास्यम् ?

20. चित्रकाव्यस्य कति भेदाः?

21. किं नाम गूढव्यङ्ग्यलक्षणा?

22. 'गङ्गायां घोषः' इति लक्षणायाः प्रयोजनं किम्?

23. व्यञ्जना कतिविधा ?

24. वामनमते कवयः कतिविधाः? के च ते ?

25. वैदर्भीरीतेः गुणाः के ?

## SECTION - C
**(तृतीयो भागः)**

**III.केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत। (6x5=30)**
**(Answer any six Questions)**

26. ध्वन्यालोकः।

27. कुन्दकस्य काव्यलक्षणम्।

28. सुवृत्ततिलकम्।

29. राजशेखरस्य कृतयः।

30. काव्यभेदाः ।

31. काव्यप्रकाशे मम्मटोक्तरीत्या काव्यकारणम्।

32. पूर्वाचार्याणां काव्यलक्षणानि।

33. शब्दचित्रं, वाक्यचित्रं च विशदयत।

34. 'पश्य निश्चलनिष्पन्देति' पद्ये किं व्यज्यते?

35. शब्दवृत्तयः।

36. व्यञ्जनायाः लक्षणं किम् ?

37. व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने - व्याख्यात।

## SECTION – D
## (चतुर्थो भागः)

IV. **केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x10=20)**
**(Write an essay on any two of the following)**

38. "काव्यस्यात्मा ध्वनिः" समर्थयत।

39. नायकप्रतिनायकवर्णनाविषये दण्डिनः अभिप्रायः कः ? विशदयत।

40. मम्मटमते काव्यलक्षणं सोदाहरणं स्पष्टयत।

41. लक्षणायाः स्वरूपं लिखत। कतिविधा लक्षणा? सोदाहरणं लिखत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

संस्कृतकाव्यशास्त्रम्

COURSE CODE: B21SN04DC

SGOU

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-970238-1-1